CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चस्वराः

डा. सत्येन्द्र मिश्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
ज्यो- ११६२

।। श्रीः ।।

चौखम्बा सुरभारती ग्रन्थमाला

दैवज्ञश्रीप्रजापतिदासविरचिताः

पञ्चस्वराः

सान्वय **सुबोधिनी** संस्कृत **प्रज्ञावर्द्धिनी** हिन्दी
टीकाद्वयध्वनिताः

सम्पादकः व्याख्याकारश्च

डा० सत्येन्द्रमिश्रः

ज्योतिष-विभागः
काशीहिन्दूविश्वविद्यालयः, वाराणसी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० 37/117, गोपालमन्दिर लेन

पो० बा० नं० 1129, वाराणसी 221001

फोन : 335263, 333371

सर्वाधिकार सुरक्षित

प्रथम संस्करण २००३

मूल्य 45.00

ने.रु. 621-

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

38 यू . ए . बंगलो रोड, जवाहरनगर

पो० बा० नं० 2113

दिल्ली 110007

फोन : 3956391

Acc. 26063 / 27073

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)

पो० बा० नं० 1069, वाराणसी 221001

फोन : 420404

कम्प्यूटर टाइप सेटर :
चित्तरंजन कम्प्यूटर वर्क्स
नई दिल्ली

मुद्रक :
ए. के. लिथोग्राफ़र
दिल्ली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इग्रा - ११६२

R.

The

CHAUKHAMBA SURBHARATI GRANTHAMALA

351

PAÑCASVARĀḤ

of

Daivajña Śrī Prajāpati Dāsa

with

Subodhinī Sanskrit and **Prajñāvardhinī**
Hindi Commentaries

Edited & Translated by

Dr. SATYENDRA MISHRA

Jyotishacharya (Gold Madelist), Ph.D.
Department of Jyotish
Banaras Hindu University, Varanasi,

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Publishers:

© CHAUKHAMBA SURBHARATI PRAKASHAN

(Oriental Publishers & Distributors)

K. 37 / 117, Gopal Mandir Lane

Post Box No.1129

VARANASI 221001

Telephone : 335263, 333371

First Edition

Also can be had of

CHAUKHAMBA SANSKRIT PRATISHTHAN

38 U. A. Bungalow Road, Jawaharnagar

Post Box No. 2113

DELHI 110007

Telephone : 3956391

*

CHOWKHAMBA VIDYABHAWAN

CHOWK (Behind The Bank of Baroda Building)

Post Box No. 1069

VARANASI 221001

Telephone : 420404

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

कारुण्यसिन्धुलसितं हृदिपंकजस्थं
पीयूषवृष्टिरिवभाति च वाग्विलासम् ।
आदिष्टकर्मनिरतं गुणभाजनञ्च
श्री 'रामजन्म' बिबुधं प्रणमामि नित्यम् ॥

तत्र भवतां प्रातः स्मरणीयानां काशी हिन्दू विश्वविद्यालये ज्यौतिष-
विभागाध्यक्षचराणां गुरुवर्याणां पण्डितरामजन्ममिश्र-
महोदयानां विकसदरविन्दसोदरयोः
करयोः सादरभरमिमं ग्रन्थं
समर्पयति—

विनीतः
सत्येन्द्रमिश्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरोवाक्

वेदाहियज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वाविहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्यौतिषं वेद स वेद यज्ञान् ॥

(आर्चज्यौतिष)

इदं कालविधानशास्त्रं कालविज्ञापकशास्त्ररूपेण लोकैराद्रियमाणं दरीदृश्यते । मुहूर्तं शोधयित्वा क्रियमाणा यज्ञादिक्रियाविशेषाः फलाय कल्प्यन्ते । एवम्भूतं ग्रहाणां दृष्टि-दशा-मैत्रीवशात् जातकानां शुभाशुभफलं कल्प्यते । चतुर्णां वेदानां पृथक् पृथक् ज्यौतिष शास्त्रमासीत्, परं साम्प्रतं तेषु सामवेदस्य ज्यौतिषशास्त्रं नोपलभ्यते । इतरेषां त्रयाणां वेदानां ज्यौतिषशास्त्राण्यवाप्यन्ते । यथा—

१. ऋग्वेदस्य ज्यौतिषम्—**आर्चज्यौतिषम्** (३६ पद्यात्मके)

२. यजुर्वेदस्य ज्यौतिषम्—**याजुषज्यौतिषम्** (३९ पद्यात्मके)

३. अर्थवेदस्य ज्यौतिषम्—**आथर्वणज्यौतिषम्** (१६२ पद्यात्मके)

एतेषां प्रणेता लगधोनामाचार्यः । एतस्य ज्यौतिषशास्त्रस्य त्रीणि वर्त्मानि, तदिदं शास्त्रं त्रिस्कन्धमुच्यते । यथा—

सिद्धान्त संहिता होरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमनुत्तमम् ॥

स्कन्धत्रयेऽपि प्राचीनार्षग्रन्थाः हत भाग्येऽस्मिन् भारते समागते मुगलशासके वैधर्म्यैश्वर्यप्रभावेण नियन्त्रिता, बहुशः लुप्ताश्च बभूवुः । तदानीं दैवात् तेषां कुटिलकटाक्षैर्वञ्चिता ये केचन् ग्रन्थास्ते अस्माकं नयनपथमुप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यान्तीति । ते च यवना: अस्माकमार्ष ग्रन्थानां यथावसरं सारं संकलय्य स्वभाषा निबद्धान् कांश्चन् ग्रन्थांश्चक्रु: । मुगलसाम्राज्यानन्तरं यूरोपदेशीयानां साम्राज्ये ये केचिदुर्वरिता आर्षग्रन्था: ते शनै: शनै: यूरोपदेशमधिगच्छन्तीति । साम्प्रतिके भारतेऽर्वाचीनविनिर्मिता: ये पौरुषा ग्रन्था: दृष्टिपथमारोहन्ति ते च पञ्चदशशताब्दयभ्यन्तरकालिका एव ।

इयं भारत भूमि: समयप्रभावात्, परस्पर धार्मिकजनविवादात्, तादृक-पाण्डित्यविरहात् बलपूर्वकमवक्तुं नोत्सहे यतो यथापूर्वमद्यापि मनीषिणो । विद्यन्त एव । ये केचन् अद्यापि विद्यन्ते तेषु बह्व: **'न देयं यस्य कस्य-चित्'** इति मूलमन्त्रोपासका: सन्ति, नास्मदन्तरा केचिदिमां विद्यामभिजानन्त्विति प्रयततन्ते ।

जातकस्कन्धे जातकानां द्वादशभाव विचार पुरस्सरं शुभाशुभफलानि वर्णितानि सन्ति । अस्मिन्स्कन्धे जातकानां उत्कर्षापकर्षसमयानां विचार उपलभ्यते, परमत्र मृत्युर्विषये नास्ति विवेचनम् । केशवोक्त **'जातस्य हि ध्रुवं मृत्युर्ध्रुवं जन्म मृतस्य च'** तथा **'मरणं प्रकृति: शरीरिणा विकृतिर्जीवित-मुच्यते बुधै:'** इति कालिदासोक्त वचनात् सर्वेषां जन्मिनां निधनं ध्रुवम्, अतो जनननिधनं नित्यंसहचरम् । सर्वे जना: चिरकालं जिजीविषन्ति परं स्वनिधन-समयं सर्वे जिज्ञासन्ति । अयं **'पञ्चस्वरा'** ग्रन्थ: निधन संश्रयो वर्तते । एतं ग्रन्थं विरचय्य अपूर्वं प्रयोगं **'प्रजापतिदास:'** प्रस्तौतिस्म । ग्रन्थकार: स्व काल विषये कुत्रापि न निर्दिष्टवान् परं केचन् टीका कर्तृकाणां मते १११४ ईशवीयत: १६३१ ईशवीय मध्ये अस्य कालो वर्तते ।

अयं ग्रन्थ: कृष्णदत्तीय **सुबोधिनी** संस्कृतटीकया विस्तृता वरीवर्ति, परं क्लिष्ट शब्दानां संयोजनवशात् सर्वसाधारणा बोधगम्या: न भवन्ति । प्राचीन टीका लेखकै: तल्लेखनक्रमे विद्यालयमहाविद्यालयेषु अधीयानां छात्राणां काठिन्यसरलतामुपेक्ष्य सुगम्य शब्दानां संयोजनं दृष्टिपथं नानीतम् । प्रायश: छात्रा: परीक्षाकाले स्वीयान् भावान् संस्कृते प्रकाशयितुं न क्षमन्ते । एतत्सर्वं परिभाव्य एतस्य ग्रन्थस्य **'प्रज्ञावर्द्धिनी'** सरला सुगम्या हिन्दीटीका मया प्रस्तुता । ग्रन्थे सर्वेऽपिविषया यथासम्भवं वर्गीकृत्यैव प्रकटीकृता:, परीक्षायां समुत्तरे लेखे छात्रा यथा सौविध्यमनुभवेयुस्तदर्थं भूरिशश्चेष्टितं मया ।

ग्रन्थस्य प्रकाशनं प्रतिभाजुषां उत्साहितचेतसां **श्रीचित्तरञ्जनमालवीयानां**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्साहित चेतसां साहाय्यमाकलय्यैव सम्पन्नमिति तं मुहुर्मुहुर्धन्यवादान् प्रदास्यामि तथा विश्वविश्रुत **चौखम्बासुरभारती** प्रकाशनस्य कर्णधारः **श्री नवीनकुमारगुप्तेभ्योपि** सन्ततं आशीर्वचांसि वितीर्यन्तेऽस्माभिः येषां प्रेरणया पूर्णोऽयं ग्रन्थः ।

मनुजसुलभैरज्ञानविपर्यय प्रमादादिभिरशून्यैरस्माभिः प्रूफादि संशोधिते, तथाप्यस्मिन्ग्रन्थे बहवो दोषाः संभवेयुः । अतः सहृदयधुरीणास्तान्दोषान्दूरीकृत्य गुणानेव स्वीकृत्यास्माननुगृह्णीयुरिति कामयते ।

श्रावणी
२०५९ वैक्रमी

विदुषां वशंवदः
सत्येन्द्रमिश्रः
वाराणसेयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिका

ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानं तु यो वेद स याति परमाङ्गतिम् ।।

—(गर्गः)

जन्मकालिक तिथि-नक्षत्र-ग्रहादि के आधार पर मनुष्यजीवन में आने वाले सुख-दुःख का निर्णय जिस शास्त्र द्वारा किया जाता है उसे जातकशास्त्र कहा जाता है । त्रिस्कन्ध ज्योतिष में जातकस्कन्ध का क्षेत्र बहुत ही व्यापक है । मानव जीवन में आने वाले शुभ-अशुभ समयों का विवेचन जन्मकुण्डली या प्रश्नकुण्डली द्वारा किया जाता है । इसी (कुण्डली) से सम्बन्धित ताजिक शास्त्र भी है जिसमें वर्षप्रवेश गणित द्वारा मनुष्य के एक वर्ष में आने वाले शुभाशुभ समयों का विवेचन रहता है । स्वरशास्त्र भी जातक स्कन्ध के अन्तर्गत ही माना जाता है, इसमें स्वर के आधार पर लाभ-हानि, जय-पराजय, जीवन-मरण का विश्ले-षण रहता है । इससे इडा-पिङ्गला-सुषुम्ना नाडीस्वर संचारण-वश कार्य की सिद्धि असिद्धि का निर्धारण किया जाता है । नाडीस्वर से सम्बन्धित शिवस्वरोदय आदि ग्रन्थ हैं । स्वर (अ-इ-उ-ए-ओ) शास्त्र में ही नरपति जयचर्या भी एक प्रसिद्ध ग्रन्थ है जिसकी रचना संभवत: १०९६ शकाब्द में हुई थी । इस ग्रन्थ में पाँच स्वरों (अ-इ-उ-ए-ओ) के आधार पर ही मनुष्यजीवन के समस्त शुभाशुभ कार्यों का समयों का साधन किया गया है । अब यहाँ ज्यौतिष के तीनों स्कन्धों का तुलनात्मक विस्तार करके देखें की जातकस्कन्ध की व्यापकता कितनी है ।

१. सिद्धान्तस्कन्ध—

सिद्धान्त

सिद्धान्त | तन्त्र | करण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. जातकस्कन्ध—

जातक

- जातक
- ताजक
- स्वर (इडा, पिङ्गला...)
- सामुद्रिक शास्त्र

स्वर (अ-इ-उ...)

३. संहितास्कन्ध—

संहिता

- संहिता
- शकुन
- मुहूर्त्त

इस तरह तीनों स्कन्धों को तुलनात्मक दृष्टि से देखने पर हमारा जातक स्कन्ध तीनों में सर्वाधिक विस्तृत प्रतीत होता है ।

जातक स्कन्ध का ही एक भाग स्वरशास्त्र है जिसके अन्तर्गत प्रस्तुत ग्रन्थ 'पंचस्वरा' आता है । अरिष्ट विवेचन में यह ग्रन्थ अद्वितीय माना जाता है क्योंकि पाँच स्वर वर्णों के आधार पर हीं इसमें अरिष्ट विवेचन दिया हुआ है । जातकशास्त्र के समस्त ग्रन्थों में मनुष्य (जातक) के शुभाशुभ का ही कथन दिया रहता है परन्तु इस ग्रन्थ में केवल अरिष्ट और मरण का ही विश्लेषण दिया हुआ है जो इसका वैशिष्ट्य है । इसमें त्रिपताकी चक्र का उपस्थापन करके जन्मकुण्डली के ग्रहों के वेध द्वारा जातक के अरिष्ट का विवेचन है जो अन्य ग्रन्थों में नहीं मिलता । यहीं इसके अद्वितीयता को सिद्ध करता है ।

इस 'पंचस्वरा' ग्रन्थ के रचयिता श्रीप्रजापति दास हैं । इन्होंने अपने काल के विषय में कुछ भी नहीं लिखा है परन्तु कुछ टीकाकारों के अनुसार ईशवीय सन् ११९४ से १६३१ के मध्य में है । स्थान के विषय में भी यही कहा जा सकता है कि ये दक्षिण भारत के थे क्योंकि इनके वचन 'सद्वैद्य कुल जातेन' के अनुसार वैद्यककुल दक्षिण भारत में ही होता है यह उत्तर भारत में नहीं होता ।

इस ग्रन्थ में ३ अध्याय हैं—१. त्रिपताकीचक्रविचार, २. आयुर्दाय विचार, ३. अरिष्ट विचार ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. त्रिपताकीचक्र विचाराध्याय—इस अध्याय में ६१ श्लोक हैं। इसमें त्रिपताकी चक्र से जन्मकुण्डली के ग्रहों के वेध द्वारा अरिष्टका निर्धारण किया गया है। जातक के लिए २४ वर्ष तक बालारिष्ट का समय मानकर उसके बाद आयु निर्धारण (साधन) करने को कहा गया है।

२. आयुर्दाय विचाराध्याय—इस अध्याय में १०७ श्लोक हैं। इसमें वर्षलग्न और वर्षेश का साधन कर केतुपताकी-केतुकुण्डली-गुरुकुण्डली द्वारा अरिष्टफल कहा गया है। साथ ही स्वर (अ-इ-उ...) चक्र द्वारा भी अरिष्ट फल कथन दिया हुआ है।

३. अरिष्टविचाराध्याय—इस अध्याय में ८१ श्लोक हैं। इसमें बालक के लिए अरिष्टयोग-मरणयोग आदि दिये गये हैं। साथ ही राशियों के द्रेष्काण का स्वरूप और फल भी दिया हुआ है। अङ्ग-भङ्ग, घातपात, जलजन्तु सर्पादि से मरण का योग भी उल्लिखित है।

तीनों अध्यायों को मिलाकर इस ग्रन्थ में कुल ६१ + १०७ + ८१ = २४९ श्लोक हैं। इस ग्रन्थ की 'सुबोधिनी' संस्कृत टीका है जो शकाब्द १७८३ में रचित है। इसके रचयिता 'श्रीकृष्णदत्त' जी हैं जो मिथिला-देशीय एक उद्भट विद्वान् रहे हैं। इनकी सुबोधिनी संस्कृत टीका अत्यन्त हीं सारगर्भित है। टीकाकार ने 'जातकक्रोड' नामक एक स्वतन्त्र ग्रन्थ की भी रचना की है जो सम्प्रति कई एक शिक्षण संस्थानों में ज्यौतिष आचार्य की कक्षाओं में पढ़ाई भी जाती है। टीकाकार ने अपने अद्भुत पाण्डित्य का परिचय देते हुए इस पञ्चस्वरा ग्रन्थ को सोदाहरण प्रस्तुत किया है। साथ ही साथ बंगाल के प्रसिद्ध ज्यौतिषी 'खना' का अरिष्ट सम्वन्धि वचन भी उद्धृत कर दिया है। जिसे इस 'प्रस्तुत संस्करण' के परिशिष्ट भाग में विधिवत सजा दिया गया है।

इस ग्रन्थ की 'सुबोधिनी' संस्कृत टीका जो अत्यन्त ही सारगर्भित है उसके साथ 'प्रज्ञावर्द्धिनी' हिन्दीटीका को समायोजित करके इस ग्रन्थ को छात्रों के लिए अत्यन्त ही उपादेय बना दिया गया है। ग्रन्थ के परिशिष्ट भाग में श्लोकानुक्रमणिका और परीक्षोपयोगिप्रश्नों को भी समाहित किया गया है ताकि यह ग्रन्थ जिज्ञासुवर्ग और परीक्षार्थीवर्ग दोनों के लिए ही उपयोगी हो सके। इस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्करण द्वारा छात्रों का यदि हित सिद्ध हो सकेगा तो मैं अपने परिश्रम को सार्थक समझूँगा ।

इस ग्रन्थ के प्रकाशन में चौखम्बा सुरभारती के **श्रीनवीनकुमार गुप्त** का प्रोत्साहन और **चित्तरंजन कम्प्यूटर** का सहयोग समयानुसार प्राप्त होता रहा है अत: हम इनके अत्यन्त आभारी हैं ।

श्रावणी
विक्रम संवत् २०५९

सत्येन्द्र मिश्र
वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयानुक्रमणिका

त्रिपताकीचक्रविचाराध्यायः १

मङ्गलाचरण १
कुल (वंश) निरूपण २
विद्वानों से आग्रह ३
ग्रन्थप्रयोजन ३
स्वमतानुसार अरिष्टप्रमाण ४
मतान्तर से अरिष्टप्रमाण ५
अरिष्टनिर्णय हेतु त्रिपताकी चक्र निर्माण ५
त्रिपताकी चक्र में ग्रहादि स्थापन ६
राशिचक्र में अङ्कस्थापन ८
अन्यमतानुसार ग्रहस्थापन में राशियों के अङ्क ९
वेध प्रकार १०
छात्रों के ज्ञानार्थ पुनः वेधकथन १४
वेधकथन १६
ग्रहों की राशि १९
ग्रहबल निरुपण २०
ग्रहों के राशि भोगकाल २१
सूर्य से सम्बन्धानुसार ग्रहों की संज्ञा २२
ग्रहों के सौम्य क्रूर लक्षण २३
ग्रहों के उच्च नीचादि कथन २५
बालारिष्ट समय का ज्ञान २७
जन्मलग्न से बालारिष्ट ज्ञान २८
प्रकारान्तर से अरिष्टज्ञान २९
स्वकीय मत ३०
शुभ लक्षण ३१
अशुभ लक्षण ३१
अर्धयामेश कथन ३२
अर्धयामेश साधन ३३
दिन में दण्डेशों का क्रम ३४
दिन में दण्डेश साधन ३५
दिन-रात्रि के दण्डेश ३७
रात्रि के दण्डेश ३८

आयुर्दायविचाराध्यायः २

स्वमतप्रकटीकरण ४५
वर्षफल कथन वर्षलग्न साधन ४६
वर्षेश्वर साधन ४७
वर्षारम्भविधि कथन ४७
केतुपताकी चक्रज्ञान ४८
कृष्णदत्तीय सूत्र ४९
केतुपताकीचक्रजनित वर्षेशफल कथन ५०
एक वर्ष में ग्रह दशामान ५३
अन्तर्दशा साधन ५५
अन्तर्दशा फल ५८
केतुकुण्डली कथन ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केतुकुण्डली के फल ६५
गुरु चन्द्र फल ६७
शुक्र राहु फल ६७
शनिफल ६७
तृतीयवर्षेश ज्ञान ७०
प्रकारान्तर से गुरुकुण्डली ७२
कृष्णदत्तीय सूत्र ७४
गुरुकुण्डली के फल ७६
वर्शेषों के फलपाक का क्रम ७६
प्रकारत्रय ये वर्षेश में विशेष ७७
पञ्चस्वर कथन ७९
कथितस्वरों के फल ८२
दशास्वर कथन ८२
तिथ्यादि स्थापन कथन ८५
पूर्व कल्पित ७२ दिनात्मक में भोग काल ८८
अन्तर्दशा फल ८९
नक्षत्रस्वर कथन ९०
राशिस्वर कथन ९१
सम्वत्सर स्वर कथन ९२
बालादि स्वर फल ९३
वर्षगणितप्रकार कथन ९६
कर्मादिकोष्ठकसाधन ९७
तिथ्यादिसाधन १०५
तिथ्यादि ज्ञान १०७
पूर्वोक्तयोगाङ्क में क्षेप १०८
निधन के षोडशयोग १०९
योगान्तर ११०
योगान्तर ११२
योगान्तर ११२
योगान्तर कथन ११३
योगान्तर ११४
योगान्तर ११४
योगान्तर ११५
पुनर्योगान्तर ११५
योगान्तर कथन ११६
योगान्तर ११६
योगान्तर ११७
योगान्तर ११७
योगान्तर ११८
योगान्तर ११८
विशेष कथन ११९
उपसंहार कथन १२०

अरिष्टविचाराध्यायः ३

अरिष्ट कथन १२१
मातासहित अरिष्टयोग १२१
अरिष्टयोग कथन १२२
और भी १२३
माता-पिता के साथ मरणयोग १२४
अरिष्टयोग १२४
और भी १२४
भातृरिष्ट योग कथन १२५
पूर्वोक्त अरिष्ट का भङ्ग कथन १२६
सोम सिद्धान्त का वचन १३०
पुरुष-स्त्री जन्मज्ञान १३२
क्लीबजन्मज्ञान १३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रेष्काण द्वारा स्त्री-पुरुष ज्ञान	१३४	काणयोग	१४३
मेषराशि का द्रेष्काण फल	१३४	महापातक योग	१४३
वृषराशि का द्रेष्काण स्वरूप	१३५	घातक योग	१४४
मिथुनराशि का द्रेष्काण स्वरूप	१३६	आत्मघातयोग कथन	१४४
कर्कराशिकाद्रेष्काण स्वरूप	१३६	पापिष्ठयोग कथन	१४५
सिंह तथा कन्या राशि का द्रेष्काण स्वरूप	१३७	घाती-वधी योग	१४५
		पशु से मरण योग	१४५
तुला, वृश्चिक राशियों के द्रेष्काण फल	१३७	जलजन्तु से मरण योग	१४६
		सर्प से मृत्यु योग	१४६
धनु मकरराशियों के द्रेष्काण-फल	१३८	जातिभ्रष्ट योग	१४६
		लाञ्छन योग	१४७
कुम्भमीन राशियों के द्रेष्काण-फल	१३९	शत्रु से नाश योग	१४७
		टीकाकार वंश विवरण	१४९
जारजकन्या जन्मयोग कथन	१४०	**परिशिष्ट**	
जारजातभङ्ग कथन	१४०	खनावचन	१५१
अङ्गभङ्ग योग	१४०	श्लोकानुक्रमणिका	१५५
नेत्रनाशयोग कथन	१४२	प्रष्टव्य प्रश्नाः	१६५
खञ्जयोग कथन	१४३	वस्तुनिष्ठप्रश्नाः	१६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

दैवज्ञ श्रीप्रजापतिदास विरचिताः

पञ्चस्वराः

सान्वय-सुबोधिनीसंस्कृत-प्रज्ञावर्द्धिनीहिन्दी
टीकाद्वयध्वनिताः

त्रिपताकीचक्रविचाराध्यायः—१

मङ्गलाचरण—

इष्टदेवं नमस्कृत्य गोपालं कुलदैवतम् ।
श्रीप्रजापतिदासेन क्रियते ग्रन्थसंग्रहः ॥ १ ॥
नवग्रहान्नमस्कृत्य देवीं सरस्वतीं तथा ।
प्रणिपत्य गुरुं किञ्चिज्ज्योतिः शास्त्रं निरूप्यते ॥ २ ॥

अन्वयः—श्रीप्रजापतिदासेन इष्टदेवं गोपालं कुलदैवतं नमस्कृत्य ग्रन्थसंग्रहः क्रियते ॥ १ ॥

नवग्रहान् सरस्वतीं देवीं नमस्कृत्य तथा गुरुं प्रणिपत्य किञ्चित् (लघु) ज्योतिः शास्त्रं (ग्रन्थं) निरूप्यते ॥ २ ॥

*** सुबोधिनी ***

हिमाचलेन्द्रदारिकां प्रचण्डचण्डदारिकाम्
स्वभक्तवृन्दपालिकां सदा भजामि कालिकाम् ।
नमामि गोपिकावरं सदा विभासिताम्बरम्
लसत्सुपिङ्गलाम्बरं हताहितोघसम्वरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चस्वराख्येऽत्र निरावलम्बे दुरूहपद्यौघयुते सुगुप्तं ।
श्रीकृष्णदत्तो वितनोम्यहं तां टीकाऽतिरम्या च सुबोधिनी या ॥

श्रीप्रजापतिदासेन प्रजापतिदासनाम्ना गणकेन ग्रन्थसङ्ग्रहः 'ग्रन्थस्य पञ्चस्वराभिधानस्य सङ्ग्रहः अर्थात् बालाद्यारिष्टायुर्दायाद्यरिष्टायुर्दायाद्यरिष्ट-परामर्शपुरःसरं त्रिपताकी केतुपताकी केतुकुण्डली गुरुकुण्डलीचेति विचारा साराब्देशदशान्तर्दशापरामर्शेन शुभाशुभनिर्णयः क्रियते । किं कृत्वा । इष्टदेवं गोपालं श्रीकृष्णं नमस्कृत्य मनोवाक्वायकर्मभिर्नमस्कारं कृत्वा किं विशिष्टं तं कुलदैवतं स्वकुलोपासनारूपदेवम्' ॥ १ ॥

अथ ग्रन्थकारस्तु विघ्नबाहुल्यभयात्पुनर्मङ्गलाचरणं करोति नवग्रहान-र्कादिकेत्वन्तग्रहान् तथा सरस्वतीं वागधिष्ठात्रीं देवीं च नमस्कृत्य । किं च गुरुं गुरुदेवं प्रणिपत्य प्रणिपातपूर्वकं नमस्कृत्य । किचित्स्वल्पं ज्योतिःशास्त्रं ज्योतिषग्रन्थं पञ्चस्वराभिधानं निरूप्यते कथ्यते ॥ २ ॥

*** प्रज्ञावर्द्धिनी ***

मैं श्रीप्रजापतिदास अपने इष्टदेव तथा कुलपूज्य श्रीकृष्ण जी को नमस्कार करके पञ्चस्वरा नामक ग्रन्थ का संग्रह करता हूँ ।

पुनः नवग्रहों को तथा सरस्वती देवी और गुरुदेव को नमस्कार करके इस पञ्चस्वरा नामक ग्रन्थ का विचारपूर्वक निरूपण करता हूँ ॥ १-२ ॥

कुल (वंश) निरूपण—

सद्वैद्यकुलजातेन परिहारः कृतोमया ।
ज्योतिर्वित्सु च सर्वेषु ब्राह्मणस्य विशेषतः ॥ ३ ॥

अन्वयः—सद्वैद्य कुलजातेन मया परिहारः कृतः (उक्तः) सर्वेषु ज्योति-र्वित्सु विशेषतः ब्राह्मणस्य च ॥ ३ ॥

संस्कृतः—सद्वैद्यकुलजातेन पवित्रे वैद्याख्यवंशे चोत्पन्नेन मयाऽयं परि-हारः शङ्कानिवारणरूपः कृतः कथितः । केषु सर्वेषु ज्योतिर्वित्सु ज्योतिः शास्त्रविज्ञेषु तत्रापि ब्राह्मणेषु विशेषतः अर्थात् विशेषतयाऽनेन ग्रन्थेन ज्योतिः शास्त्रज्ञेषु ब्राह्मणेषु चोपकारो भवेत् । इत्यनेन स्वकुलनिरूपणं कृतम् ॥ ३ ॥

हिन्दी—ज्योतिषज्ञों के लिये उसमें भी विशेष करके ज्योतिषज्ञ ब्राह्मणों के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपकार के निमित्त सद्वैद्य कुलोत्पन्न मैं (प्रजापतिदास दैवज्ञ) इस ग्रन्थ को प्रस्तुत करता हूँ ॥ ३ ॥

विद्वानों से आग्रह—

वराहकृतसूत्रेण यत्किञ्चित्क्रियते मया ।
ज्योतिर्विदः प्रपश्यन्तु ग्रहाणां सुविचारतः ॥ ४ ॥

अन्वयः—वराहमिहिर कृतसूत्रेण यत्किञ्चित् मया क्रियते, ज्योतिर्विदः ग्रहाणां सुविचारतः प्रपश्यन्तु ॥ ४ ॥

संस्कृतः—मया वराहकृतसूत्रेण वराहमिहिराचार्योक्तसूत्राणामनुसारेण यत्किञ्चित् क्रियते तच्च ज्योतिर्विदो ज्योतिः शास्त्रज्ञा ग्रहाणां सुविचारतः सम्यग्विचारपूर्वकेण प्रपश्यन्तु विलोकयन्तु ॥ ४ ॥

हिन्दी—वराहमिहिर कृत सूत्र के अनुसार जो कुछ इस ग्रन्थ में लिखता हूँ उसे ज्योतिषशास्त्रज्ञ ग्रहों के सम्यक विचार (बालारिष्ट, आयुर्दाय एवं त्रिपताकी द्वारा निरूपित शुभाशुभ विचार) द्वारा उन सभी फलों को देखें ॥ ४ ॥

ग्रन्थ प्रयोजन—

पञ्चस्वराभिधानं च ग्रन्थे निधनसंश्रयम् ।
किञ्चिदुद्देशगम्यं च स्वल्पं वक्ष्यामि शास्वतम् ॥ ५ ॥
ज्योतिर्विद्भिः पुरा सर्वैः कृतो निर्णय विस्तरः ।
तन्वादि व्ययपर्यन्तं राशिचक्रे व्यवस्थितम् ॥ ६ ॥
अपाश्यमरणं जीवं प्रपश्यन्ति शुभाशुभम् ।
मरिष्यति यदा दैवात्कोभुङ्क्ते तच्छुभाशुभम् ॥ ७ ॥
तस्मात्सर्व प्रयत्नेन आयुः स्थानं विचिन्तयेत् ।
बालस्य जन्ममात्रेण जन्मारिष्टं विचारयेत् ॥ ८ ॥

अन्वयः—पञ्चस्वराभिधानं ग्रन्थं निधन संश्रयं किञ्चिदुद्देशगम्यं स्वल्पं शास्वतं च वक्ष्यामि ।

पुरा सर्वेः ज्योतिर्विद्भिः राशिचक्रे तन्वादिव्यय पर्यन्तं व्यवस्थितं विस्तरः निर्णयः कृतः ।

जीवं मरणं अपास्य शुभाशुभं प्रपश्यन्ति, यदा दैवात् (सः) मरिष्यति (तदा) को (फलं) भुङ्क्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मात् सर्वप्रयत्नेन आयुः स्थानं विचिन्तयेत्, बालस्य जन्ममात्रेण जन्मारिष्टं विचिन्तयेत् ॥ ५–८ ॥

संस्कृतः—अहं पञ्चस्वराभिधानं पञ्चस्वराख्यं ग्रन्थं स्वल्पं लघुरूपं पुनः किञ्चिदुद्देशगम्यं गुरोः किञ्चिच्छ्रवणं च कृत्वा वक्ष्यामि । तं कथम्भूतं निधन-सश्रयं निधनस्य मरणस्याश्रयो यस्मिनर्थान्मरणनिर्णयरूपम् ॥ ५ ॥

पुरा पूर्वस्मिन् समये सर्वैर्ज्योतिःशास्त्रविद्भिः ज्योतिशास्त्रज्ञैस्तु राशिचक्रे राशिसमूहे व्यवस्थितं स्थापितं तन्वादिव्ययपर्यन्तं लग्नादिद्वादशभावावधिकं यथा स्यात्तथा निर्णयविस्तरस्तज्जनितशुभाशुभफलकथनाधिकः कृतः। अर्थात्तन्निर्मितिषु ग्रन्थेषु केवलं लग्नादिद्वादशभावानां फलमेवस्थितमिति ॥ ६ ॥

तत्र लग्नादिभावपरामर्शे ते गणका मरणं जीवनं चापाश्य विहाय शुभाशुभं प्रपश्यन्ति वदन्ति । यदा दैवाददिष्टवशाज्जातको मरिष्यति तदा तच्छुभाशुभं तद्विहितं शुभाशुभफलं को भुङ्क्ते किन्तु तल्लग्नोत्पन्ननरस्याभावात्तदुक्ताव्यर्थमेवजातम् । अनेन तन्मतं दूषितमिति ॥ ७ ॥

तस्मात्कारणात्सर्वप्रयत्नेनायुःस्थानं मृत्युनिर्णयरूपस्थानं गणको विचारयेत् । अनेन ग्रन्थप्रयोजनकथनं जातम् । बालस्योत्पन्नस्य जन्ममात्रेण जन्मसमयावगममात्रेण जन्मारिष्टं जन्मसमयोद्भवमरिष्टं विचारयेत् ॥ ८ ॥

हिन्दी—जिस ग्रन्थ से मृत्यु का निश्चित ज्ञान होता है उस लघु पञ्चस्वरा ग्रन्थ को गुरू से ज्ञान प्राप्त करके कहता हूँ ।

प्राचीन ज्योतिर्विदों ने द्वादश भावों का विचार विस्तार पूर्वक किया है । परन्तु वे सभी लोग जीवन मरण के विचारों को छोड़कर शुभाशुभ फलों का ही विचार किये हैं । यदि दुर्योगवश जातक की मृत्यु हो जाय तो शुभा-शुभ फलों का उपभोग कौन करेगा इसलिये यत्नपूर्वक आयु का विचार करना चाहिए। बालक के जन्म के बाद से ही अरिष्टादि का विचार करना चाहिये ॥ ५–८ ॥

स्वमतानुसार अरिष्ट प्रमाण—

चतुर्विंशति वर्षाणि यावद्गच्छन्ति जन्मतः ।
तावद्रिष्टं च निश्चित्य आयुर्दायं न चिन्तयेत् ॥ ९ ॥

अन्वयः—जन्मतः चतुर्विंशति वर्षाणि यावद् गच्छन्ति तावद् रिष्टं निश्चित्य आयुर्दायं च न चिन्तयेत् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—तत्रादौ जन्मतो जन्मसमयाच्चतुर्विंशतिवर्षाणि यावद्गच्छन्ति प्राप्नुवन्ति तावद्रिष्टं तावत्कालपर्यन्तमरिष्टं अर्थात् जन्मकालादारभ्य चतुर्विंशतिवर्षपर्यन्तं तदरिष्टं निश्चित्य सुष्ठुरूपेणावगम्य कथयेत् । तत्रायुर्दायं वक्ष्यमाणां न चिन्तयेत् । अनेन स्वाभिमतारिष्टप्रमाणस्य कथनं जातम् ॥ ९ ॥

हिन्दी—जन्म से प्रारम्भ कर (२४) चौबीस वर्ष पर्यन्त अरिष्ट का विचार करना चाहिए । इसके अन्तर्गत जातक के आयु का विचार नहीं करना चाहिए ॥ ९ ॥

मतान्तर से अरिष्ट प्रमाण—

नव नेत्राणि वर्षाणि यावद् गच्छन्ति जन्मतः ।
तावद्रिष्टं विधातव्यं गुप्तरूपं न चान्यथा ॥ १० ॥

अन्वयः—जन्मतः नवनेत्राणि वर्षाणि यावत् तावत् रिष्टं गुप्तरूपं गच्छन्ति, अन्यथा च न (रिष्टं) विधातव्यम् ॥ १० ॥

संस्कृतः—जन्मतो यावन्नवनेत्राणि उनत्रिंशतिमितानि वर्षाणि गच्छन्ति प्राप्नुवन्ति तावद्गुप्तरूपं दुर्जनादिनरस्यादेयमरिष्टं विधातव्यं विचारणीयम् । अन्यथा नवनेत्रमिद्वर्षादनन्तरं तन्न विचारणीयम् । अनेन मतान्तरं प्रदर्शितम् ॥ १० ॥

हिन्दी—जन्म से २९ वर्ष तक गुप्त रूप से अरिष्ट विचार करना चाहिये इसके बीच कभी भी वक्ष्यमाण रीति से आयु का विचार नहीं करना चाहिये । (अन्य ग्रन्थों में १२ वर्ष तक ही अरिष्ट कहा गया है) ॥ १० ॥

अरिष्टनिर्णय हेतु त्रिपताकी चक्र निर्माण—

उर्ध्वं रेखा त्रयं लेख्यं तिर्यग्रेखात्रयं तथा ।
वेधस्तिर्यक् क्रमाज्ज्ञेयो द्वाभ्यां द्वाभ्यां परस्परम् ॥ ११ ॥
षड्रेखास्तु समालिख्य पताकी वेधनिर्णये ।
रव्यादिग्रहदानेन जन्मारिष्टं विधीयते ॥ १२ ॥

अन्वयः—उर्ध्वं त्रयं रेखा तथा तिर्यग् त्रयं रेखा लेख्यं, द्वाभ्यां द्वाभ्यां क्रमात् परस्परं तिर्यक् वेधः ज्ञेयः ।

षड्रेखाः तु समालिख्य रव्यादि ग्रहदानेन पताकी वेधनिर्णये जन्मारिष्टं विधीयते ॥ ११–१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—गणकेन रेखात्रयं ऊर्ध्वं पूर्वापरं तथा रेखात्रयं तिर्यक् याम्योत्तररुपं लेख्यम् । तदग्रे द्वाभ्यां द्वाभ्यां रेखाभ्यां परस्परं तिर्यक्क्रमात्कर्णाकार-सूत्रगतक्रमादर्थादाग्नेयादिवायव्यान्तास्तथैशानादिनैर्ऋत्यन्ताः षड्रेखाः संलिखेदित्युत्तरेणान्वयः । तत्र वेधो ज्ञेयः । अनेन बालाद्यरिष्टनिर्णयाय त्रिपताकी संज्ञकस्य चक्रस्य स्थापनं कृतम् ॥ ११ ॥

एवं पताकीवेधनिर्णये त्रिपताकीसमाख्यचक्रे वेधनिर्णयाय षड्रेखाः समालिख्य सम्यक् प्रकारेण लिखित्वा रव्यादिग्रहदानेन वक्ष्यमाणसूर्यादिग्रह-स्थापनवशेन जन्मारिष्टं बालारिष्टं ज्योतिःशास्त्रज्ञैर्विधीयते निर्णीयते ॥ १२ ॥

हिन्दी—तीन रेखा परस्पर सम और समानान्तर उर्ध्वाधर लिखकर उन पर तीन रेखा परस्पर समसमानान्तर तिर्यक् लिखें । पुनः दो–दो रेखाओं से परस्पर क्रम से कर्णाकार छः रेखा लिखें, अग्निकोण से वायव्यकोण तक छै एवं ईशान कोण से नैऋत्यकोण तक छै रेखा लिखें इस तरह ३ पूर्वापर ३ याम्योत्तर तथा ६+६ कर्णाकार = १८ रेखाओं से यह त्रिपताकी चक्र बनता है । इस प्रकार त्रिपताकी चक्र बनाकर वक्ष्यमाण रीति से ग्रहों को लिखकर बालारिष्ट का विचार करना चाहिए ॥ ११–१२ ॥

त्रिपताकी चक्र



त्रिपताकी चक्र में ग्रहादि स्थापन—

ग्रहदानविचारे तु अन्त्ये मेषं विनिर्दिशेत् ।
वेदादिष्वङ्कदानेषु मध्ये मेषं पुनर्लिखेत्॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलशाद्द्वन्दपर्यन्तमङ्कदानं सुनिश्चितम् ।
उच्चादिस्थानगानां च रव्यादीनां यथाक्रमम् ॥ १४ ॥

अन्वयः—ग्रहदानविचारे तु मेषं अन्त्ये विनिर्दिशेत् पुनर्वेदादिषु अङ्कदानेषु मेषं मध्ये लिखेत् ।

कलशात् द्वन्दपर्यन्तं अङ्कदानं सुनिश्चितं रव्यादीनां उच्चादिस्थानगानां च यथाक्रमम् ॥ १३–१४ ॥

संस्कृतः—ग्रहदानविचारे रव्यादिग्रहाणां स्थापनकाले मेषं मेषराशि अन्त्ये अन्त्यरेखायां विनिर्दिशेत् लिखेत् । अर्थात्पूर्वं विहितपूर्वापररूपस्य रेखात्रयस्य मध्ये याम्यरेखाग्रादारभ्याजाद्या द्वादशराशयो देयाः । पुनर्वेदादिषु अङ्कदानेषु वक्ष्यमाणानां वेदाद्यङ्कानां स्थापनकाले मेषं मेषराशि मध्ये मध्यरेखायां लिखेत् । अर्थात्कृतपूर्वापररेखात्रयस्य मध्ये मध्यस्थितरेखाग्रादारभ्य मेषाद्या द्वादश राशयः स्थाप्याः । अत्र त्रिपताकीसमाख्ये चक्रे ग्रहस्थापने तथाङ्कस्थापने च राशि स्थापनं प्रदर्शितमिति ॥ १३ ॥

कलशात्कुम्भराशेर्द्वन्द्वपर्यन्तं मिथुनराशिपर्यन्तं प्राचीनैरङ्कदानं वक्ष्यमाणाङ्कानां स्थापनं सुनिश्चितं विनीर्णीतम् । ततो रव्यादीनां ग्रहाणामुच्चादिस्थानगानां स्वोच्चसमनीचस्थानां यथाक्रमं क्रममनतिक्रम्य चेति कृतम् । अत्रायं फलितार्थः । स्वोच्चगृहगतखेटस्याङ्कस्थापने स्थानत्रयाङ्कमितियोगेन समा दिनसङ्ख्या तथा समस्थानगतग्रहस्य समीपस्थस्थानद्वयाङ्कयोगेन तुल्या मासमितिः । एवं नीचस्थानगतस्य खेटस्य केवलं स्वस्थानाङ्कमिता वर्षमितिः स्यादिति बोध्यम् । परमेवं शुभखेटजनितवेधे । पापखेटजवेधे तु कथितप्रकाराद्विपरीतं भवेत् ।

तदुक्तम्—

'ग्रहाणां बलान्निर्द्दिशेदेतदुक्तमसत्खेचरे पुष्टमध्याल्पवीर्ये ।
द्युमासाब्दसंख्या विलोमेन सौम्यैः शुभस्थानयोगेक्षणाद्यैः समास्तु' ॥
असत्खेटयोगेक्षणाद्यैर्दिनानि विमिश्रैस्तु मासा बलात्तारतम्यादिति ॥१४॥

हिन्दी—ग्रह स्थापन में प्रथम पूर्वापर रेखा के अन्त्य (दक्षिण) रेखाग्र से मेषादि राशियों की स्थापना होती है । पन्द्रहवें श्लोक में उक्त ''वेदादि'' अङ्कों की स्थापना के लिये पूर्वापर रेखा में से मध्य वाली-रेखा से मेषादि राशियों की

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थापना की जाती है। प्राचीनाचार्यों ने अङ्कस्थापन को कुम्भ से लेकर सव्यक्रम से मिथुन-पर्यन्त ही माना है अर्थात् अङ्कदान में मीन-मेष-वृष ये तीन राशियाँ अङ्कों से विहीन हैं, तथा सूर्यादि ग्रहों के स्थापन में उच्च सम-नीच स्थान के क्रम से वक्ष्यमाण प्रकार से तीन-दो-एक स्थान के योग से दिनादि का निश्चय किया जाता है ॥ १३–१४ ॥

राशिचक्र में अङ्कस्थापन—

वेदपञ्चनखान्दत्वा बह्न्यष्ट समयं तथा ।
भुवनं युगलञ्चैव दश देयास्तथैव च ॥ १५ ॥

अन्वयः—वेद पञ्चनखान् तथा बह्न्यष्टसमयं च दत्वा भुवनं युगलं दश चैव तथैव देयाः ॥ १५ ॥

संस्कृतः—वेदपञ्चनखान् तथा वह्न्यष्टसमयं दत्वा तथैव भुवनं चतुर्दश-सङ्ख्याकं युगलं द्विमितं दश चैते अङ्का देयाः स्थाप्याः कलशाद्द्वन्द्वावधि । अत्रायं भावः । कलशाद्विलोमगणनया मिथुनपर्यन्तं याम्योत्तराख्यस्य तथा कर्णाकाराख्यस्याधःस्थस्यार्थाल्लाङ्गलाख्य च वेधक्रमेण पूर्वोक्ताङ्का वेदाद्या यथाक्रमं स्थाप्याः । तद्यथा । अंकस्थापनचक्रे मध्यरेखाग्रगं मेषराशिमारभ्य पूर्वरूपगणनया वह्निकोणाग्रगं कुम्भराशिं च प्रकल्प्योच्यते । कुम्भराशौ चतुः सङ्ख्याकं तत्सम्मुखेऽर्थाद्याम्योतररूपवेधे मिथुनराशौ पञ्च तथा कुम्भराशे-रधःस्थकर्णाकारवेधे कन्याराशौ विंशतिमितम् । एवं उत्क्रमगणनया तत्पृष्ठ-भागे मकरराशौ त्रिसंख्याकं ततस्तद्याम्योत्तररुपवेधे कर्कराशौ चाष्ट संख्याकं तथा तदधःस्थवेधे तुलाराशौ रसमितम् । एवं धनुषिराशौ चतुर्दशमितं तथा तत्सम्मुखवेधे सिंहराशौ द्विमितं पुनस्तदधः स्थे वृश्चिकराशौ दशमितमेवेति लेख्यम् । तत्रापि मीनमेषवृषराशीनमेवमङ्काभावो जातः । यतो वक्ष्यमाण-विधिना कस्यापि राशे कथितेन राशित्रयेण सार्धं वेधो नास्ति किन्तु तद्राशि-त्रयगतग्रहस्य चान्यराशिगतैर्वेधो भवेत् ।

अन्यमतः—

वेदवह्नीन्द्रदिक्तर्क नखबाहुगजाः शराः ।
अङ्काः देयाः क्रमादेते कलशादौ विपर्ययात् ॥

अस्यार्थस्तु कलशात्कुम्भाद्विपर्ययात्पृष्ठभागस्थराशीनां क्रमात् वेदव-ह्नीन्द्रदिकतर्कनखबाहुगजास्तथा शराश्चैते अङ्काः स्वसङ्ख्यामाप्तिं यावदर्था-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मिथुनराशिपर्यन्तं देयाः स्थाप्याः । यथा कुम्भे चतुः सङ्ख्याकमङ्कं ततो मकरे त्रिमितम् । तथा धनुषि चतुर्दशमितमिति विधिना मिथुने शरमितम् ॥ १५ ॥

हिन्दी—पूर्व में उक्त "कलशाद्वन्दपर्यन्तमङ्कदानं" के अङ्कों को लाङ्गल चक्र रीति से चार-पाँच-बीस तथा तीन-आठ-छै और चौदह-दो-दश संख्या का स्थापन करें । स्पष्टार्थ त्रिपताकी चक्र तथा लाङ्गलचक्र आगे देखें ।

उन्हीं संख्याओं को अन्याचार्यों के प्रमाण द्वारा पुष्ट करते हैं कि कुम्भ से विलोम क्रम से मिथुन राशि पर्यन्त क्रमशः ४।३।१४।१०।६।२०।२।८।५ अङ्कों को स्थापित करना चाहिए ॥ १५ ॥

अन्य मतानुसार ग्रहस्थापन में राशियों के अङ्क—

पञ्चाष्टयुग्मविंशाश्च षट्दशेन्द्राग्निसागराः ।
कर्कटान्मीनपर्यन्तमङ्कदानं सुनिश्चितम् ॥ १६ ॥

अन्वयः—पञ्चाष्टयुग्मविंशाः षट् दशेन्द्राग्नि सागराः च कर्कटात् मीन पर्यन्तं अङ्कदानं सुनिश्चितम् ॥ १६ ॥

संस्कृतः—पञ्चाष्टयुग्मविंशास्तथा षट्दशेन्द्राग्निसागरा एते अङ्काः कर्कटात्कर्कराशिमारभ्य क्रमगणनया मीनपर्यन्तं मीनराश्यवधिकं देया इत्यङ्कदानं सुनिश्चितं कथितं प्राचीनैरिति शेषः । अत्रेदमवधेयम् । ग्रहस्थापन-चक्रपक्षे चान्त्ये पूर्वापराख्यरेखायां मेषराशिमारभ्य द्वादश राशयो निवेशिताः सन्ति । अतोङ्कस्थापनचक्रे यत्र कुम्भराशिस्तत्रैव ग्रहस्थापन चक्रे मीनराशिः तथा यत्रमिथुनराशिस्तत्रैवात्र कर्कराशिः एवं सर्वत्र बोध्यम् । तेनात्र कर्क-राशौ पञ्च ततः सिंहराशावष्टौ तथा कन्याराशौ विंशतिः । एवं मीने वेदमितं जातम् । एवं चक्रद्वयवशादपि स्वस्वरेखाग्रेषु चाङ्कप्रमाणमेकमेव जातम् ।

अत्र मदीय (कृष्णदत्तीय) सूत्रम्—

शून्यं वियदव्योमसमं शराश्च नागाश्च नेत्रं नखसम्मिता वै ।
रसाः खचन्द्राः खलु शक्रतुल्या रामाश्चवेदा अजतोत्र बोध्याः ॥

आद्यं चरादित्रयमन्तरेण चरे शरा विंशतिरत्र शक्राः ।
स्थिरे गजाः षट्किल रामतुल्या युग्मं खचन्द्रा निगमास्तथान्त्ये ॥

अत्र ग्रहस्थापनचक्रे मेषादेते चाङ्का ज्ञेयाः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाङ्गलचक्रम्



हिन्दी—अन्य आचार्यों ने ग्रह स्थापन में क्रमशः कर्क से मीन पर्यन्त राशियों में ५।८।२।२०।६।१०।१४।३।४ अङ्कों की स्थापना की है । अर्थात् अङ्कस्थापनचक्र में जहाँ कुम्भराशि है वहाँ ग्रहस्थापन चक्र में मीन और जहाँ मिथुनराशि है वहाँ कर्क । जो चक्र से स्पष्ट है ॥ १६ ॥

वेध प्रकार—

मेषादिनामचिह्नानि ग्रहयुक्तानि कारयेत् ।
एकरेखास्थिते खेटे त्रितये वेध निश्चयः ॥ १७ ॥
लग्ने वा दक्षिणे वामे सम्मुखे ग्रहसंस्थिते ।
दण्डे ज्ञेयं शिशोरिष्टं दिनं मासञ्च हायनम् ॥ १८ ॥

अन्वयः—ग्रहयुक्तानि मेषादि नाम चिह्नानि कारयेत्, एक रेखास्थिते खेटे त्रितये वेध निश्चयः ॥

लग्ने–दक्षिणे वामे सम्मुखं वा ग्रहसंस्थिते दण्डे शिशोः दिनं मासं हायनं चारिष्टं ज्ञेयम् ॥ १७–१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—ग्रहयुक्तानि ग्रहसहितानि मेषादिनामचिह्नानि मेषादीनां राशीनां नामाक्षरैश्चिह्नानि कारयेद्गणक इति शेषः । अयमत्रफलितार्थः । जन्म कालिका ग्रहा यत्र यत्र राशौ वर्त्तन्ते ते राशयोप्यत्रत्रिपताकीचक्रे यत्र यत्र स्थितास्तत्र तत्र ते खेटास्तथा जन्मकालिकं लग्नञ्चेति स्थाप्यम् ।

अत्रैकरेखास्थिते खेटे ग्रहे सति त्रितये स्थानत्रयेपि वेधनिश्चयः किन्तु तत्र वेधनिर्णयो बोध्यः ।

अत्रोदाहरणम् । तद्यथा । तत्र (अक) (गख) (इउ) इति रेखात्रयं पूर्वापररूपम् । तथा (अक) (गख) (इउ) इति याम्योत्तरं रेखात्रयम् । एवं (कक) (खख) (उउ) (कइ) (खग) (उअ) (इइ) (गग) (अअ) (अउ) (गख) (इक) इति कर्णाकारं द्वादश सङ्ख्याकं रेखाप्रमाणं च विधाय तदा जातं त्रिपताकीचक्रस्वरूपम् ।

त्रिपताकीचक्रम्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र ग्रहस्थापनापेक्षया (इउ) पूर्वापरपरूपाया अन्त्यरेखायाः (इ) चिन्होर्ध्वे शृङ्गाग्रे मेषराशिमारभ्य स्वस्वाद्यक्षरोपलक्षिताः पूर्वाभिमुखगणनया द्वादश राशयो देयाः । अत्रैवमङ्कस्थापनचक्रपक्षे (गख) पूर्वापरायां मध्य-रेखायां स्वरविशिष्टं मेषराशिमारभ्य क्रमगणनया स्वरविशिष्टाः स्वस्वाद्यक्ष-रोपलक्षिता द्वादश राशयः स्थाप्याः । अथाङ्कस्थापनमुच्यते । तत्राङ्क स्थापना-जादिवशात् (क) स्वरविशिष्टे कुम्भराशौ चत्वारः । तस्य सम्मुखे याम्योत्तरसूत्रे (अ) बिन्दौ स्वरविशिष्टमिथुनराशौपञ्च । एवं तत्कुम्भराशेरधःस्थे कर्णाकार-सूत्रे (क) चिह्ने कन्याराशौ विंशतिः एवं तन्मकरराशौ वह्निमितं तथा तद्याम्योत्तरसूत्रे (गं) बिन्दौ तत्कीटराशौ चाष्टौ । तथा तत्कर्णाकारसूत्रे तदधःस्थे तुलाराशौ षट्सङ्ख्याकमङ्कम् एवं धनुषि चतुर्दश । तथा तद्याम्योत्तरसूत्रे (इ) चिन्हे तत्सिंहे द्विकम् । तथा तदधःस्थे कर्णाकारसूत्रे (उ) समाख्यचिन्हे वृश्चिकराशौ दशचेति स्थाप्यम् । तथामीने मेषे वृषे चाङ्कानां पठिताभावात्तत्स्थान त्रये शून्यानि बोध्यानि । अथवा विहितमदीयसूत्रानुसारेण ग्रहस्थापनपक्षे मेष-मारभ्य मीनपर्यन्त 'शून्यं वियदव्योमसममित्याद्यङ्काः वा' आद्यञ्चरादित्रय-मन्तरेण इति सूत्रोक्ता अङ्काः क्रमात्स्थाप्याः ॥ १७ ॥

लग्न इत्यत्र पञ्चम्यर्थे सप्तमी स्यात्तेन लग्नादर्थाज्जातकजन्मकालिक-लग्नाद् दक्षिणे किन्तु दक्षिणदिग्गततिर्यग्रेखाग्रदण्डे ग्रहे सति वा वामे वाम-गततिर्यग्रेखाग्रदण्डे तथा सम्मुखे सम्मुखगतरेखाग्रदण्डे वेधो वेधविचारो ज्ञेयः । तत्र वेधे शिशोर्बालस्य दिनं मासं तथा हायनं वर्षं चारिष्टं ज्ञेयमिति । अत्रेदमवधेयम् । पूर्वोक्तप्रकारेण त्रिपताकीसमाख्यं चक्रं विधाय ततः खेट-स्थापनमेवादिराशिवशात् जन्मकालिकं लग्नं देयं तद्यत्र राशौ भवेत्तस्मादेव वेधविचारः कर्त्तव्यः । तत्र जन्मकालिकात् खेटाच्च दत्वादक्षिणादिवेधत्रित-येपि जन्मलग्नस्य यद्दण्डगतखेटेन सह वेधो भवेत्तद्दण्डस्थिताङ्कं पूर्वविहितं चाङ्कस्थापनचक्रादवगम्य ग्रहस्थापन चक्रे तत्र दण्डे तदङ्कमानं लेख्यम् । ततस्तदङ्कतुल्ये वर्षे मासेवा दिने बालस्यारिष्टं भवेत् तत्रापि वेधे जाते वक्ष्य-माणविधिना दण्डेशे पापे सति तदा याम्य दण्डगतपापग्रहवेधस्थितदण्डाङ्क-प्रमाणेन निधनम् । एवं दक्षिणवेधाभावे जाते सति वामदण्डस्थपापग्रहवेध-स्थाननिष्ठाङ्कमानेन निधनम् । एवं तद्द्वयस्यार्थाद्याम्यवामाख्यदण्डस्य यदा वेधाभावस्तदा सम्मुखदण्डगतपापखेटजवेधस्थानगताङ्कप्रमाणेन मरणम् । एवं यदा जन्मलग्नस्य वामदक्षिणसम्मुखस्थैः पापैः सह वेधत्रयं जातं तदा तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेधकारकाणां खेटानां मध्ये वक्ष्यमाणविधिना यः खेटोऽधिकबलवान् तद्-गतदण्डस्थिताङ्कप्रमाणेन मरणं विधेयम् ।

तथाऽत्र विश्वेश्वरः—

'जन्मलग्ने यदा वेधः पापदण्डे मृतिर्वदेत् ।
दक्षवामाग्रमानेन पूर्वाभावे परं विदुः ॥
यदा वेधस्त्रयाणाञ्च जन्मलग्नेऽशुभग्रहे ।
प्राप्तिस्तत्र बलाधिक्याद्वामदक्षिणसम्मुखैः ॥

एवं वेधत्रयाभावस्तदा जन्मलग्नात्क्रूरग्रहा क्रमेण क्रूरग्रहस्थानाङ्क-सङ्ख्यामानेनार्थाज्जन्मलग्नगतदंडाङ्कप्रमाणेन निधनं स्यात् । अत्र मेषादित्रये राशौ पूर्वरीत्या चाङ्काभावादत्र जन्मलग्ने कथं वेधो भवेत् । तदुच्यते । कथित-वेधत्रयाभावे सति मेषादित्रये राशौ जन्मलग्नञ्च तत्र पापग्रहस्थितिस्तदा तद्दक्षिणवामाभिमुखस्थानगानामङ्कानां त्रयाणां योगप्रमाणेन मरणम् ।

तदुक्तं वराहेण—

अभावे सर्ववेधानां क्रूराक्रमेणतो वदेत् ।
मेषादित्रितये बोध्यं मानं वामाग्रदक्षिणैः ॥

एवमत्र दक्षिणदण्डगतः तथा वामदण्डगतः । तत्सम्मुखदण्डनिष्ठः । जन्मलग्नगतः । इति चतुर्धा वेधो जातः । अत्रैव निधनसमयावबोधं प्रकारा-न्तरेण वदति ।

चलवर्षे यदा वेधो दण्डेशः पापसम्भवः ।
तदा मृत्युर्भवेन्नूनमन्यथा कष्टमादिशेत् ॥

यदा जन्मकाले दण्डेशः स्वयं पापस्तदा वक्ष्यमाणोक्ते चलवर्षे मासे च वेधे सति नूनमवश्यं मृत्युर्भवेत् । अन्यथा दण्डेशस्य शुभत्वरूपे कष्टं कष्टमात्रं चादिशेत्कथयेदित्यर्थः ॥ १८ ॥

हिन्दी—पूर्वोक्त विधि से त्रिपताकी चक्र बनाकर मेषादि राशियों की स्थापना कर जन्मसमय में जो-जो ग्रह जिस-जिस राशि में हों उनको उन-उन राशियों में स्थापित करें । एक रेखा में स्थित ग्रह से तीन स्थानों में अर्थात् ग्रह से दक्षिण और वामगत तिर्यक रेखा में तथा सम्मुखगत रेखा में स्थित ग्रहों से वेध होता है ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा जन्मलग्न से दक्षिण-वाम तथा सम्मुख रेखागत ग्रह हों तो (आगे ४४ या ४५ श्लोक 'सबलेऽत्र ग्रहे पापे दिनमात्रं विधीयते' इत्यादि के अनुसार) विद्वान् को बालक के अरिष्ट का निश्चय करना चाहिए। अर्थात् इतने वर्ष-माह-दिन पर अरिष्टादि होगा इसका निर्धारण करना चाहिए ॥ १७–१८ ॥

छात्रों के ज्ञानार्थपुनः वेधकथन—

कर्के धनुषि मीने च हरिकीटघटेषु च।
कन्यामकर यूकेषु तुलामीनाङ्गनासु च ॥ १९ ॥
वृश्चिके घटसिंहे च धनुर्मकरकर्कटे।
मकरे च धनुः कन्ये घटे सिंहे च वृश्चिके ॥ २० ॥
मीने च कर्कटे यूके मेषकन्याधनुर्झषे।
वृषे सिंहे च कुम्भे च वृश्चिके च विनिर्दिशेत् ॥ २१ ॥
तुलामकरकर्केषु वेधं चैवं यथाक्रमम्।
यथा योगं यथान्यायं यथा भागं विनिर्दिशेत् ॥ २२ ॥

अन्वयः—कर्के धनुषि मीने च हरि कीट घटेषु च कन्या मकर यूकेषु (तुला) तुलामीनाङ्गनासु च।

वृश्चिके घट सिंहे च धनु–मकर कर्कटे मकरे च धनुः कन्ये घटे सिंहे च। वृश्चिके मीने च कर्कटे यूके मेष कन्या धनुः झषे वृषे सिंहे कुम्भे वृश्चिके च विनिर्दिशेत्।

तुलामकरकर्केषु एवं वेधं च यथाक्रमम् यथायोगं यथान्यायं यथा भागं च विनिर्दिशेत् ॥ १९–२२ ॥

संस्कृतः—अथ पूर्वन्तु ग्रहस्थापनचक्रे चान्त्यशृङ्गाग्रे मेषराशिमारभ्य द्वादश राशयो निवेशितास्तेनात्र तदभिप्रायेण कीटादिग्रहवेधं दर्शयति। तत्र कर्के कर्कराशौ धनुषि मीने मीनराशौ च खेटे सति मिथो वेधो जायते। यतः कर्कात्सम्मुखे मीनराशिस्तथा कर्णाकारसूत्रश्चापराशिः स्यादिति विहितचक्रे स्पष्टमेवातो वेधो विहितः। परञ्च कर्कराशेः कर्णाकारसूत्रे (अ) रूपे मिथुन-राशि वर्त्तते तथापि तस्य मिथुनेन सह वेधो न विहितो मेषादिराशित्रयेणान्येषां वेधाभावस्वीकारागमवशात्। एवमन्यवेधोऽपि बोध्यः। तद्यथा—हरौ सिंह-राशौ, कीटे वृश्चिकराशौ, घटे कुम्भराशौ च वेधः। तथा कन्याराशौ मकर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राशौ यूके तुलाराशौ च वेधः । एवं तुलामीनाङ्गनासु वेधः किन्तु तुलाराशौ मीनराशौ कन्याराशौ चैकत्र खेटे चान्यतमेजन्मलग्ने वेधः ॥ १९ ॥

छात्राणां बोधजननार्थं पुनः सर्वराशिगतवेधान् दर्शयति । वृश्चिके ग्रहे सति कुम्भसिंहयोर्वेधः । तथा धनुषि ग्रहे सति मकरकर्कटयोर्वेधः । मकर-राशौ खेटे सति धनुः कन्याराश्योर्वेधः । तथा घटे कुम्भराशौ ग्रहे सति सिंह-वृश्चिकराश्योर्यत्र जन्मलग्नं तत्र वेधो जायते ॥ २० ॥

मीनराशौ खेटे सति कर्कटे कर्कराशौ यूके तुलाराशौ च वेधः । मेष-राशौ जन्मलग्ने सति कन्याधनुर्झषानां राशीनां गतखेटानां दक्षिणाभिमुख-वामाभिधक्रमाद्वेधः । एवं वृषे जन्मलग्ने सति सिंहे दक्षिणाख्यस्तथा वृश्चिक सम्मुखाख्यस्तथा कुम्भे वामाख्यो वेधः स्यादिति विनिर्दिशेत्कथयेत् । एवं कर्कादिमीनपर्यन्तं चान्यतमे जन्मलग्ने सति द्वयोर्द्वयोराश्योर्गतानां खेटानां वेधः प्रदर्शितः ॥ २१ ॥

एवं तुलामकरकर्केषु यथाक्रमं वेधं वदेत् । परञ्चायं वेधः पूर्वापररूपायां मध्यरेखायां मेषस्थापनवशाद्यत्पूर्वं चाङ्कस्थापनचक्रं प्रतिपादितं तदधिकृत्य प्रदर्शितः । तत्र यथायोगं जन्मलग्ने दक्षाभिमुखवामाख्यवेधवशात् । यथान्यायं रव्यादिखेटानां स्वोच्च नीचवक्रादिवशात् । यथा भागं वर्षमासदिनानाञ्चाङ्क-मानवशाद्बालारिष्टं विनिर्दिशेद्वदेत् ॥ २२ ॥

हिन्दी—त्रिपताकी चक्र में यदि कर्क राशि में ग्रह या जन्मलग्न हो तो उसका धनु और मीन राशि में स्थित ग्रहों से वेध होता है क्योंकि कर्क से सम्मुख मीन राशि तथा कर्णाकार धनुराशि स्थित रहता है । अतः **कर्क-धनु** और **मीन** का परस्पर वेध होता है । कर्क से कर्णाकार मिथुन भी है परन्तु मेषादि तीन राशियों से अन्य राशियों का वेधाभाव-आगम से स्वीकृत है इसलिए मिथुन का पाठ न लिखकर 'कर्के धनुषि मीने' ऐसा पठित है । उसी प्रकार सभी राशियों का वेध पठित है जैसे **सिंह** राशिस्थ ग्रह का **वृश्चिक-कुम्भ** से, तथा **कन्या** राशि का **मकर-तुला** से **तुला** राशि का **मीन-कन्या** से, **वृश्चिक** राशि का **कुम्भ-सिंह** से, **धनु** राशि का **मकर-कर्क** से, **मकर** राशि का **धनु-कन्या** से, **कुम्भ** राशि का **सिंह-वृश्चिक** से, **मीन** राशि का **कर्क-तुला** से तथा **मेष** का **कन्या-धनु** और **मीन** राशि से वेध होता है । मेष राशि जन्मलग्न हो तो **कन्या** राशि से दक्षिण वेध, **धनु** राशि से सम्मुख वेध तथा **मीन** राशि से वाम वेध होता है । इसी तरह वृष का **सिंह-वृश्चिक** और **कुम्भ**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राशि से क्रमशः दक्षिण-सम्मुख और वाम वेध होता है तथा मिथुन राशि का **तुला-मकर** और **कर्क** राशि से क्रमशः सम्मुख और वाम-दक्षिण वेध होता है। यहाँ यथा योग अर्थात् दक्षिण सम्मुख और वाम वेध यथा न्याय अर्थात् स्वोच्चनीचादि के बलानुसार, 'यथाभाग' अर्थात् वर्ष-मास और दिन के मानानुसार बालारिष्ट होता है ॥ १९-२२ ॥

वेधकथन—

एकोनविंशतिः कर्के सिंहे सप्तदशैव तु ।
षट्त्रिंशदेव कन्यायां तुला षड्विंशतिस्तथा ॥ २३ ॥
वृश्चिके सिंहवज्ज्ञेयं नवयुग्मं धनुर्धरे ।
तुलायां च यथा वर्षं तथैव मकरेपि च ॥ २४ ॥
कुम्भे वृषे यथा सिंहे मीने चैव यथा धनुः ।
मेषे षोडश वर्षाणि मिथुने च नवत्रयम् ॥ २५ ॥
पूर्वं वेदादयो येऽङ्कास्त्रिषु स्थानेषु कीर्तिताः ।
तेऽमी लाङ्गलवेधेऽस्मिनेकीकृत्य प्रकीर्तिताः ॥ २६ ॥
यथाङ्को दृश्यते मासो दिनं वर्षे तथैव च ।
ग्रहाणां च बलं बुध्वा पूर्वोक्तं तु विनिर्दिशेत् ॥ २७ ॥

अन्वयः—कर्के एकोनविंशति सिंहे तु सप्तदशैव कन्यायां षट्त्रिंशदेव तथा षड्विंशतिः ।

वृश्चिके सिंहवत् ज्ञेयं, धनुर्धरे नवयुग्मं, तुलायां च यथा वर्षं मकरेऽपि च तथैव (ज्ञेयं) ।

कुम्भे वृषे यथा सिंहे, यथा धनुः (तथैव) मीने, षोडश वर्षाणि मेषे नवनेत्रकम् मिथुने च ।

पूर्वं त्रिषु स्थानेषु वेदादयो येऽङ्काः कीर्त्तिताः तेऽमी अस्मिन् लाङ्गलवेधे एकीकृत्य प्रकीर्तिताः ।

अङ्को यथा दृश्यते तथैव ग्रहाणां बलं बुध्वा पूर्वोक्तं तु मास दिन वर्षं च विनिर्दिशेत् ॥ २३-२७ ॥

संस्कृतः—अत्रान्त्यशृङ्गाग्रगताजादिस्थापनवशात्त्रिपताकीचक्रे मीना-दितः कर्कराशिपर्यन्तं वेदाद्यङ्कानां स्थापनपक्षे यस्य राशेर्येन येन सह वेधः पूर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदर्शितस्तस्य राश्यङ्कसंख्यायास्तथा वेधजनितराशिस्थिताङ्कसङ्ख्यायाश्च योगसमाः सङ्ख्याः कर्कादितो मीनपर्यन्तमाचार्यैर्विहिताः । यथा कर्कराशेः पूर्वविधिना मीनधनुर्धराभ्यां सह वेधस्तेनात्र कर्कराश्यङ्कस्य पञ्चमितस्य (५) तथा मीनस्थाङ्कस्य वेदमितस्य च (४) तथाधनुर्धरस्थस्य खेन्दुमितस्य (१०) चेति राशित्रयगताङ्कयोगे कृते चैकोनविंशतिः कर्कराशौ जाता । एवं सर्वत्र बोध्यम् । एवं तन्निष्पन्नाङ्कमानं कर्के चैकोनविंशतिः स्यादथदितत्तुल्यमाने पूर्ववद्वर्षादिकल्पनावशाद्बालस्यारिष्टं वक्तव्यम् । एवं सिंहेवेधे सति सप्तदश-सङ्ख्यामाने रिष्टम् । तथा कन्यायां षट्त्रिंशदेवं तुलायां षड्विंशतिः ॥ २३ ॥

एवं वृश्चिके वेधे जाते सिंहवदर्थात्सप्तदशसङ्ख्या तथा धनुर्धरे धनुषि नवयुग्मं स्यादर्थादैकोनत्रिंशदिति । तुलायां यथा वर्षं तथैव मकरे स्यादर्था-त्षड्विंशतिः ॥ २४ ॥

एवं सिंहे यथाङ्कमानं विहितं तथैव तन्मितमेवार्थात्सप्तदशसङ्ख्यैव कुम्भे कुम्भराशौ वृषे वृषराशौ च बोध्या । मीने यथाधनुः किन्तु धनुर्द्धरवदर्था-देकोनत्रिंशन्मिता । मेषे षोडशवर्षाणि मानानि तथा मिथुने तु नवत्रयं एकोन चत्वारिंशत् ॥ २५ ॥

मया पूर्वमङ्कस्थापनचक्रकथने त्रिषु स्थानेषु किन्तु कर्कादितो मीनपर्यन्तं स्वस्थानं तथा दक्षवामाभिमुखस्थानां मध्ये स्थानद्वयं चेति स्थानत्रये तथा मेषवृषमिथुनराशीनां स्वस्थानजानामङ्कानामभावात्तेषां त्रयाणां राशीनां दक्षि-णादिवेधजाते स्थानत्रये ये वेदादयोंकाः कीर्त्तिताः कथितास्तेऽमी सर्वेऽस्मिन् लाङ्गलवेधे चैकीकृत्य तद्योगं कृत्वाऽत्र प्रकीर्त्तिताः ॥ २६ ॥

अङ्क किन्तु स्थानत्रयाङ्को यथा दृश्यते येन प्रकारेणावगतः । तथैव ग्रहाणां वक्ष्यमाणप्रकारेण बलं चकारादबलं बुध्वा पूर्वोक्तं पूर्वकथितं मासं दिनं वर्षं चेति सर्वं विनिर्दिशेत्कथयेद्गणक इति शेषः । अर्थाद्यथाक्रमं प्राप्तेषु मास-दिनवर्षेषु बालस्यारिष्टं जानीयात् ॥ २७ ॥

हिन्दी—त्रिपताकी चक्र में जो अङ्क स्थापित होते हैं उन अङ्कों और ग्रहस्थापन चक्र के अनुसार वेधानयन विधि से कर्कादि राशियों का जो वेधैक्य अङ्क होता है वह इस प्रकार है—कर्क का १९ सिंह का १७ कन्या का ३६ तुला का २६ वृश्चिक का १७ धनु का २९ मकर का २६ कुम्भ का १७ मीन का २९ मेष का १६ वृष का १७ और मिथुन राशि का ३९ है।

पं २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेध चक्र



वेधैक्य चक्र



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्क स्थापन चक्र में जो अङ्क होते हैं उनका पूर्वोक्त वेधानुसार तीन-तीन स्थानों के अङ्कों का योग करके उनके मानों को यहाँ कहा गया है। इस प्रकार जो संख्या आवे उतने दिन-मास-वर्ष पर ग्रहों के बलानुसार बालारिष्ट के समय को निश्चित करना चाहिए।

सुगमता के लिये यहाँ दोनों चक्रों को लिख दिया गया है। मेष-वृष-मिथुन इन तीनों राशियों में स्वस्थान के अङ्काभाव के कारण दक्षिण-सम्मुख और वाम स्थित स्थानों का योग किया गया है जैसे मेष के सम्मुख धनु राशि का अङ्क १० दक्षिण स्थित कन्या का अङ्क २ वाम रेखास्थित मीन का अङ्क ४ तीनों का योग = १६। इसी तरह वृष-मिथुन का क्रमशः १७ और ३९ हुआ।

कर्क स्थानस्थित अङ्क ५ दक्षिण कर्णाकार स्थित अङ्क १० तथा सम्मुख स्थित अङ्क ४ तीनों का योग १९ इसी तरह सिंहादि का क्रमशः १७।३६।२६। १७।२९।२६।१७।२९ हुआ ॥ २३-२७ ॥

ग्रहों की राशि—

कुज शुक्र बुधेन्द्वर्क सौम्य शुक्रावनीभुवाम्।
जीवार्कि भानुजेज्यानां क्षेत्राणि स्युरजादयः॥ २८ ॥

अन्वयः—कुज-शुक्र-बुध-इन्दु-अर्क-सौम्य-शुक्र-अवनीभुवां-जीव-अर्कि-भानुज-इज्यानां अजादि क्षेत्राणि स्युः ॥ २८ ॥

संस्कृतः—दीपिकायामजादित एतेषां ग्रहाणां क्षेत्राणि स्युः । अथैवं ग्रहाणां नैसर्गिकं मित्रादिकं वराहमिहिरादिभिः प्राचीनैरुक्तम्—

'शत्रु मन्दसितौ समश्च शशिजो मित्राणि शेषा रवेः ।
तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ।
जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सितार्की समौ ।
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ।
सूरेः सौम्य सितावरी रविसुतो मध्यो परे त्वन्यथा ।
सौम्यार्की सुहृदौ समौ कुजगुरुशुक्रस्य शेषावरी ।

शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येऽरयः इति यद्विहितं तदेवात्र बोध्यम् । एवं तात्कालिकं मित्रामित्रं 'अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थितास्तत्काले सुहृदः' उक्तातिरिक्तस्थाः शत्रवः । इति तैर्यद्विहितं तदेप्यत्र बोध्यम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी—मेषादि द्वादश राशियों के क्रमशः मङ्गल-शुक्र-बुध-चन्द्र-सूर्य-बुध-शुक्र-मङ्गल-बृहस्पति-शनि-शनि और बृहस्पति स्वामी होते हैं ॥ २८ ॥

ग्रह बल निरूपण—

स्वक्षेत्रस्थे बलं पूर्णं पादोनं मित्रभे स्थिते ।
अर्धं समगृहे ज्ञेयं पादं शत्रु गृहे स्थिते ॥ २९ ॥
एतदुक्तं बलं सौम्ये क्रूरे ज्ञेयं विपर्ययात् ।
शत्रुगेहस्थिते पूर्णं पादोनं समवेश्मनि ॥ ३० ॥
अर्धं मित्रगृहे ज्ञेयं पादं पापे स्ववेश्मनि ।

अन्वयः—स्वक्षेत्रस्थे पूर्णबलं मित्रभे स्थिते पादोनं समगृहे अर्धं शत्रुगृहे स्थिते पादं ज्ञेयम् ।

एतदुक्तं बलं सौम्ये क्रूरे विपर्यात् ज्ञेयं शत्रुगेहस्थिते पूर्णं समवेश्मनि पादोनम् मित्रगृहे अर्द्ध स्ववेश्मनि पादं ज्ञेयम् ॥ २९-३० ॥

संस्कृतः—ग्रहे स्वक्षेत्रस्थे निजगृहगते सति पूर्णं रूपं बलम् । तथा मित्र भे स्वमित्रग्रहस्य राशौ स्थिते खेटे सति पादोनं (४५) बलम् । समगृहे स्वसमग्रहस्य राशौ स्थिते खेटे सत्यर्द्धं (३०) बलम् । शत्रुगृहे स्वशत्रुग्रहस्य राशौ खेटे स्थिते सति पादं (१५) बलं ज्ञेयमिति ॥ २९ ॥

एवममुनाप्रकारेण यद्बलं कथितमेतद्बलं सौम्ये वक्ष्यमाणशुभग्रहविषयकमित्यर्थः । क्रूरे पापग्रहे विपर्ययात्कथितबलविचारस्य विलोमाद्बलं ज्ञेयमिति । तदेव स्पष्टयति–शत्रुगेहस्थिते पापे पापखेटे सति पूर्णं बलम् । तथा समवेश्मनि समग्रहराशौ पादोनं बलम् मित्रगृहे स्थिते पापे सत्यर्द्धं बलम् । तथा स्ववेश्मनि निजगृहे पादं बलमिति ज्ञेयं गणकेनेति शेषः ॥ ३० ॥

हिन्दी—अरिष्टादि साधन हेतु ग्रह बलाबल विचार में यदि शुभ- ग्रह अपने गृह में हो तो पूर्णबल (६० कला) मित्र राशि में हो तो चतुर्थांशोन (४५ कला) समग्रह की राशि में हो तो अर्द्ध (३० कला) तथा शत्रुग्रह की राशि में हो तो (१५ कला) चतुर्थांश बल होता है ।

यह बल शुभग्रह के लिये होता है इससे विपरीत में पापग्रह के बल को समझना चाहिये । जैसे पापग्रह शत्रुराशि का हो तो पूर्ण बल, सम राशि का हो तो पादोन बल मित्रराशि का हो तो अर्धबल और स्वराशि का हो तो चतुर्थांश-बल होता है ॥ २९-३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहों के राशि भोग काल—

भूवर्षे हि बृहस्पतेर्निगदितं सार्द्धद्वयं भास्करेः।
पादं वासरयुग्मकं मृगतनोः पक्षत्रयं भूमिजे॥ ३१ ॥
षड् विंशानि दिनानि दानवगुरोर्द्वाविंशरात्रि बुधे।
षड् मासं ससमामितं बिधुरिपोर्मासं तथा भास्करे॥ ३२ ॥

अन्वयः—बृहस्पतेः हि भूवर्षं निगदितं भास्करिः सार्द्धद्वयं, पादं वासरयुग्मकं मृगतनोः भूमिजे पक्षत्रयं।

दानवगुरोः षड्विंशानि दिनानि बुधेः द्वाविंशरात्रिं विधुरिपोः षड्मासं ससमामितं तथा भास्करे मासं (यावत्) ॥ ३१-३२ ॥

संस्कृतः—अत्राचार्येण बालानां ग्रहसञ्चारज्ञानं झटिति यथा स्यात्तथा मध्यगतिवशात्तत्प्रदर्शितम्। अत्र युक्तिः। तद्यथा। बृहस्पतेर्मध्यमगतिकलामानं सिद्धान्तजं ४।५९।९।९ अत्राल्पान्तराद्व्यवहारार्थं पञ्चकला मितं तद्गतिकलामानं स्वीकृतम्। ततोऽनुपातादेकस्मिन् मासे तच्चलनं खबाणेन्दुमितं कलात्मकं स्यात् (१५०) एतत्षष्टिभक्तं फलं भागात्मकं स्यादिति जातं सार्धद्विभागमितं यदैकमासेनेदं चलनं तदा द्वादशमासैः किमिति। फलमेकस्मिन्नपि वर्षे तच्चलनं स्यादिति रूपं (२।३०) १२ = (२४।३६०) = ३०।० । अतः सिद्धमेकस्मिनर्कवर्षे तच्चलनमेकराशिमितं स्यात्। एवं स्वस्वमध्यमगति वशादन्येषामपि बोध्यम्। तद्यथा—शनेर्द्विवर्षं मासषट्कञ्चेकराशिभोगमानम्। एवं मृगतनोश्चन्द्रस्य सपादं दिनद्वयम्। तथा मङ्गले सार्न्द्धैकमासमितम्॥ ३१ ॥

तथा शुक्रस्य अर्थात् तदुच्चस्य षड्विंशतिमितानि दिनानि। बुधे द्वाविंशरात्रि द्वाविंशतिमितं दिनम्। विधुरिपोः अर्थात् राहो ससमामितं षड्मासं सार्धैकवर्षमितम्। तथा सूर्यस्यैकमाससमितं इति राशिभोग कालः। अत उपपन्नं सर्वम्॥ ३२ ॥

हिन्दी—बृहस्पति मध्यम मान के अनुसार एक राशि में १ वर्ष (भास्कराचार्य के अनुसार 'बृहस्पति मध्यम राशि भोगात् सम्वत्सरं संहितिका वदन्ति') शनि ढ़ाई वर्ष, चन्द्रमा सवा दो दिन, मङ्गल ३ तीनपक्ष, शुक्र २६ दिन, बुध २२ दिन, राहु केतु डेढ़ वर्ष और सूर्य १ मास रहते हैं॥ ३१-३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्य से सम्बन्धानुसार ग्रहों की संज्ञा—

सूर्य मुक्ता उदीयन्ते शीघ्राश्चार्के द्वितीयगे।
समास्तृतीयगे ज्ञेया मन्दा भानौ चतुर्थगे ॥ ३३ ॥
वक्राः पञ्चमषड्भेऽर्के त्वति वक्रा नगाष्टके ।
नवमे दशमे भानौ जायते कुटिलागतिः ॥ ३४ ॥
द्वादशैकादशे भानौ जायते शीघ्रतां पुनः।
अदृश्यतां पुनर्लोपं व्रजन्त्यर्कयुता ग्रहाः ॥ ३५ ॥

अन्वयः—सूर्यमुक्ता उदीयन्ते अर्के द्वितीयगे शीघ्राः तत्तृतीयगे समाः भानौ चतुर्थगे मन्दाज्ञेया ।

पञ्चम षड्भेऽर्के वक्राः नगाष्टके अतिवक्रा, भानौ नवमे दशमे कुटिला गतिः जायते ।

भानौ द्वादशैकादशे पुनः शीघ्रतां जायते, अर्कयुताग्रहाः अदृश्यतां पुनर्लोपं व्रजन्ति ॥ ३३-३५ ॥

संस्कृतः—सूर्यमुक्ताः सूर्यत्यक्त्वाः विषये सिद्धान्ते—

दस्रेन्दवः(१२) शैलभुवश्च(१७) शक्राः(१४)
रुद्राः(११) खचन्द्राः(१०) तिथयः(१५) क्रमेण ।
चन्द्रादितः काललवा निरुक्ता
ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः ॥

'इति पठिता ये स्वस्वसमयांशास्तदधिकैः सूर्यादन्तरिताः ये खेटास्ते चोदिताः स्युः । एवं येभ्यो ग्रहेभ्योऽर्के सूर्ये द्वितीयगे द्वितीयस्थानगते तदा ते खेटाः शीघ्राः शीघ्राख्याः । एवं येभ्यस्तृतीयगे भानौ सति ते खेटाः समाः समसंज्ञका ज्ञेयाः । तथा येभ्यश्चतुर्थगे भानौ ते मन्दसंज्ञकाः ॥ ३३ ॥

तथा येभ्यः पञ्चमषड्भे पञ्चमे षड्भेचार्के रवौ ते वक्राः वक्रसंज्ञकाः । तथा येभ्यो नगाष्टके सप्तमे चाष्टमे सूर्ये ते खेटा अतिवक्रा अतिवक्रसंज्ञकाः । एवं येभ्यो नवमे दशमे भानौ तेषां कुटिला गतिर्जायते । अर्थात्ते कुटिलगतिसंज्ञकाः ॥ ३४ ॥

एवं येभ्यो द्वादशे तथैकादशे भानौ तेषां गतिर्पुनः शीघ्रतां जायते किन्तु ते खेटाः शीघ्रगतिसंज्ञकाः स्युः । अर्कयुता ग्रहा ये ते चादृश्यतां पुनर्लोपं व्रजन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्नुवन्ति । अर्थात्सूर्यात्स्वस्वकालांशान्तर्गता ये खेटास्ते चादृश्यसंज्ञकाः लोपसंज्ञकाश्चेति । एतैः खेटानामुदयादिलक्षणं प्रदर्शितमिति ॥ ३५ ॥

हिन्दी—सूर्य से मुक्त हुआ ग्रह **उदित** होता है, जिस ग्रह से द्वितीय में सूर्य रहे वह **शीघ्रगति** को प्राप्त होता है, जिस ग्रह से तीसरे में सूर्य हो वह **समसंज्ञक** होता है, जिस ग्रह से चतुर्थ में सूर्य हो वह **मन्दसंज्ञक** जिससे पञ्चम और षष्ठ में सूर्य हों वह **वक्री** तथा सप्तम अष्टम में हो तो **अतिवक्री** एवं जिससे नवम-दशम में सूर्य हो वह **कुटिलगति** को प्राप्त होता है । जिससे एकादश और द्वादश में सूर्य हो वह फिर **शीघ्रगतिक** होता है तथा सूर्य से संयुक्त ग्रह **अस्तङ्गत** होता है ।

भास्कराचार्य ने ग्रहों का कालांश कहा है यथा—

'दस्रेन्दवः१२ शैल भुवश्च१७ शक्राः१४
रुद्रा११ खचन्द्रा१० तिथयः१५ क्रमेण ।
चन्द्रादितः काललवा निरुक्ता
ज्ञशुक्रयोर्वक्रगयोद्विहीनाः ॥

चन्द्रादि ग्रहों के क्रमशः १२,१७,१४,११,१०,१५ कालांश होते हैं तथा वक्री बुध का १२ शुक्र का ८ कालांश होता है, अर्थात् ये दोनों ग्रह जब सूर्य से अपने-अपने कालांश तुल्य अधिक रहते हैं तब उदित रहते हैं तथा उक्त कालांश के अन्तर्गत अस्तङ्गत रहते हैं । जैसे चन्द्रमा जब सूर्य से १२ अंश से अधिक पीछे रहता है तब उदित, १२ अंश के अन्तर्गत अस्त तथा १२अंश से अधिक हो जाता है तब उदित होता है । इसी तरह सभी ग्रह अपने कालांश के अन्तर्गत रहने पर अस्तङ्गत तथा अधिक रहने पर उदित रहते हैं ॥ ३३-३५ ॥

ग्रहों के सौम्यक्रूर लक्षण—

शन्यर्कराहुकेत्वाराः क्रूराः शेषाः शुभग्रहाः ।
क्रूरयुक्तो बुधः क्रूरः क्षीणचन्द्रस्तथैव च ॥ ३६ ॥
क्रूरा वक्राः महत्क्रूराः सौम्याः वक्रा महच्छुभाः ।
सहजाः स्यु स्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः ॥ ३७ ॥
वक्रोच्चगः स्वगेहेषु पूर्णवीर्यो भवेद्ग्रहः ।
तदग्रपृष्ठगे खेटे बलं त्रैराशिकाद् भवेत् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—शनि-अर्क-राहु-केतु-आराःक्रूरा, शेषाः शुभग्रहाः, बुधः क्रूरयुक्तो क्रूरः तथैव क्षीणचन्द्रश्च ।

वक्राः क्रूराः महत्क्रूराः वक्राः सौम्याः महच्छुभाः, सहजाः स्वभावस्थाः स्यु सौम्याः शीघ्रगाः क्रूराः (भवन्ति) ।

ग्रहः वक्रोच्चगः स्वगेहेषु पूर्णवीर्यः भवेत् तदग्रपृष्ठगे खेटे त्रैराशिकाद् बलं भवेत् ॥ ३६-३८ ॥

संस्कृतः—शनिरविराहुकेतुभौमाः क्रूराः पापग्रहाः स्युः शेषा बुधगुरु-शुक्रपूर्णचन्द्राः सौम्याः शुभग्रहाः स्युः । यदि बुधः क्रूरयुक्तः पापखेटेन सह संस्थितस्तदा पापः स्यात् । क्षीणचन्द्रः किन्तु कृष्णपक्षीयैकादशीमारभ्य शुल्कपञ्चमीं यावदिन्दुस्तथा स्यादर्थात्पाप एव स्यात् ॥

यदि क्रूराः प्रदर्शितपापखेटाः वक्राः किन्तु पूर्वकथितवक्रलक्षणोपयुक्त-स्तदा ते महत्क्रूरा अतिपापग्रहाः स्युः । यदि सौम्याः शुभग्रहा वक्रास्तदा ते मह-च्छुभा अतिशुभकारकाः स्युः। यदि स्वभावस्थाः समाख्याः खेटास्तदा सहजाः सहजफलदाः स्वभाविकफलदाः स्युः । यदि सौम्याः शुभग्रहाः शीघ्रगाः पूर्वविहितशीघ्रलक्षणलक्षितास्तदा ते क्रूराः पापफलदाः स्युः । चशब्दोपादानात् क्रूराः पापग्रहा यदि शीघ्रगास्तदा ते सौम्या शुभफलदाः स्युः ॥ ३६-३७ ॥

यो ग्रहो वक्रोच्चगस्तथा स्वगेहेषु स्थितः स च पूर्णवीर्यः पूर्णबली भवेत् । तदग्रपृष्ठगे कथितस्थानात्पूर्वापरस्थे खेटे सतित्रैराशिकादनुपाताद्बलं भवेत् । एतैः खेटानां क्रूरादिकलक्षणं प्रदर्शितम् ॥ ३८ ॥

हिन्दी—शनि-सूर्य-राहू-केतु और मङ्गल ये पापग्रह होते हैं शेष बुध-गुरु-शुक्र और पूर्णचन्द्र शुभग्रह होते हैं बुध पापग्रहों के साथ से पापग्रह हो जाता है तथा क्षीण चन्द्रमा भी पापग्रह होता है ।

पापग्रह यदि वक्री हो तो अत्यन्त पापी तथा शुभग्रह वक्री हो तो अतिशुभ हो जाता है । उपरोक्त रीति से सम ग्रह सहज ही (शुभग्रह शुभ-पापग्रह क्रूर) रहते हैं । शीघ्रसंज्ञक शुभग्रह पापी तथा पापग्रह शुभ हो जाते हैं ।

वक्रीग्रह तथा उच्चराशि और निजराशि में स्थित ग्रह पूर्णबली होते हैं इससे आगे-पीछे रहने वाले ग्रहों के बल का ज्ञान त्रैराशिक विधि से करना चाहिये ॥ ३६-३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहों के उच्च नीचादि कथन—

मेषो वृषो मृगः कन्या कर्को मीनस्तुला क्रमात्।
आदित्यादिग्रहेषूच्चं नीचं तस्माच्च सप्तमम् ॥ ३९ ॥
उच्चान् नीचाच्च यत्तूर्यं समस्थानं तदुच्यते।
उच्चं च मध्यमं नीचं त्रिधा चक्रे व्यवस्थितम् ॥ ४० ॥
उच्चस्थे तु बलं पूर्णं नीचांशस्थे दलं बलम्।
त्रैराशिक वशाज्ज्ञेयमन्तरस्थे बलं बुधैः ॥ ४१ ॥
ग्रहाः सौम्यास्तथा क्रूरा वक्रमार्गोच्च नीचगाः।
स्थानानि चेत्थं निखिलं बलं ज्ञात्वा फलं वदेत् ॥ ४२ ॥
वक्रग्रहे फलं द्विघ्नं त्रिघ्नं च स्वोच्चसंस्थिते।
स्वभावजं फलं शीघ्रे नीचस्थोर्ध्व फलप्रदः ॥ ४३ ॥

अन्वयः—मेषो-वृषो-मृगः-कन्या-कर्को-मीन-तुला क्रमात् आदित्यादि ग्रहेषु उच्चं (भवति) तस्मात् सप्तमं नीचं च (भवति)।

उच्चात् नीचाच्च यत्तूर्यं तत् समस्थानं उच्यते चक्रे उच्चं मध्यमं नीचं च त्रिधा व्यवस्थितम्।

उच्चस्थे तु पूर्णं बलं नीचांशस्थे दलं बलम्, अन्तरस्थे त्रैराशिकवशात् बुधैः बलं ज्ञेयम्।

ग्रहाः सौम्याः तथा वक्र-मार्ग उच्च नीचगाः च इत्थं स्थानानि निखिलं बलं ज्ञात्वा फलं वदेत्।

वक्रग्रहे द्विघ्नं फलं स्वोच्च संस्थिते च त्रिघ्नं शीघ्रे स्वभावजं फलं नीचस्थः अर्ध फलप्रदः ॥ ३९-४३ ॥

संस्कृतः-अत्र रव्यादीनां कथितराशिषु दशशिखिमनुयुक्तिथिन्द्रियांशैः सप्तविंशतिभिस्तथा विंशतिभिश्चांशै परमोच्चं तथा विहितांशैरैव कथितोच्चात्सप्तमराशिषु नीचं स्यादिति। अत्र यद्यपि ग्रन्थकारेणांशमानानि नोक्तानि तथापि वराहमिहिराद्याचार्योक्त्वान्मया प्रदर्शितानि ॥ ३९ ॥

अथोच्चाद्विहितस्वोच्चात्तथा नीचाच्च यत्तूर्यं चतुर्थस्थानं तत्तस्य ग्रहस्य समस्थानमुच्यते कथ्यते गणकेनेतिशेषः चक्रे द्वादशराशिसमूह उच्चं स्वोच्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संज्ञकं चकारान्मध्यं समसंज्ञकं तथा नीचं नीचस्थानमिति त्रिधा प्रकारत्रयेण व्यवस्थितं निवेशितमिति ॥ ४० ॥

उच्चस्थे खेटे सति पूर्णं बलं परमबलं स्यात् । नीचांशस्थे खेटे सति दलं रूपार्द्धं बलं स्यात् । अन्तरस्थे तदन्तरगते खेटे सति बुधैः पण्डितैस्त्रैराशिकादनुपाताद्बलं ज्ञेयमिति । अथानुपातः । यद्युच्चनीचान्तरसमैः स्वोच्चखेटान्तरांशै खनागेन्दुमितै रुपार्धं बलं लभ्यते तदा स्वेष्टैः स्वोच्चोनखेटान्तरांशमानैः किमिति । फलं रूपबलाद्विशोध्यं तदेष्टबलं स्यात् । परमेवं तदैव यदोच्चान्नीचं यावद्ग्रहः स्यात् । अत्र यदि नीचादग्रे ग्रहस्तदा नीचोनग्रहवशात्पूर्ववदानीतफलं रूपार्धे योज्यं तदाभीष्टबलं स्यात् ॥ ४१ ॥

ग्रहाः सौम्याः शुभास्तथा क्रूराः पापास्तथा वक्रा मार्गोच्चनीचगा ये सन्ति । इत्थममुना प्रकारेणैतानि स्थानानि तथा निखिलं बलं ज्ञात्वा फलं वदेत ॥ ४२ ॥

वक्रग्रहे यत्फलं तद्द्विघ्नं तदा फलं स्यात् । स्वोच्चसंस्थिते निजोच्चस्थानगते खेटे यत्फलं तत्त्रिघ्नं त्रिगुणं तदा फलं स्यात् । एवं शीघ्रे शीघ्रसंज्ञके खेटे स्वभावजं यथास्थितं फलं स्यात् । नीचस्थः खेटश्चार्धफलप्रदो निजफलार्धदः स्यात् । दृष्टिविचारस्तु वराहमिहिरोक्त एव । तद्यथा—

'पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः ।
चतुरस्त्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च ॥
दशमतृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रं च ।
पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्ति ॥ ४३ ॥

हिन्दी—मेष-वृष-मकर-कन्या-कर्क-मीन-तुला ये राशियाँ सूर्यादि ग्रहों की क्रम से उच्च राशियाँ होती है । उच्चराशि से सप्तम राशि नीचराशि होती है ।

उच्च और नीच से चतुर्थ राशि सम स्थान होता है इस तरह द्वादश राशिचक्र में ग्रहों की उच्च-सम-नीच तीन राशियाँ होती हैं ।

ग्रह यदि उच्चराशि में हो तो पूर्णबल नीच में हो तो आधाबल तथा दोनों के मध्य में हों तो त्रैराशिक विधि से बलज्ञान करना चाहिये ।

शुभ-पाप तथा वक्र-मार्ग-उच्च-नीच-आदि स्थानों द्वारा अच्छे प्रकार से बल का ज्ञान करके फलादेश करना चाहिये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रह यदि वक्री हो तो फल को द्विगुणित, उच्च राशि में हो तो त्रिगुणित, शीघ्रसंज्ञक हो तो स्वभावजन्य और नीचराशि में हो तो अर्द्ध करता है।

ग्रह उच्चराशि और नीच राशि के अन्तर्गत हों तो बलज्ञान हेतु अनुपात—

उच्च-नीचान्तर तुल्य १८० अंश में आधा बल तो उच्च रहित ग्रह अंश में क्या। जो फल आवे उसे रूप में से घटाने से इष्ट बल होता है। यदि नीच राशि से उच्चराशि के अन्तर्गत हो तो नीचोच्चान्तर तुल्य १८० अंश में आधाबल तो नीचोन ग्रह अंश में क्या। जो फल आवे उसे रूपार्द्ध में युक्त कर देने पर इष्ट बल होता है।

(१) $\dfrac{\text{१} \times \text{उच्चोन ग्रहान्तरांश}}{\text{२} \times \text{१८०}}$ = फल, रूपोन करने पर ग्रहबल

(२) $\dfrac{\text{१} \times \text{नीचोन ग्रहान्तरांश}}{\text{२} \times \text{१८०}}$ = फल, रूपार्द्धयुक्त करने पर ग्रहबल होता है।

बालारिष्ट समय का ज्ञान—

सबलेत्र ग्रहे पापे दिनमात्रं विधीयते।
मध्ये बले तथा मासो वर्षं चैवाबले तथा॥ ४४॥
बलान्विते शुभे वापि वर्ष विद्याद्यथातथम्।
मध्ये बले तथा मासं क्षीण वीर्ये तथा दिनम्॥ ४५॥

अन्वय:—पापे ग्रहे सबले अत्र (रिष्टं) दिनमात्रं विधीयते तथा मध्यबले मासं तथा चैव अबले वर्षं (रिष्टं भवति)।

शुभे बलान्विते वा अपि वर्षं विद्यात् यथातथं मध्ये बले मासं तथा क्षीणवीर्ये दिनं (रिष्टं भवति)॥ ४४-४५॥

संस्कृत:—पापे ग्रहे वेधकारके पापग्रहे सबले पूर्णबले सति दिनमात्रं रिष्टं विधीयते वराहमिहिरादिभि: कथ्यते। तथा वेधकारके पापग्रहे मध्ये बले मध्यबले सति मास: अर्थात् मासप्रमाणेन रिष्टं कथ्यते। तथा वेधकारके पापग्रहे चाबले बलरहिते सति वर्षं वर्षमानेन रिष्टं कथ्यते॥ ४४॥

वा अथवा वेधकारके शुभे शुभग्रहे सति यथातथं यथाङ्कमानेन वर्षे रिष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यात् जानीयात् गणक इति शेषः । तथा वेधकारके शुभखेटे मध्ये बले समबले सति मासं मासमानेनारिष्टम् । तथा वेधकारके शुभखेटे क्षीणवीर्ये नष्टबले सति दिनं दिनमानेन रिष्टम् ॥ ४५ ॥

हिन्दी—वेधकारक पापग्रह यदि बलवान रहे तो वेधकारक पापग्रह जिसराशि में हो 'तद्भव एकोन विंशतिः कर्के' वचन के अनुसार उस राशि संख्या तुल्य दिन पर बालारिष्ट समझना चाहिये । पापग्रह यदि मध्यबली हो तो ग्रह राशि के गताङ्क तुल्य मास पर बालारिष्ट समझना चाहिये । यदि दुर्बल ग्रह हों तो वेधकारक पापग्रह गताङ्क राशि तुल्य वर्ष पर बालारिष्ट समझना चाहिये ।

यदि वेधकारक शुभग्रह बली हों तो शुभग्रह गताङ्क राशि तुल्य वर्ष पर, मध्यबली हों तो तद्राशि गताङ्क तुल्य मास पर और क्षीणबली हों तो तद्राशि गताङ्क तुल्य दिन पर बालारिष्ट समझना चाहिये ॥ ४४-४५ ॥

जन्मलग्न से बालारिष्ट ज्ञान—

पापग्रहयुते लग्ने युते वा शत्रुवीक्षिते।
तदा दिनं भवेत्तस्य मरणाय सुनिश्चितम् ॥ ४६ ॥

अन्वयः—लग्ने पापग्रहयुते वा शत्रु वीक्षिते तदा तस्य दिनं मरणाय सुनिश्चितम् ॥ ४६ ॥

संस्कृतः—जन्मलग्ने पापग्रहयुते शत्रुणा युते वा दृष्टे सति तदा तस्य बालस्य दिनं तदङ्कमानेन दिनं मरणाय सुनिश्चितमिति ॥ ४६ ॥

हिन्दी—त्रिपताकी चक्र में जन्मलग्न यदि पापग्रह से अथवा शत्रु से युक्त या दृष्ट हो तो जन्मलग्न राशि के गतांश तुल्य दिन पर बालक की मृत्यु होती है ॥ ४६ ॥

तुल्यदृष्टिर्द्वयोर्वापि तुल्य योगो भवेद्यदि ।
तदा मासं विधातव्यं ग्रहाणां च बलाबलम् ॥ ४७ ॥

अन्वयः—द्वयोः तुल्यदृष्टिः वा यदि तुल्य योगो भवेत् तदा ग्रहाणां बलाबलं च (विज्ञाय) मासं रिष्टं विधातव्यम् ॥ ४७ ॥

संस्कृतः—यदि जन्मलग्ने द्वयोः शुभाशुभखेटयोस्तुल्या दृष्टि स्यात् । वा तत्र तुल्यशुभाशुभयोर्योगः किन्तु जन्मलग्ने शुभाशुभयोर्योगे समता भवेत् । तदा ग्रहाणां बलाबलमेवावगम्य मासं मासप्रमाणेनाङ्कतुल्येन रिष्टं विधातव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञेयमिति । अत्रेदमवधेयम्—शुभग्रहे बलवति सति पापखेटे बलरहिते सति तदा मासो ज्ञेयः अन्यथा दिनानि । तथोक्तमन्यत्र—

'असद्ग्रहयोगे लक्षणाद्यैर्दिनानि
विमिश्रेण मासा बलात्तारतम्यमिति' ॥ ४७ ॥

हिन्दी—जन्मलग्न शुभग्रह तथा पापग्रह दोनों से दृष्ट हो अथवा युक्त हो तो जन्मलग्न गताङ्क तुल्य मास पर बालारिष्ट समझें । यदि शुभग्रह अधिक बलवान् हो तो मास संख्या तथा यदि पापग्रह अधिक बलवान् हो तो तत्संख्या तुल्य दिन पर ही अरिष्ट समझना चाहिए ॥ ४७ ॥

शुभदृष्टे शुभयुते शुभस्थानस्थितेऽपि वा।
तदा वर्षं विजानीयात्स्वामिना दृश्यते यदि॥ ४८ ॥

अन्वयः—शुभदृष्टे शुभयुते वा शुभस्थानस्थितेऽपि यदि स्वामिना दृश्यते तदा वर्षं (रिष्टं) विजानीयात् ॥ ४८ ॥

संस्कृतः—जन्मलग्ने शुभग्रहवेधे सति शुभैर्दृष्टेयुते सति वा पुनरपि शुभस्थानस्थिते शुभग्रहस्य राशौ प्राप्ते सति तदा वर्षं तदङ्कमानेन रिष्टं विजानीयाद् गणक इति शेषः । अथवा शुभग्रह वेधे सति जन्मलग्ने स्वस्वामिना युते दृष्टे सति तथैव वर्षं बोध्यम् । तथोक्तमन्यत्रापि शुभस्थानयोगेक्षणाद्यैः समास्तु ॥ ४८ ॥

हिन्दी—जन्मलग्न शुभग्रह से विद्ध तथा शुभग्रह से ही दृष्ट युक्त हो तो अथवा जन्मलग्न शुभग्रह की राशि हो तो लग्नगताङ्क तुल्य वर्ष पर बालारिष्ट समझना चाहिये । यदि जन्मलग्न शुभग्रह से विद्ध हो तथा अपने स्वामी से दृष्ट हो तो लग्न गताङ्क तुल्य वर्ष पर बालारिष्ट समझना चाहिये ॥ ४८ ॥

प्रकारान्तर से अरिष्टज्ञान—

अशुभे दण्डसंयोगे क्षीणे पापयुते यदि ।
शुभ ग्रहाः प्रपश्यन्ति तत्र वर्षाणि योजयेत् ॥ ४९ ॥

अन्वयः—अशुभे दण्डसंयोगे क्षीणे पाप युते यदि शुभग्रहाः प्रपश्यन्ति तत्र वर्षाणि योजयेत् ॥ ४९ ॥

संस्कृतः—यदा दण्डेशे पापखेटे सति तथा पुनः क्षीणे नीचारिभगत-वशाद्बलरहिते सति तथा जन्मलग्ने पापग्रहयुते सति दिनानि । तत्र यदि बलवन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभखेटाः जन्मलग्नं प्रपश्यन्ति तदा वर्षाणि तदङ्कतुल्यवर्षमानेनारिष्टं योजयेज्जानीयात् ॥ ४९ ॥

हिन्दी—जन्मलग्न वक्ष्यमाण रीति से पापदण्डेश से युक्त हो और दण्डेश बलहीन हो तथा जन्मलग्न पापग्रह से युक्त हो तो ऐसी स्थिति में यदि बलवान शुभग्रह जन्मलग्न को देखता हो तो जन्मलग्नगताङ्क तुल्य वर्ष पर ही अरिष्ट समझना चाहिए ॥ ४९ ॥

वर्गोत्तमे स्वतुङ्गे वा केन्द्रे च गुरु भार्गवौ ।
तथापि प्रबले पापे वर्ष भागो न लभ्यते ॥ ५० ॥

अन्वयः—गुरु भार्गवौ वर्गोत्तमे वा स्वतुङ्गे केन्द्रे च तथापि पापे प्रबले वर्षभागो न लभ्यते ॥ ५० ॥

संस्कृतः—यदि गुरुभार्गवौ वर्गोत्तमे वर्गोत्तमाख्ये नवांशे वा स्वतुङ्गे निजोच्चे स्थितौ सन्तौ केन्द्रेऽपि भवेतां तथापि पापे वेधकारकपापग्रहे प्रबले बलाधिक्ये सति तदा वर्षभागो न लभ्यते वर्षमानेनरिष्टं न जायते किन्तु दिनप्रमाणेन रिष्टं बोध्यम् ॥ ५० ॥

हिन्दी—गुरु-शुक्र दोनों वर्गोत्तम नवांश में या निजोच्च में स्थित होकर केन्द्र में हों तब भी यदि वेधकारक पापग्रह बलवान हो तो प्राप्त संख्या तुल्य वर्ष नहीं अपितु तत्तुल्य दिन ही अरिष्ट के लिये समझना चाहिये ॥ ५० ॥

स्वकीय मत—

विद्धे ऋक्षत्रितयस्थैर्दिनमात्रं विधीयते ।
एतदुक्तं मम मतं शिशोरिष्टं च सर्वदा ॥ ५१ ॥

अन्वयः—ऋक्ष त्रितयस्थैः विद्धे दिन मात्रं विधीयते, एतत् मम मतं उक्तं सर्वदा शिशोरिष्टं च (ज्ञेयम्) ॥ ५१ ॥

संस्कृतः—यदि जन्मलग्ने ऋक्षत्रितयस्थैः किन्तु राशित्रयगतैर्ग्रहैर्विद्धे सति तदा दिनमात्रं रिष्टं विधीयते । एतन्मम मतं यदुक्तं तत्सर्वदा शिशोर्बालस्य रिष्टं ज्ञेयम् ॥ ५१ ॥

हिन्दी—ग्रन्थकार के अनुसार यदि जन्मलग्न तीनों राशि (उच्च- नीच- स्वगृह) गत ग्रह से विद्ध हो तो तद्गत अंक तुल्य दिन पर ही अरिष्ट समझना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चाहिये । तात्पर्य यह कि यदि राशित्रय गत ग्रहों से जन्मलग्न विद्ध हो तो अवश्य ही तद्गताङ्क तुल्य दिन पर अरिष्ट होता है ॥ ५१ ॥

शुभ लक्षण—

शुभे च दण्ड संयोगे सर्वथा पाप वर्जिते ।
बालस्य कुशलं सर्वं शुभे यदि युतेक्षिते ॥ ५२ ॥

अन्वयः—दण्ड संयोगे शुभे च सर्वथा पापवर्जिते शुभे यदि युतेक्षिते (तदा) बालस्य सर्वं कुशलं (ज्ञेयम्) ॥ ५२ ॥

संस्कृतः—अनेन दण्डेशार्धयामेशयोर्वशात्फलं दर्शितम् । यद्यथा वक्ष्यमाणविधिना दण्डेशे शुभग्रहे सति तथा सर्वथा वेधार्धयामेशयोर्मध्ये पापवर्जिते पापखेटसम्बन्धाभावे सति पुनर्यदि जन्मलग्ने शुभग्रहैर्युतेक्षिते सति तदा बालस्य सर्वं सर्वथा कुशलं कल्याणं कथयेत् न चारिष्टमित्यर्थः ॥ ५२ ॥

हिन्दी—वक्ष्यमाण विधि से यदि दण्डेश शुभ ग्रह हो और जन्मलग्न किसी पापग्रह से विद्ध न हो तथा वक्ष्यमाण रीति से अर्धयामेश भी पापग्रह न हो अर्थात् पापग्रह का सर्वथा अभाव हो तो ऐसी स्थिति में जन्मलग्न यदि शुभ ग्रह से युक्त या दृष्ट हो तो बालक के लिये निरन्तर कुशल (कल्याण) ही समझना चाहिये ॥ ५२ ॥

अशुभ लक्षण—

अशुभे दण्ड संयोगे सर्वत्र शुभवर्जिते ।
बालस्य मरणं शीघ्रं यदि पापैर्युतेक्षिते ॥ ५३ ॥

अन्वयः—अशुभे दण्ड संयोगे सर्वत्र शुभवर्जिते यदि पापैः युतेक्षिते (तदा) बालस्य शीघ्रं मरणं (ज्ञेयम्) ॥ ५३ ॥

संस्कृतः—अत्रापि दण्डेशार्धयामेशयोः सम्बन्धात्फलमुक्तम् । तद्यथा । अशुभे पापग्रहे दण्डाधिपे सति तथा सर्वत्रेतिपदबलाद्वेधार्धयामेशयोर्मध्ये शुभवर्जिते शुभखेटसम्बन्धाभावे सति किन्तु तद्द्वयं पापग्रहाणामेवास्ति तथा जन्मलग्ने पापैर्युतेक्षिते सति तदा बालस्य शीघ्रं मरणं स्यात् । अत्रेदमवधेयम् । दण्डेशस्य पापाभावे रिष्टमात्रं नच मरणम् । तथोक्तमन्यत्र—

पापार्धप्रहरे जन्म पापदण्डेऽथवा पुनः ।
लग्ने पापे यदा जातस्तदा मृत्युर्न संशयः ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी—वक्ष्यमाण विधि से दण्डेश यदि पापग्रह हो अर्थात् सर्वत्र शुभग्रह का अभाव हो (वेधकारक ग्रह तथा अर्धयामेश भी शुभग्रह नही हो) तो ऐसी स्थिति में जन्मलग्न यदि पापग्रह से युक्त दृष्ट हो तो शीघ्र ही बालक की मृत्यु समझनी चाहिए ॥ ५३ ॥

अर्धयामेशकथन—

दिवा षट्क क्रमेणैव रात्रौ पञ्चक्रमेण च।
वारेशादर्धयामानां पतयः कीर्तिताः बुधैः ॥ ५४ ॥

अन्वयः—दिवा षट्क्रमेण रात्रौ पञ्चक्रमेण च वारेशात् अर्धयामानां पतयः बुधैः कीर्तिताः ॥ ५४ ॥

संस्कृतः—दिवा दिने षट्कक्रमेण षट्सङ्ख्या परिवर्त्तनेनाऽर्धयामाधिपा। रात्रौपञ्चक्रमेण पञ्चसङ्ख्यापरिवर्त्तनेन चार्धप्रहरेशाः स्युः । इत्येवं बुधैवरिशाद्वारेशमारभ्यार्धयामानां पतयः कीर्तिता । अत्रेदमवधेयम् । यस्मिन् दिनेऽर्ध यामेशस्य ज्ञानमभीष्टं तद्दिने दिनमानमष्टधाविभज्य प्रथमखण्डस्याधिपं तद्दिनेशं कृत्वा तस्मादिनेशात्षष्ठग्रहं द्वितीयखण्डाधिपं ततो द्वितीयखण्डेशात्पुनः षष्ठग्रहं तृतीयखण्डाधिपं जानीयादेवमग्रेपीष्टदण्डं यावदिति । तद्यथा । रविदिने प्रथमार्धयामेशो वारेशरूपो रविरेव तस्मात्षष्ठशुक्रः स च द्वितीयार्धयामेशः । एवं तृतीयेशो बुधः । चतुर्थेशश्चन्द्र । पञ्चमार्धयामस्य पतिः शनिः । ततः षष्ठेशो गुरुः । सप्तमार्धयामाधिपतिः कुजः । अष्टमाधिपतिः पुनवरिशः सूर्य एव । एवमन्यवारेषु बोध्यम् ।

अथ रात्रावपि प्रथमार्धयामेशं वारेशं कृत्वां ततस्तस्माद्वारेशात् पञ्चमोग्रहो

दिवा अर्धयामेश चक्रम्—१

१	सू	चं	मं	बु	बृ	शु	श
२	शु	श	सू	चं	मं	बु	बृ
३	बु	बृ	शु	श	सू	चं	मं
४	चं	मं	बु	बृ	शु	श	सू
५	श	सू	चं	मं	बु	बृ	शु
६	बृ	शु	श	सू	चं	मं	बु
७	मं	बु	बृ	शु	श	सू	चं
८	सू	चं	मं	बु	बृ	शु	श

रात्रि अर्धयामेश चक्रम्—२

१	सू	चं	मं	बु	बृ	शु	श
२	बृ	शु	श	सू	चं	मं	बु
३	चं	मं	बु	बृ	शु	श	सू
४	शु	श	सू	चं	मं	बु	बृ
५	मं	बु	बृ	शु	श	सू	चं
६	श	सू	चं	मं	बु	बृ	शु
७	बु	बृ	शु	श	सू	चं	मं
८	सू	चं	मं	बु	बृ	शु	श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयार्धयामाधिपतिः । एवं ततस्ततः पञ्चसङ्ख्यया तृतीयाद्यर्धयामानां पतयः स्युः । तद्यथा । रविरात्राद्यर्धयामेशो रविः । ततो द्वितीयस्य पतिर्गुरु । तृतीयस्येन्दुः । चतुर्थस्य शुक्रः । पञ्चमस्य मङ्गलः । षष्ठस्य शनिः । सप्तमस्य बुधः । अष्टमस्य सूर्यः । एवमन्यवाराणामपि रात्रिषु बोध्यम् ॥ ५४ ॥

हिन्दी—दिन में अर्द्धयाम ८ होते हैं इसी तरह रात्रि में भी ८ अर्द्धयाम होते हैं । दिन में यदि अर्द्धयामेश जानना हो तो प्रथम अर्द्धयाम दिवसाधिप का होता है द्वितीय उससे षष्ठ ग्रह का इसी तरह तृतीयादि का भी विचार करना चाहिये । जैसे रविवार को दिन में प्रथम अर्द्धयामेश सूर्य, द्वितीय शुक्र, तृतीय बुध, चतुर्थ चन्द्र, पञ्चम शनि, षष्ठ बृहस्पति, सप्तम मङ्गल, अष्टम पुनः सूर्य अर्द्धयामेश होता है । रात्रि में पञ्चम-पञ्चम ग्रह के परिवर्तन से अर्द्धयामेश होता है । जैसे रविवार की रात्रि में १ सूर्य, २ बृ., ३ चं, ४ शु, ५ मं., ६ श., ७ बु., ८ सू. अर्द्धयामेश हुए । अर्द्धयामेशों के ज्ञान हेतु पूर्वलिखित चक्र सं० १ एवं २ देखें ॥ ५४ ॥

अर्धयामेश साधन—

अर्कः शुक्रो बुधश्चन्द्रो मन्दो जीवः कुजो रविः।
अर्कोः जीवः शशी शुक्रः कुजो मन्दो बुधो रविः॥ ५५॥
दिवा यामार्धपस्त्वाद्यो दण्डेशः परिकीर्तितः।
प्रोक्ता ग्रहाः क्रमेणात्र चत्वारो दण्डनायका ॥ ५६ ॥

अन्वयः—अर्कः-शुक्रो-बुधः-चन्द्रो-मन्दो-जीवः-कुजो-रविः-अर्को-जीवः शशि-शुक्रः-कुजो मन्दो-बुधो-रविः ।

दिवा आद्यो यामार्धपस्तु दण्डेशः परिकीर्तितः, ग्रहाः अत्र क्रमेण चत्वारो दण्डनायकाः प्रोक्ता ॥ ५५-५६ ॥

संस्कृतः—दिवा दिने यस्मिनर्धयामे दण्डेशस्य ज्ञानमभिमतं तदाऽऽद्यो दण्डेशस्त्वर्धयामाधिप एव परिकीर्त्तितः । ततः क्रमेणार्थाद्वक्ष्यमाणार्धार्धरीत्या चैवं चत्वारो दण्डनायका दण्डेशाः प्रोक्ताः कथिता गणकेनेति शेषः ।

अत्रेदमवधेयम् । दिने चाभीष्टार्धयामप्रमाणस्य चत्वारो भागा विधेयाः । तेषां विभागानां दण्डाख्या ग्रन्थे कथिता इति । तत्रार्धयामेशो यः स एवाद्यो दण्डेशः । तदर्धतुल्यग्रहो द्वितीयभागस्य दण्डाभिधस्येशः । पुनस्तदर्द्धं तृतीयस्येशः पुनस्तर्द्धं चतुर्थस्येशः । तद्यथा । रविदिने प्रथमार्धयामेशो रविरेव स

पं ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चात्राद्यो दण्डेशश्च । तदर्धपरिमितो (''अर्ध''अग्रे स्पष्टम्) राहुद्वितीयदण्डेशः। पुनस्तत्सङ्ख्यार्धसमा बुधस्तृतीयेशः । पुनस्तद्दलेन द्विकेन समश्चन्द्रश्चतुर्थ-दण्डेशः । एवं सर्वेषामर्धयामानां प्रमाणं चतुर्धा विभज्यार्धार्धक्रमरीत्या दण्डे-श्वरो बोध्यः ॥ ५५-५६ ॥

हिन्दी—पूर्व में वारेश से 'दिवा षट्क रात्रौ पञ्च क्रमेण च' के अनुसार अर्द्धयामेश उक्त हैं उसी को स्पष्ट करते हैं कि दिन में वारेश से सूर्य-शुक्र-बुध-चन्द्र-शनि-बृहस्पति-मङ्गल-सूर्य और रात्रि में वारेश से सूर्य-बृहस्पति-चन्द्र-शुक्र-मङ्गल-शनि-बुध-सूर्य क्रम से अर्द्धयामेश होते हैं।

दिन के समय जिस अर्द्धयाम में दण्डेश का ज्ञान करना हो वहाँ प्रथम दण्डेश अर्द्धयामेश ही होता है तथा द्वितीय-तृतीय-चतुर्थ दण्डेश आगे के श्लोकानुसार अर्द्ध-अर्द्ध क्रम से जो ग्रह उक्त हैं वे होते हैं। इस तरह प्रत्येक अर्द्धयाम में चार दण्डेश होते हैं। जैसे रविवार को प्रथम अर्द्धयाम में प्रथम दण्डेश सूर्य, द्वितीय दण्डेश 'रवेरर्धं भवेद्राहू' रीति से राहु, तृतीय दण्डेश 'राहो-रर्धं बुधस्तथा' से बुध, चतुर्थ दण्डेश 'बुधस्यार्धं शशी ज्ञेयः' से चन्द्रमा हुआ इस तरह सभी अर्द्धयामों में दण्डेश का आनयन करना चाहिये ॥ ५५-५६ ॥

दिन में दण्डेशों का क्रम—

रवे रर्धं भवेद्राहू राहोरर्धं बुधस्तथा।
बुधस्यार्धं शशी ज्ञेयश्चन्द्रस्यार्धं दिवामणिः ॥ ५७ ॥
भौमस्यार्धं तथा सूर्यो गुरोरर्धं हि चन्द्रमा।
शुक्रस्यार्धं कुजो ज्ञेयः शनेरर्धं तथैव च ॥ ५८ ॥

अन्वयः—राहू रवेरर्धं भवेत् तथा बुधः राहोरर्धं, शशि बुधस्यार्धं दिवामणिः चन्द्रस्यार्द्धं ज्ञेयः।

सूर्यो भौमस्यार्धं चन्द्रमा हि गुरोरर्धं तथा कुजो शुक्रस्यार्द्धं ज्ञेयः, शनेरर्धं तथैव च (ज्ञेयम्) ॥ ५७-५८ ॥

संस्कृतः—अत्र यदा सावयता सङ्ख्या स्यात्तदा तदवयवमपहाय पूर्णं-सङ्ख्या ग्राह्या। तथा शून्यस्थलेराहुः। एवं राहुसङ्ख्यायारर्धं कर्त्तव्ये चाष्ट-सङ्ख्यायारर्धं विधेयं यतो राहुरष्टमो ग्रहः ॥ ५७-५८ ॥

हिन्दी—सूर्य का अर्द्ध राहु, राहु का अर्द्ध बुध, बुध का अर्द्ध चन्द्रमा, चन्द्रमा का अर्द्ध सूर्य होता है। भौम का अर्द्ध सूर्य, गुरु का अर्द्ध चन्द्रमा, शुक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का अर्द्ध मङ्गल और शनि का अर्द्ध भी मङ्गल ही होता है । इसी अर्द्धार्ध क्रमानुसार प्रत्येक अर्धयाम में दण्डेश होते हैं । ग्रन्थकार ने भी अग्रिम श्लोक 'रवि शिखि बुध चन्द्राः' इत्यादि से इसे स्पष्ट कर दिया है ॥ ५७-५८ ॥

दिन में दण्डेश साधन—

रविशिखिबुधचन्द्राश्चन्द्रसूर्यासुरज्ञाः
कुजरविदनुजज्ञा ज्ञेन्दुसूर्यासुराश्च ।
गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः
शनिकुजरविदैत्याः स्युर्दिवा दण्डपालाः॥ ५९ ॥

अन्वयः—रवि-शिखि-बुध-चन्द्राः, चन्द्र-सूर्य-असुर-ज्ञाः, कुज-रवि-दनुज-ज्ञा, ज्ञ-इन्दु-सूर्य-असुराश्च, गुरु-शशि-रवि-दैत्याः, शुक्र-भौम-अर्क-दैत्याः, शनि-कुज-रवि-दैत्याः, दिवा दण्डपालाः स्युः ॥ ५९ ॥

संस्कृतः—अत्र रवेरर्धयामे रव्यादिचन्द्रान्ताः । एवं चन्द्रार्धयामे चन्द्रादि-बुधान्ताः । कुजार्धयामेकुजादि बुधावधिकाः । बुधार्धप्रहरे बुधादिराह्वन्ताः । गुरुवारे गुर्वाद्यराहुग्रहावधिकाः । शुक्रार्धयामे शुक्रादिराहुं यावत् । एवं शनिवारे शनिमारभ्य राहुग्रहं यावत् । इत्येवं दिने दण्डेश्वराः स्युः ॥ ५९ ॥

हिन्दी—दिन में यदि दण्डेश का ज्ञान करना हो तो **सूर्य के** अर्द्धयाम में

रविदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	सू.	रा	बु	चं
२	शु	मं	सू	रा
३	बु	चं	सू	रा
४	चं	सू	रा	बु
५	श	मं	सू	रा
६	वृ	चं	सू	रा
७	मं	सू	रा	बु
८	सू	रा	बु	चं

चन्द्रदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	चं	सू	रा	बु
२	श	मं	सू	रा
३	वृ	चं	सू	रा
४	मं	सू	रा	बु
५	सू	रा	बु	चं
६	शु	मं	र	रा
७	बु	चं	र	रा
८	चं	सू	रा	बु

भौमदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	मं	सू	रा	बु
२	सू	रा	बु	चं
३	शु	मं	र	रा
४	बु	चं	सू	रा
५	चं	सू	रा	बु
६	श	मं	र	रा
७	वृ	चं	सू	रा
८	मं	सू	रा	बु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुधदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	बु	च	र	रा
२	चं	र	रा	बु
३	श	मं	र	रा
४	बृ	चं	र	रा
५	मं	र	रा	बु
६	र	रा	बु	चं
७	शु	मं	र	रा
८	बु	चं	र	रा

गुरुदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	बृ	चं	र	रा
२	मं	र	रा	बु
३	र	रा	बु	चं
४	शु	मं	र	रा
५	बु	चं	र	रा
६	चं	र	रा	बु
७	श	मं	र	रा
८	बृ	चं	र	रा

शुक्रदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	शु	मं	र	रा
२	बु	चं	र	रा
३	चं	र	रा	बु
४	श	मं	र	रा
५	बृ	चं	सू	रा
६	मं	र	रा	बु
७	र	रा	बु	चं
८	शु	मं	सू	रा

शनिदिन

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	श	मं	र	रा
२	बृ	चं	सू	रा
३	मं	र	रा	बु
४	र	रा	बु	चं
५	शु	मं	सू	रा
६	बु	चं	र	रा
७	चं	र	रा	बु
८	श	मं	र	रा

प्रथम दण्डेश सूर्य, द्वितीय दण्डेश राहु, तृतीय दण्डेश बुध, और चतुर्थ दण्डेश चन्द्रमा । **चन्द्रमा के** अर्द्धयाम में प्रथम दण्डेश चन्द्रमा, द्वितीय सूर्य, तृतीय राहु और चतुर्थ बुध, **भौम के** अर्धयाम में मं-सूर्य-राहू-बुध, इसी तरह **बुध के** अर्द्धयाम में बुध-चन्द्रमा-सूर्य-राहु, **बृहस्पति के** अर्द्धयाम में शुक्र-मङ्गल-सूर्य-राहु, **शुक्र के** अर्धयाम में शु.-मं.-सू.-राहू तथा **शनि के** अर्द्धयाम में क्रमशः शनि-मङ्गल-सूर्य-राहु दण्डेश होते हैं ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिन-रात्रि के दण्डेश—

दिवार्ध प्रक्रमेणैव यामार्धेशाच्च दण्डपाः ।
रात्रौ षट् क्रमेणैव तदीशा यामखण्डपात् ॥ ६० ॥

अन्वयः—दिवार्ध प्रक्रमेणैव यामार्धेशात् दण्डपाः (भवन्ति) रात्रौ यामखण्डपात् षट्क्रमेणैव तदीशा (भवन्ति) ॥ ६० ॥

संस्कृतः—अत्र पूर्वार्धेन दिने दण्डेशाः प्रदर्शिताः । तस्यार्थस्तु पूर्वमेव प्रस्फुटीं कृतः । अथोत्तरार्धं व्याख्यायते । रात्रौ यामखण्डपादर्धयामेशादारभ्य षट्क्रमेण षट्परिवर्त्तनवशेन तदीशा दण्डपा स्युः ।

अत्रेदमवधेयम् । रात्रावपि यस्मिन् यामार्धेदण्डेश्वरोऽभीष्टस्तदाऽर्धयामस्याद्यचतुर्थांशस्थ दण्डाख्यस्य पतिरर्धयामेश एव । ततः षष्ठोग्रहो द्वितीयदण्डेशः । पुनस्तत्षष्ठस्तृतीयदण्डेशः । एवं ततः षष्ठश्चतुर्थदण्डेशो बोध्यः । तथोक्तं स्वरपञ्चाशिकायाम्—

'दिवार्धप्रकमेणैव ज्ञेया दण्डेश्वराबुधैः ।
निशियामार्धपात्षष्ठः षष्ठः क्षणदलेश्वरः ॥'

तद्यथा । रात्रौ रवियामार्धेदण्डेश्वराणां परामर्शे कर्त्तव्ये प्रथमदण्डेशो यामार्धेशरूपो रविरेव । तस्मात्षष्ठग्रहः शुक्रो द्वितीयदण्डेशः । ततः षष्ठो बुधस्तृतीयदण्डाधीशः । तत्षष्ठश्चन्द्रश्चतुर्थदण्डप । एवमन्यार्धयामेष्वपि विभाव्यम् ॥ ६० ॥

हिन्दी—दिन में दिनार्ध क्रम से दण्डेश होते हैं जो पूर्व में ही उक्त हैं । रात्रि में अर्द्धयामेश से षष्ठ-षष्ठ ग्रह के क्रम से दण्डेश समझना चाहिये । अर्थात् रात्रि के जिस अर्द्धयाम में दण्डेश ज्ञान करना है उसमें अर्द्धयामेश ही प्रथम दण्डेश होता है तथा अर्द्धयामेश से छठा ग्रह द्वितीय दण्डेश, द्वितीय दण्डेश से छठा ग्रह तृतीय दण्डेश, तृतीय दण्डेश से छठा ग्रह चतुर्थ दण्डेश होता है ।

जैसे रात्रि के सूर्य के अर्द्धयाम में दण्डेश जानना है तो सूर्य ही प्रथम दण्डेश हुआ, सूर्य से षष्ठ शुक्र द्वितीय दण्डेश, शुक्र से षष्ठ बुध तृतीय दण्डेश और बुध से षष्ठ चन्द्रमा चतुर्थ दण्डेश हुआ इसी तरह से रात्रि में भी दण्डेश का ज्ञान करना चाहिये ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रि के दण्डेश—

रविसितबुधचन्द्राश्चन्द्रमन्देज्यभौमाः
कुजरविसितसौम्याः सौम्यचन्द्रार्किजीवाः ।
गुरुकुजरविशुक्राः शुक्रसौम्येन्दुमन्दाः
शनिगुरुकुजसूर्या रात्रिदण्डेश्वराः स्युः ॥ ६१ ॥

इति श्रीप्रजापतिदास विरचिते पञ्चस्वराख्ये त्रिपताकीचक्र-विचाराध्यायः ॥ १ ॥

अन्वयः—रात्रि दण्डेश्वराः रवि-सित-बुध-चन्द्राः, चन्द्र-मन्द-इज्य-भौमाः, कुज-रवि-सित-सौम्याः, सौम्य-चन्द्र-अर्कि-जीवाः, गुरु-कुज-रवि- शुक्राः, शुक्र-सौम्य-इन्दु-मन्दाः, शनि-गुरु-कुजःसूर्या स्युः ॥ ६१ ॥

संस्कृतः—रात्रावर्कार्धयामे रविमारभ्य चन्द्रं यावत् । तथेन्दुयामदले चन्द्रादिमङ्गलान्ताः । एवं मङ्गलार्धप्रहरे मङ्गलादि बुधावधिकाः । बुधार्धयामे बुधमारभ्य गुरुं यावत् । गुरोरर्धयामे गुरुमारभ्य शुक्रान्ताः । एवं शुक्रार्धप्रहरे शुक्रमारभ्य शन्यन्ताः । तथा शनेरर्धयामे शन्यादिरव्यन्ताः । इत्येवं रात्रौ दण्डेश्वराः स्युः । एवं कृते सति तच्चक्राणि लिख्यन्ते—

रविरात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	र	शु	बु	चं
२	बृ	मं	र	शु
३	चं	श	बृ	मं
४	शु	बु	चं	श
५	मं	रं	शु	बु
६	श	बृ	मं	र
७	बु	चं	श	बृ
८	र	शु	बु	चं

चन्द्ररात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	चं	श	बृ	मं
२	शु	बु	चं	श
३	मं	र	शु	बु
४	श	बृ	मं	र
५	बु	चं	श	बृ
६	र	शु	बु	चं
७	बृ	मं	र	शु
८	चं	श	बृ	मं

भौमरात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	मं	र	शु	बु
२	श	बृ	मं	र
३	बु	चं	श	बृ
४	र	शु	बु	चं
५	बृ	मं	र	शु
६	चं	श	बृ	मं
७	शु	बु	चं	श
८	मं	र	शु	बु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुधरात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	बु	च	मं	बृ
२	र	शु	बु	चं
३	बृ	मं	र	शु
४	चं	श	बृ	मं
५	शु	बु	चं	श
६	मं	र	शु	बु
७	श	बृ	मं	र
८	बु	चं	श	बृ

गुरुरात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	बृ	मं	र	शु
२	चं	श	बृ	मं
३	शु	बु	चं	श
४	मं	र	शु	बु
५	श	बृ	मं	र
६	बु	चं	श	बृ
७	र	शु	बु	चं
८	बृ	मं	र	शु

शुक्ररात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	शु	बु	चं	श
२	मं	र	शु	बु
३	श	बृ	मं	र
४	बु	चं	श	बृ
५	र	शु	बु	चं
६	बृ	मं	र	शु
७	चं	श	बृ	मं
८	शु	बु	च	श

शनिरात्रि

अर्धप्रहर	१ दण्ड	२ दण्ड	३ दण्ड	४ दण्ड
१	श	बृ	मं	र
२	बु	चं	श	बृ
३	र	शु	बु	चं
४	बृ	मं	र	शु
५	चं	श	बृ	मं
६	चं	बु	चं	श
७	मं	र	शु	बु
८	श	बृ	मं	र

अत्रोदाहरणम् । संवत् १९३६ शकः १८०१ चैत्रकृष्णत्रयोदश्यां सोमवासरे दण्डादिकं ३२।५७ पूर्वभाद्रनक्षत्रं दण्डादिकं ३८।२१ ब्रह्मयोगो दण्डादिः ५४।२६ विष्टिकरणम् । मीनार्कगतांशाः ११।२६।२२।१० दिनमानं ३१।६ रात्रिमानं २८।५४ श्रीमन्मार्त्तण्डमण्डलार्द्धोदयादिष्टं ४५।३३ एवं पञ्चाङ्गशुद्धौ कार्मुकलग्नोदये कस्यचिज्जन्म ।

अथ रात्रिमानमिदं २८।५४ अष्टभिर्भक्तं लब्धमर्धयामप्रमाणं ३।३६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्कालिकाः सगतिकाः स्पष्टखेटाः

सू	चं	मं	बु	बृ	शु	श	रा
११	११	२	११	११	११	११	८
२६	४	४	६	९	१	२६	२०
२२	५२	५६	४९	३१	३४	३	३१
१०	०	५५	५१	३६	३८	२	४१
५८	७७५	३४	७	१४	७३	७	३
४६	१	९	३	२६	५६	५०	११

जन्माङ्गचक्रम्



४५ अथरात्रिगतप्रमाणेऽस्मिन् १४।२७ अर्धयामसङ्ख्याज्ञानार्थं पूर्वानीतार्धयामप्रमाणं चतुर्गुणं जातं १४।२७ परञ्चेदं रात्रिगतप्रमाणेन समं स्यात्तेन चतुर्थयामार्धविरामे विहित बालस्य जन्म स्यात् । अतो यामार्धेशपरामर्शेन यामार्धेशः शनिः । अत्र दण्डेश्वरावगमार्थं यामार्धमानस्यास्य ३।३६।४५ चतुर्थांशेनानेन ०।५४।११ दण्डाख्यप्रमाणं जातम् ०।५४।११ परञ्चास्य चतुर्गुणाय विरामे जन्म स्यात्तेनात्र दण्डेशविचारादत्रार्को दण्डेशो जातः ।

अथ 'ग्रहदानविचारे तु अन्त्ये मेषं विनिर्दिशेत्'
इति सूत्रेण जातं त्रिपताकीचक्रस्वरुपम् । अग्रे निर्दिष्टम् ।

अत्रार्धयामेशः तथा दण्डेशश्चार्कः स च पापः । अत्र कार्मुकरूपस्य जन्मभस्य केनचिद्ग्रहेण सह पूर्वकथितदक्षादिवेधो नास्ति तेनात्र वेधत्रयाभावे सति 'जन्मलग्नात्क्रूरग्रहाक्रमेण' इति रीत्या जन्मलग्नगतदण्डनिष्ठो राहुः । तेन एकोनत्रिंशमानेन बालस्य रिष्टं जातम् । अत्रेदमवधेयम् । अर्धयामदण्डेशयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिपताकीचक्रम्



पापत्वे सति तथा पापग्रहजनिते वेधे सति बालस्य मरणं ग्रन्थकारेण विहितम्। एवं यामार्धेशे दण्डेशे च पापे सति तथा यदि वेधाभावस्तदा बालस्यारिष्टमात्रं स्यादर्थादरिष्टं लब्ध्वा जीवेत्। अत्राचार्येणारिष्टपरामर्शे तु दण्डेशस्याति मुख्यत्वं विहितम्। अत्रोदाहरणे तु दण्डेशस्य तथार्धयामेशस्य पापत्वं एवं जन्मलग्ने राहुग्रहः पापरूपोस्ति तथा वेधाभावः परञ्च जन्मलग्नोपरि शनेः पूर्णदृष्टिः स्यात्तेन जन्मलग्नाङ्कमानेन महदरिष्टस्य भोगं कृत्वा जीवेत्। अत्रैवं यदि पापग्रहजनितो वेधश्चेत्तदा 'अशुभे दण्डसंयोगे सर्वत्र शुभवर्जिते' इत्यादि पद्यबलादवश्यमेवास्य बालस्य मरणं भवेत्। अथ कदा तदरिष्टं भवेदित्युच्यते। अत्रं तु गुरुभार्गवौ चतुर्थस्थानगौ तथा शुक्रः स्वशीघ्रोच्चगस्तथा गुरुस्तु स्वशीघ्रोच्चगतोनास्ति परञ्च स्वराशिगतस्तेन 'वर्गोत्तमे स्वतुङ्गे वा केन्द्रे वा गुरुभार्गवौ' इति विहितपद्यानुसारेण लग्नाङ्केन द्वाविंशतिमितेन दिनमानेनास्य बालस्य रिष्टंबोध्यम्। परमत्रापि बलाबलग्रहस्य दृष्टिवशाद्विहितदिनानामप्यधिकाल्पं चानुक्तमपि निजमत्या विभावनीयम। अथ यत्र मासविषयकं वा वर्षविषयकं चारिष्टमायाति तदा तत्र कस्मिन्दिने तदरिष्टं भवेदिति जिज्ञासाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुच्यते । यस्मिन् दिने वेधकारकखेटेन सह चन्द्रस्य योगो भवेत्तद्दिने मृत्युर्यद्वा कर्कतुलाराश्योर्मध्ये कस्मिनपिराशौ स्थितश्चन्द्रो वेधकारक ग्रहेण सह वेधं करिष्यति तदा बालस्य मरणं भवेत् । तदुक्तं नरपति समाख्यग्रन्थे 'यद्दिने वेधयेच्चन्द्रस्तद्दिने स्याच्छुभाशुभम्' अत्र त्रिपताकीचक्रजस्यारिष्टस्यापगमाय दानपदार्थमुच्यते । रक्तवस्त्रं शर्करा तथा पाषाणपात्रं गव्यदुग्धपूरितम् । तदशक्तौ प्रवालं विद्रुमं वेधकारकग्रहस्य विहितधान्यं तथा दण्डेशस्य धान्यं तिल-तण्डुलानि च । तथा ग्रन्थान्तरेविशेषः—

धान्यं मुद्गाश्च माषाश्चतिलाश्चस्वेतसर्षपाः ।
लौहं प्रवालं घटितं घृतं गव्यंस्वशक्तितः ॥
वेधकग्रहरूपेण धान्यमानं नवांशकैः ।
वर्षाङ्काद्वस्त्रमानं च स्वर्णमानं स्वशक्तितः ॥
घृतार्धप्रमितं खण्डं तिला लोहाच्चतुर्गुणाः ।

अथान्योविशेषः कर्मविपाके—

वेदाध्ययनसम्पन्नं याचितारमकिञ्चनम् ।
ब्राह्मणं दातुमाहूय दानार्थं न ददाति यः ॥
बालानां हिंसकश्चैव बहुव्याध्यादिमान् भवेत् ।
शूलादिदुष्टरोगाद्यः सदा दुःखस्य भाजनम् ॥
पापग्रहकृतोवेधस्तं नित्यं पीडयेद्भृशम् ।

अथ तद्दोषापगमाय त्रिशूलदानं वायुपुराणे—

कृष्णपक्षे चतुर्दश्यां अष्टम्यां वा सितेतरे ।
कुर्याद्द्वादशनिष्केण त्रिशूलं लक्षणान्वितम् ॥

अत्र सुवर्णमानं निष्कचतुष्टयं वा सुवर्णसंज्ञकं वा षट्पञ्चाशदधिक-शततौल्यञ्चेति त्रिधा विकल्पः । तदशक्तौ यथा शक्तिस्तथा विधेयम् । तत्र पात्रे त्रिशूलं स्थापयित्वा यथाविधि पञ्चोपचारैश्च रुद्रप्रकाशकवैदिकमन्त्रेण तथा त्रिशूलाय नमः इति नाममन्त्रेण तत्सम्पूज्य ततोऽघोरमन्त्रेण प्रणिपत्य ततो यथा विभवेन द्विजं च पूजयेत् । ततः सङ्कल्पः—

ऊँतत्सत् अद्येत्यादि अस्य बालस्य त्रिपाताकीचक्रे अमुकग्रहजनितलाङ्ग-लसन्मुखवेधगतदण्डार्धयामेशपापग्रहसंसूचिताशेषरिष्ट झटितिप्रशमन पूर्वक-दीर्घायुष्यबल पुष्टिनैरुज्यप्रप्तिकामाय इदं दुग्धपूरितं पाषाणपात्रं तथा अल्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृत्युप्रशमनाय सौवर्णं त्रिशूलं तथा धृतं शर्करां अन्नानि वस्त्रसुवर्णतिलान्नं लौहं प्रवालं ताम्रं ब्राह्मणाय अहं ददेत् । अत्र तत्तद्वस्तुनि स्वस्वदैवतमिति योजनीयम् । तत्र पाषाणस्य धर्मराजः। त्रिशूलस्य मृत्युञ्जयः। घृतस्यग्निः । शर्करायाः वरुणः। अन्नानां प्रजापतिः। वस्त्रस्य बृहस्पतिः । सुवर्णस्याग्निः । तिलान्नस्यब्रह्मा । लोहस्य शनिः । प्रवालस्य भौमः । ताम्रस्य सूर्यः । इति दैवतं बोध्यम् ।

अथ त्रिपाताकीचक्रप्रकारेण वर्षारिष्टविचारस्तु मदुक्तजातकक्रोडाभिधे ग्रन्थे द्रष्टव्यः । अत्रायं विशेषः । स्वशेषाङ्केन राहुकेतु रहितौ विधेयावर्थादुत्क्रमात्तौ लेख्यौ । अत्र तयोर्विपरीतचलनात्तथा विशेषग्रन्थस्वरसाच्चेयं कल्पना समीचीना । तथा मतान्तरे तु गताब्दभानो षड्भिर्भक्ते शेषाङ्कतुल्यराशौ राहुभौमौ लेख्यौ । अथ मतान्तरे वर्षपातकीचक्रस्यापि केतुपताकीचक्रसंज्ञा कृता । अस्मिन् चक्रे चन्द्रभौमयोर्यद्वा राहुमन्दयोरेकनाड्यां मिथो वेधस्तदा तस्मिन् समये महदरिष्टं भवति । अत्र यदिराहुजीवयोर्वेधस्तदा कष्टम् । तथा पापवेधेन हानिर्वाच्या । तथा शुभग्रहवेधेन वृद्धिर्वाच्या । एवं पापशुभग्रहजनिते वेधे मिश्रफलम् । यथा मुक्तावल्यामुक्तम्—

'स्वर्भानुविद्धे हिमगौ च कष्टं तापोर्कविद्धेऽथ रुगार्किविद्धे ।
महीजविद्धे तु शरीरपीडा शुभैश्च विद्धे जयसौख्यमुक्तम् ॥'
शुभाशुभव्योमगवीर्यतोऽत्र फलं च वर्षस्य वदेत्सुधीभिः ।

तथा स्वरपञ्चाशिकायां विशेषरूपेण फलमुक्तम्—

मन्देनपीडा रविणाऽस्त्रभीतिः पीडार्थनाशौ रुधिरेण विद्धे ।
निमीलनं राहुशिखिव्यधेन स्याल्लाभसौख्यं शुभखेटवेधे ॥

उच्चादिपद संयोगात्तारतम्यात्फलं वदेत् ॥
द्वित्र्यादिखचरैर्वायंदुष्टं पुष्टं शुभं तथा ॥

एवं मासप्रवेशलग्नवशात्तथा दिनप्रवेशलग्नवशात्सञ्जाते त्रिपताकीचक्रे चन्द्रस्य पापग्रहेण सह वेधस्तदा नेष्टं फलं स्यात् । तदुक्तम् ''वर्षे मासे दिने नाड्यां वेधं ज्ञात्वा फलं वदेत्'' । अत्रास्मिन् चलवर्षे मासे वा वेधे सति तथादण्डेशस्य पापत्वे सति ''चलवर्षे यदा वेधः'' इति पूर्व विहितपद्यानुसारेण मृत्युर्बोध्यः ।

श्रीकृष्णदत्तेन कृतातिरम्या टीका सुगम्या च सुबोधिनी या ।
तस्यां पताकीजनितं सुचक्रं शिशोरसत्सत्फलदं प्रपूर्णम् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी—रात्रि में यदि दण्डेश का ज्ञान करना हो तो **सूर्य के** अर्द्धयाम में क्रमशः रवि-शुक्र-बुध-चन्द्रमा ये चारों ग्रह दण्डेश होते हैं। **चन्द्रमा के** अर्द्धयाम में चन्द्र-शनि-गुरू-भौम, **मंगल के** अर्धयाम में मङ्गल-रवि-शुक्र-बुध, **बुध के** अर्द्धयाम में बुध-चन्द्रमा-शनि-बृहस्पति, **बृहस्पति के** अर्द्धयाम में बृहस्पति-मङ्गल-रवि-शुक्र, **शुक्र के** अर्द्धयाम में शुक्र-बुध-चन्द्र-शनि तथा **शनि के** अर्धयाम में शनि-बृहस्पति-मङ्गल और सूर्य—ये रात्रि में क्रमशः दण्डेश होते हैं जो पूर्व में चक्र द्वारा स्पष्ट है।

सर्वप्रथम अर्द्धयाम प्रमाण का साधन करना चाहिये। यदि दिन का इष्टकाल हो तो दिनमान में आठ से भाग देना चाहिये तथा यदि रात्रि का इष्टकाल हो तो रात्रिमान में आठ से भाग देना चाहिये। यहाँ रात्रि का इष्टकाल (४५।३३) है अतएव रात्रिमान २८।५४ में आठ का भाग दिया तो लब्धि ३।३७ प्राप्त हुआ। यही एक अर्द्धयाम का मान हुआ। रात्रि के इष्ट ४५।३३ में दिनमान ३१।६ घटाया तो १४।२७ हुआ इसमें रात्रि के अर्द्धयाम ३।३७ से भाग दिया तो लब्धि ३ (शेष ३।३६) मिला यह लब्धि ३ गत अर्द्धयाम हुआ। अब लब्धि में १ जोड़ दिया अतएव ४थे अर्द्धयाम में जन्म हुआ तो 'रात्रौ पञ्च क्रमेणैव' अर्द्धयामेशानयन प्रकार से चन्द्रवार को रात्रि में ४था अर्द्धयामेश शनि हुआ। इसी प्रकार दिन के इष्टकाल में दिन के अर्द्धयाम प्रमाण से भाग देकर 'दिवा षट् क्रमेणैव' से अर्द्धयामेशानयन करना चाहिये।

अब दण्डेश के ज्ञान के लिये अर्द्धयाम प्रमाण ३।३७ में ४ से भाग दिया लब्धि ०।५४।१५ यह दण्ड प्रमाण हुआ। यहाँ ३ अर्द्धयाम का प्रमाण गत हो चुका है ४थे अर्द्धयाम में ३ घटी ३६ पल बीत चुका है अतएव चौथे अर्द्धयाम के चतुर्थ दण्ड में जन्म हुआ अब यहाँ 'रात्रौ षट् क्रमेणैव' इत्यादि दण्डेशानयन विधि से सूर्य दण्डेश हुआ।

बालारिष्ट विचार के लिये 'ग्रह दान विचारे तु अन्त्ये मेषं विनिर्दिशेत्' इस सूत्र से त्रिपताकी चक्र लिखकर 'एकोनविंशतिः कर्के सिंहे सप्तदशैव तु' इत्यादि से अङ्कों का न्यास करके बालारिष्ट का निश्चय किया जाता है ॥ ६१ ॥

सत्येन्द्रमिश्र कृत 'प्रज्ञावर्द्धिनी' हिन्दीटीका में पञ्चस्वरा का त्रिपताकीचक्रविचाराध्याय प्रथम समाप्त ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आयुर्दायविचाराध्यायः—२

स्वमतप्रकटीकरण—

चतुर्विंशति वर्षोर्ध्वमायुर्दायं विचिन्तयेत् ।
साधारणा न जानन्ति कठिनं विषमं ध्रुवम् ॥ १ ॥
वराहाद्यैश्च तत्वज्ञैर्यः कृतो निर्णयः पुरा ।
तदुद्देशेन वक्तव्यं यत्किञ्चिज्ज्ञायते मया ॥ २ ॥
निदानस्य यथा तत्वं स्वभावाद्रिष्ट निर्णयः ।
गुरोरुद्देश्य गम्यश्च बुध्यते नतु चान्यथा ॥ ३ ॥

अन्वयः—चतुर्विंशति वर्षोर्ध्वं आयुर्दायं विचिन्तयेत् साधारणाः न जानन्ति विषमं कठिनं ध्रुवम् ।

वराहाद्यैः पुरा यः निर्णयः कृतो मया तदुद्देशेन यत्किञ्चित् ज्ञायते (तत्) वक्तव्यम् ।

स्वभावात् निदानस्य यथा तत्वं (तथैव) अरिष्ट निर्णयः गुरूरुद्देशगम्यः अन्यथा तु न बुध्यते ॥ १-३ ॥

संस्कृतः–गणकश्चतुर्विंशतिवर्षोर्ध्वं जन्मतश्चतुर्विंशतिमितेभ्यो गताब्देभ्यः परमायुर्द्दायं वक्ष्यमाणविधिना चलचक्रादिविचारं विचिन्तयेद्विचारयेत् । तदायुर्द्दायविचारं साधारणा अल्पज्ञानरा न जानन्ति । कथम्भूतं तद्यतो ध्रुवं निश्चितं विषमं किन्त्ववगन्तुमशक्यम् । कुतो यतः कठिनमिति ।

तत्वज्ञैर्मुख्यार्थज्ञैर्वराहाद्यैराचार्यैः पुरा पूर्वसमये यो निर्णयः किन्त्वायुर्दायविचारः कृतः । मया प्रजापतिदासेन तदुद्देशेन तत्कथनानुसारेण यत्किञ्चिज्ज्ञायते यथामति स्वल्पमपि यदवगतं तद्वक्तव्यमिति ।

यथा स्वभावान्निदानस्य तत्वं तथारिष्टनिर्णयः कथितारिष्टविचारो गुरोरुद्देशगम्यः किन्तु गुरुपदेशेनावगन्तुं योग्यः । अन्यथा गुरूपदेशं विना न बुध्यते ॥ १-३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी—चौबीस वर्ष के अन्दर अरिष्ट का ही विचार करना चाहिये आयुर्दाय का नहीं। इसी की पुष्टि के लिये ग्रन्थकार यहाँ कह रहे हैं कि चौबीस वर्ष के अवस्था के बाद आयुर्दाय का विचार करना चाहिये परन्तु उसे साधारण दैवज्ञ नही जान सकते हैं क्योंकि आयुर्दाय विचार कठिन तथा विषम होता है और इस मृत्यु (ध्रुव) का एक न एक दिन होना निश्चित हैं तो यह निश्चित ध्रुव कब होगा यह जानना अत्यन्त ही कठिन और विषम होता है।

अत: श्रीवराहमिहिराचार्यादि तत्वज्ञों द्वारा जो पूर्व में निर्णीत है उसी के अनुसार जो कुछ मुझे ज्ञात है वही मैं कहता हूँ।

अरिष्टादि निर्णय की प्रत्यक्ष जो विधि है वह गुरु द्वारा ही ज्ञात हो सकता है अन्यथा गुरु के विना जानना कठिन होता है क्योंकि गुरु अनुभवसिद्ध रहता है ॥ १-३ ॥

वर्षफल कथन वर्षलग्न साधन—

जन्मलग्नं समारभ्य गतवर्षाणि योजयेत्।
द्वादशस्विह भावेषु ग्रहैर्वाच्यं शुभाशुभम् ॥ ४ ॥

अन्वयः—जन्म लग्नं समारभ्य गतवर्षाणि योजयेत् इह द्वादशसु भावेषु ग्रहैः शुभाशुभं (फलं) वाच्यम् ॥ ४ ॥

संस्कृतः—जन्मलग्नं समारभ्य जन्मकालिकं लग्नं मेषादेर्गणयित्वा यन्मितं स्यात्तत्र गतवर्षाणियोजयेत्। इह द्वादशसु भावेषु ग्रहैः शुभाशुभं फलं वाच्यं कथनीयम्। अयं भावः। स्वजन्मलग्ने गतवर्षमानं योज्यं तद्यदि द्वादशाधिक तदा द्वादशभिर्विभज्य शेषमितं वर्षलग्नं कल्पयित्वा ततो भावग्रहानुसारेण तद्वर्षस्य शुभाशुभं बोध्यम्। अर्थान्नीलकण्ठाचार्योक्तमुन्थहाभावमधिकृत्य सामान्यतया वर्षफलं ज्ञेयम्।

तत्फलं ग्रन्थान्तरे—

'व्यन्त्यारिस्थैः सौम्यखेटैः पापैस्त्र्यायारिगैः शुभम्।
केन्द्रकोणाष्टगो राहुः पापाश्चान्त्ये शुभा मुदे ॥ ४ ॥

हिन्दी—जन्मलग्न में गत वर्षमान को जोड़ने पर यदि वह १३ से अधिक हो तो १२ से भाग देकर शेष संख्या तुल्य मेषादि को वर्ष लग्न मानकर भाव ग्रहानुसार शुभाशुभ वर्षफल कहना चाहिये ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षेश्वर साधन—

वर्षेश्वरं समारभ्य नक्षत्राङ्कविधानतः ।
वत्सरं कल्पनीयञ्च फलं तद्वच्च कल्पयेत् ॥ ५ ॥

अन्वयः—वर्षेश्वरं समारभ्य नक्षत्राङ्क विधानतः वत्सरं कल्पनीयं तद्वत् फलं च कल्पयेत् ॥ ५ ॥

संस्कृतः—वर्षेश्वरं समारभ्य वक्ष्यमाणविधिना वर्षेशमवगम्य तमारभ्य नक्षत्राङ्कविधानतः कथितनक्षत्राङ्कमानेन वत्सरं कल्पनीयं बोधव्यम् । तद्वत्फलं च कल्पयेत् । अर्थाद्वक्ष्यमाणविधिना वत्सराधीशं बुध्वा तद्वशेन फलं कथयेत् । अनेन वर्षेश्वरविधिः प्रदर्शितः ॥ ५ ॥

हिन्दी—जन्मफल से अवस्था (वर्ष) का ज्ञान करके नक्षत्राङ्क विधि से तथा—

रविचन्द्रार सौम्याश्च शनीज्यौ राहु केतवः ।
अन्त्ये शुक्रस्त्रिरावृत्या कृत्तिकादि क्रमाद् भवेत् ॥

इसके अनुसार केतु कुण्डली और गुरु कुण्डली से वर्षेश्वर का ज्ञान करके फल समझना चाहिये ॥ ५ ॥

वर्षारम्भविधि कथन—

कार्तिकान्तनवाहानि जन्म मास दिनावधि ।
दिनानि चैव मासाश्च गतवर्षे नियोजयेत् ॥ ६ ॥

अन्वयः—कार्तिकान्त नवाहानि जन्ममास दिनावधि दिनानि मासाश्च गतवर्षे नियोजयेत् ॥ ६ ॥

संस्कृतः—कार्त्तिकान्तनवाहानि कार्त्तिकमासान्तात्पूर्वं नवदिनान्यारभ्य जन्ममासदिनावधि स्वजन्ममासदिनपर्यन्तं यानि दिनानि ये च मासास्तान्विगणय्य गतवर्षे नियोजयेत् । अत्रायं भावः । कार्तिकमासस्येकविंशतिदिनात्परं किन्तु कार्त्तिकशुक्लसप्तमीतिथिं समारभ्य जन्ममासस्य दिनपर्यन्तं दिनवृन्दं गणयित्वा तद्गतमासदिनानि गतवर्षे योज्यानि पुनर्द्वितीयवर्षारम्भः कार्त्तिक-शुक्ल सप्तम्याम् । अत्र सावनमानेन वर्षारम्भो विधेयः । अनेन वर्षारम्भविधि प्रदर्शितः ॥ ६ ॥

हिन्दी—आगे स्वर ज्ञान हेतु आचार्य ने वर्ष को कार्तिक शुक्ल सप्तमी से प्रारम्भ कर—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'कार्तिकस्य परे भागे नवग्राह्या यथा तथा
मार्ग पौषा तथा देयं माघस्य च दिनत्रयम् ।
एवं क्रमेण दातव्यो वर्षं पूर्णं यथा भवेत्''

इसविधि से वर्ष के पाँच विभाग किये हैं । अतएव यहाँ पर कार्तिक शुक्लः सप्तमी से आरम्भ कर जन्ममास के दिन पर्यन्त गतमास तथा गतदिन को गतवर्ष में जोड़ देना चाहिये अर्थात् ग्रहण कर लेना चाहिये पुनः द्वितीय वर्ष का प्रारम्भ कार्तिक शुक्ल सप्तमी को समझना चाहिये ॥ ६ ॥

केतुपताकी चक्रज्ञान—

रविचन्द्रार सौम्याश्च शनीज्यौ राहुकेतवः।
अन्त्ये शुक्रस्त्रिरावृत्या कृत्तिकादिक्रमात् भवेत् ॥ ७ ॥

अन्वयः—कृत्तिकादि क्रमात् रवि-चन्द्र-आर-सौम्याः शनि -ईज्यौ राहु केतवः अन्त्ये शुक्रः त्रिः आवृत्या भवेत् ॥ ७ ॥

संस्कृतः—रविचन्द्रारसौम्याः, ततः शनीज्यराहुकेतवः, अन्त्ये शुक्रः, एते कृत्तिकादिक्रमात्कृत्तिकानक्षत्रादि जन्मनक्षत्रवशात्त्रिरावृत्या वारत्रयेण वर्षेश्वराः स्युः । अत्रेदमवधेयम् । यस्य प्रथमकृत्तिकानक्षत्रे जन्म तस्य प्रथमाब्दपो रविः। द्वितीयवर्षेशश्चन्द्रः, ततस्तृतीयाब्दपः कुजः, चतुर्थाब्दपो बुधः, ततः शनिः, तदग्रे गुरुः, ततो राहुः, ततः केतुः एवं नवमवर्षेशःशुक्रः इति प्रथमावृत्तिः । द्वितीयावृत्तौ तु दशमवर्षादारभ्य पूर्ववत्कलनया चाष्टदशाब्दपो भृगुः, ततस्तृतीयावृत्तावेकोन विंशतिवर्षादारभ्य कथितगणनया सप्तविंशतिवर्षाधिपति शुक्रः । एतेन केतुपताकीचक्रं प्रदर्शितम् । परञ्चेदमेव बहुसम्मतम् । अर्था-

केतु चक्रम्

ग्रह	सू	चं	मं	बु	श	बृ	रा	के	शु
नक्षत्र	कृ	रो	मृ	आ	पु	पु	आ	म	पू
	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू
	उ	श्र	ध	श	पू	उ	रे	अ	भ
वर्ष	६	१५	८	१७	१०	१९	६	६	२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दस्मादेव केतुपताकीचक्रजनितो वर्षेशो ग्राह्य इति ज्योतिर्विदां सम्प्रदायः तथाकृते सति तच्चक्रम् जातम् ।

कृष्णदत्तीयसूत्रम्—

गताब्दैर्युता जन्मनक्षत्रसङ्ख्या
दृगूना विभक्ता ग्रहैः शेषकाद्वै ।
अधीशाः क्रमादर्कचन्द्रारसौम्या
शनीज्यौ तमःकेतुशुक्राःस्युरत्र ॥

जन्मनक्षत्रसङ्ख्या अश्विन्यादितो निजजन्मनक्षत्रसङ्ख्या गताब्दैः स्वजन्मतो गतवर्षप्रमाणेन युता सहिता कार्या । पुनः सा दृगुना द्वाभ्यां हीना कार्या पुनः सा ग्रहैर्नवभिर्विभक्ता यच्छेषं तस्मादर्कचन्द्रारसौम्याः तथा शनीज्यौ तमकेतुशुक्रा एते क्रमादत्र केतुपताकीचक्रे चाधीशाः स्युः । अत्रोपपत्तिः । मदुक्तजातकक्रोडाभिधग्रन्थस्यमुद्दादशानयनस्य वासनावदवधेयेति ॥

अत्रोदाहरणम् । तद्यथा कृष्णदत्तस्य मघानक्षत्रे जन्म तेनात्र प्रथमवर्षाधिपस्तन्नक्षत्रोपरि गतः केतुः ततः पूर्ववद्गणनया ग्रन्थारम्भे चैकचत्वारिंशन्मितस्य वर्त्तमानवर्षस्य पतिः पुनः कुजग्रह एव स्यात् । अथ मदुक्तसूत्रेण यथानक्षत्रसंख्या दशमिता (१०) सा गतवर्षप्रमाणेनानेन (४०) सहिता मानं पञ्चाशन्मितं (५०) इदं दृगूनितं सदष्टचत्वारिंशन्मितं स्यात् (४८) इदं नवभिस्तष्टं (३) तेनात्र वर्षाधिपो भौमः । एवमन्यत्रापि विभाव्यम् । तथाऽन्यैरुक्तम् ।

'अर्केन्दुभौमज्ञशनीज्यराहुकेत्वास्फुजिच्चाग्निभतः पताक्याम् ।
वारत्रयं भानि विलिख्य केतोर्जन्मर्क्षतो वर्षपतिर्गताब्दैः' ॥

तथान्यदपि भाषायं—

चारिरेखा अवधरव्यादिग्रहमण्डल ।
रविचन्द्रमङ्गलबुधशनिगुरु राहुकेतुशुक्र अन्ते जानि ।
कृत्तिकादि ऋक्षप्रमाण वामावर्त्त एकरभाग इति ॥ ७ ॥

हिन्दी—कृत्तिका नक्षत्र से तीन आवृत्तियों में सूर्य-चन्द्र-मङ्गल-बुध-शनि-गुरु-राहु-केतु और शुक्र क्रम से वर्षेश होते हैं । यदि कृत्तिका नक्षत्र में जन्म हो तो प्रथम वर्ष के दशास्वामी या वर्षेश सूर्य हुए द्वितीय वर्षेश चन्द्रमा तृतीय वर्षेश मङ्गल इसी तरह नवम वर्षेश शुक्र और पुनः दशम वर्षेश सूर्य से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आरम्भकर अठारहवें का शुक्र इसी तरह उन्नीसवें वर्ष सूर्य से प्रारम्भ कर सत्ताइसवें वर्ष का स्वामी शुक्र हुआ।

द्वितीयावृत्ति में भी अट्ठाईस २८वें वर्ष से प्रारम्भ कर ५४ वर्ष तक उपरोक्त क्रम से सूर्यादि स्वामी होते हैं। इस तरह तृतीय-चतुर्थ-आवृत्ति में भी यही क्रम जानना चाहिये। इसमें विशेषता यह है कि कृत्तिका से अन्य नक्षत्रों में जिनका जन्म हो उनके वर्षेश विचार में कृत्तिकादि क्रम से जन्मनक्षत्र का जो स्वामी हो वही प्रथम वर्षेश होता है तथा उसी पूर्वोक्त रीति से वर्षाधीश का निर्णय भी किया जाता है।

जैसे किसी का जन्मनक्षत्र मृगशिरा है तो कृत्तिकादि के क्रम से प्रथम वर्षेश भौम होगा और भौम के क्रम से ही द्वितीयादि क्रम में वर्षस्वामी भौम-बुध-शनि-बृहस्पति-राहू-केतु-शुक्र-सूर्य-चन्द्र होंगे ॥ ७ ॥

केतुपताकीचक्रजनित वर्षेशफल कथन—

रविणा भ्राम्यते देशः सन्तापो व्याधिपीडनम्।
कान्ता रोगं ज्वरं शोकं करोति च भयातुरम्॥ ८ ॥
चन्द्रे पुष्टिर्धृतिस्तुष्टिः सुखं सम्पत्तिरेव च।
आरोग्यं लभते कामो धन पुत्रसमन्वितः॥ ९ ॥
भौमे सदा मर्म रोगः कार्यहानिर्भवेद् ध्रुवम्।
क्षुद्र कर्म रतिर्न्नित्यं मनस्तापो दिने दिने ॥ १० ॥
बुधे च राजसन्मानं पुत्र लाभस्तथा सुखम्।
धनस्यचागमो नित्यं तथा ज्ञानं दिने दिने ॥ ११ ॥
शनौ रोगं भयं शोकं बन्धनं क्षयमेव च।
अर्थहानिमभाग्यञ्च प्राणनाशं करोति वै ॥ १२ ॥
सचाङ्गाभरणं कण्ठे स्वर्णहार विभूषणम्।
जीवे च राजसन्मानं लोके पूजा धनागमः ॥ १३ ॥
रक्तस्त्रावो भवेदङ्गे राहौ वर्षे जनस्य च।
विदेशगमनं चैव वह्नि वारि भयन्तथा ॥ १४ ॥
राज कार्यभयं चौर्य गृहदाहोत्थ बन्धनम्।
अवश्यं च भवेदेते केतोः सम्वत्सरे पुनः॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्र पौरुष सत्ख्यातिः पुष्टि सर्व सुखानि च ।
मुक्ता रत्न प्रवालादि धनलाभो दिने दिने ॥ १६ ॥

अन्वयः—देश: भ्राम्यते सन्ताप:-व्याधिपीडनं कान्तारोगं-ज्वरं-शोकं-भयातुरं च रविणा (फलं) करोति ।

पुष्टिः धृतिः तुष्टिः सुखं सम्पतिः आरोग्यं कामो धनपुत्रसमन्वितः एव च चन्द्रे लभते ।

सदा चर्मरोगः कार्यहानिः क्षुद्रकर्म नित्यं रतिः दिने दिने मनस्तापो ध्रुवं भौमे वदेत् ।

राजसन्मानं तथा च पुत्रलाभः नित्यं धनस्य आगमो तथा दिने दिने ज्ञानं च बुधे (भवति) ।

रोगं भयं शोकं बन्धनं क्षयं एव च अर्थहानि अभाग्यं प्राणनाशं च शनौ वै करोति ।

स च अङ्गाभरणं कण्ठे स्वर्णहारविभूषणम् राजसम्मानं लोके पूजा धनागमश्च जीवे (भवति) ।

रक्तस्रावो अङ्गे भवेत् विदेशगमनं चैव वह्नि वारिभयं तथा राहौ वर्षे जनस्य (भवति) ।

राजकार्यभयं चौर्यं गृहदाहोत्थ बन्धनं केतोः सम्वत्सरे पुनः अवश्यं च एते भवेत् ।

पौरुष सत्ख्यातिः पुष्टिः सर्वसुखानि मुक्ता रत्न प्रवालादि दिने दिने धनलाभो च शुक्रे (भवति) ॥ ८-१६ ॥

संस्कृतः—श्लोकाः सरलार्थयुक्ताः ।

अथ खेटानां दशामानद्योतकं कृष्णदत्तीयसूत्रम्—

रवौ रसा वै तिथयः शशाङ्के कुजे च नागा विधुजेऽद्रिचन्द्राः ।
अभ्रेन्दवः सूर्यसुते सुरेज्ये नन्देन्दवोस्त्वर्द्धतनौ रसाश्च ॥
रूपाश्विनः पूर्वसुरेन्द्रपूज्ये बोध्या दशाब्दा गणकप्रवीणैः ।

अर्धतनौ राहौ केतौ च पञ्च दशाब्दाः । यद्यप्यत्र दशामानस्य प्रयोजनं नास्ति । यतोत्रैकैकवर्षसमो ग्रहभोगकालः स्वीकृतः । परञ्च तथापि चैक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मिन् वर्षे खेटानामग्रे दिनात्मकदशामानसाधनार्थमुपयोग्यास्ते पठिताः । अत्रोपपत्तिः । मदुक्तजातकक्रोडाभिधग्रन्थगताष्टोत्तरशतपरमायुर्दायकल्पनावशादवधेया ॥ ८-१६ ॥

पूर्वविहितभाषानुसारेण केतुपताकीचक्रद्वयम् ।

अत्र पूर्वापर रेखाचतुष्टयं तथा याम्योत्तररूपं रेखाचतुष्टयमित्यनेनाभिप्रायेण द्वितीयचक्रस्य स्वरूपं जातम् ।

चन्द्र	रवि		
४	३		
१३	१२	शु	११।२०।२
२२	२१		

म. ५।१४।२३ के. १०।१९।१ रा. ९।१८।२७

बु. ६।१५।२४ शु. ७।१६।२५ गु. ८।१७।२६

चन्द्र ४।१३।२२	सूर्य ३।१२।२१	शुक्र ११।२०।२
मंगल ५।१४।२३	केतु १०।१९।१	राहू ९।१८।२७
बुध ६।१५।२४	शनि ७।१६।२५	बृह ८।१७।२६

हिन्दी—पूर्वोक्त रीति से केतु पताकी चक्र से जो वर्षेश होते हैं उनका फल कहते हैं । यदि **सूर्य वर्षेश** हो तो वह देशभ्रमण, सन्ताप, रोगजनित पीड़ा, स्त्री को रोग-ज्वर-शोक और अत्यन्त भयभीत करता हैं ।

यदि **चन्द्र वर्षेश** हो तो पुष्टि-धैर्य-संतोष-सुख-सम्पत्ति आरोग्य लाभ-अभीष्ट कार्य की सिद्धि और धन पुत्र से संयुक्त करता है ।

यदि **मङ्गल वर्षेश** हो तो सर्वदा मर्म स्थान में रोग-कार्यहानि क्षुद्रकार्यों में रुचि और नित्य मनःस्ताप होता है ।

बुध वर्षेश हो तो राजा से सम्मान-पुत्रलाभ-सुख-सर्वदाधन की प्राप्ति और नित्यप्रति ज्ञान की वृद्धि होती है ।

शनि वर्षेश हो तो रोग-भय-शोक-बन्धन-शरीरादि का क्षयं-धन की हानि-दुर्भाग्य तथा प्राणनाश करता है ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहस्पति वर्षेश हो तो आभूषण से युक्त-कण्ठ, सोने के हार से सुशोभित राजा से प्रतिष्ठा और लोक (जन वर्ग) से आदर तथा धन प्राप्ति होती है।

राहु वर्षेश हो तो रक्तस्राव एवं विदेशयात्रा होती है तथा अग्नि और जल से भय होता है।

केतु के वर्ष में राजकार्य से भय-चौर भय गृहदाह और बन्धन (या चोर और गृह दाह से कष्ट) होता है।

शुक्रवर्षेश हो तो पराक्रम से प्रसिद्धि-पुष्टि-सभी सुखों की प्राप्ति मुक्ता रत्न और मूंगा आदि धनों की प्राप्ति नित्य होती रहती है ॥ ८-१६ ॥

एक वर्ष में ग्रहदशा मान—

रवौ नखा स्युः खशराः शशाङ्के
भौमेऽष्टयुग्मं विधुजेऽङ्गबाणाः।
शनौ त्रिरामाश्च गुरौ त्रिषष्टिः
नखादलाङ्गे भृगुजेः खशैलाः॥ १७ ॥

अन्वयः—रवौ नखाः शशाङ्के खशरा भौमे अष्टयुग्मं विधुजे अङ्गबाणाः शनौ त्रिरामाः गुरौ त्रिषष्टि दलाङ्गे (राहुः) नखाः भृगुजे खशैलाः च (अन्तर्दशा दिनानि) ॥ १७ ॥

संस्कृतः—दलाङ्गे राहौ केतौ च विंशतिः। एतानि दशामानानि दिनात्मकानि चैकैकर्षे विहितखेटानां स्युः। अत्राप्ययदीक्षितनाम्ना गणकेन तथान्यैरपि तट्टीकाकारैर्विहितदिनानि खेटानामन्तर्दशामानानि कल्पितानि तथा षडब्दादिसमानि दशामानानि कथितानि परञ्चैतानि च समीचीनानि। यतः एकैकग्रहस्यैकैकाब्दरूपो दशाभोगकालो मूलकारेण स्वीकृतस्तर्हि कथं षडब्दादिकं दशामानं सङ्गच्छते तथैकवर्षे पूर्वं दशामाननिरूपणमन्तरणे तदन्तर्दशामान कथनाप्रसङ्गः। तथा वासनाबहिर्भूतं तत्स्यात् अतो यैस्तदुक्तं ते सिद्धान्तविद्याबहिर्भूतास्तद्वासनां सुगमामपि न जानन्तीति प्रत्ययो मम जातः।

अत्रोपपत्तिः। यद्यष्टोत्तरशतमितेन परमायुर्दायेन षडब्दादिकं स्वस्वग्रहजं जन्मकालिकं दशामानं लभ्यते तदैकवर्षमितेन कल्पितपरमायुर्दायेन किमिति। फलं चैकवर्षे स्वस्वदशामानं वर्षात्मकं स्यादिति रूपं $\frac{(\text{स्व द} \times १)}{\text{परमा}}$ अत्रेदं खरसाग्निभिर्गुणितं सद्दिनात्मकं जातमिति रूपं $\frac{(\text{स्व द} \times ३६०)}{\text{परमा}}$ अत्र स्वस्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशामाने स्वस्वाङ्कमानेनोत्थापने कृते 'रवौ नखाः' इत्यादयः स्वस्वाङ्का उपपन्ना भवेयुः । अत्रमन्दानां प्रतीत्यर्थं धूलीकर्मणोच्यते । तद्यथा । रवेर्दशामानं जन्मकालिकं पूर्वकथितं षडब्दसममित्यस्य स्थापनवशाज्जातं पूर्वदिनात्मकं दशामानस्वरूपं $\frac{६ \times ३६०}{१०८} = \frac{६ \times १२ \times ३०}{१२ \times ९} = \frac{६ \times ३०}{९} = \frac{६ \times १०}{३} = \frac{२ \times १०}{१} = २०$ ।

अत्र चन्द्रदशामाने चाङ्कात्मकस्थापनावशाज्जातं $\frac{१५ \times ३६०}{१०८} = \frac{१५ \times १२ \times ३०}{१२ \times ९} = \frac{१५ \times ३०}{९} = \frac{१५ \times १०}{३} = \frac{५ \times १०}{१} = ५०$

एवमन्यग्रहाणामपि प्रतीतिरुत्पाद्या । अत उपपन्नं सर्वम् ।

तथा खनावाक्यम् ।

अर्कागरल २० शशि असजान ५०
अष्टविंशति कुज बुध छपन्ना जान ५६ ।
शनि तेतिसा ३३ गुरुत्रिषष्टि ६३
राहुकेतुचलिसा जान ४० शुक्रसतारि ७० कलपरिमान् ॥

पराशर मतेन अष्टोत्तरी दशासाधनम्—

सूर्यश्चन्द्रः कुजः सौम्यः शनिर्जीवस्तमो भृगुः ।
एते दशाधिपा प्रोक्ताः केतु हीना नवग्रहाः ॥

रसा६ पञ्चेन्दवो१५ नागाः८ शैलचन्द्राश्च१७ खेन्दवः१० ।
गोब्जा१९ सूर्यः१२ कुनेत्राणि२१ समाः प्रद्योतनादयः ॥

इति पाराशरोक्त वचनेन यद्यष्टोत्तरशतमितेन परमायुर्दशामानेन रसाब्दादिकं स्वस्वग्रहजं दशामानं लभ्यते तदैक वर्ष मितेन किमिति । फलं चैक वर्षे स्वस्वदशामानं $\frac{\text{स्व द.} \times १}{\text{परमायुद.}}$ = वर्षात्मकं जातमतो दिनात्मकं करणार्थ खरसाग्निभिर्गुणितं जातं रूपम् = $\frac{\text{स्व द.} \times ३६०}{\text{परमायुद.}}$ । तद्यथा प्रत्ययार्थं—

रवेर्दशा मानं = $\frac{६ \times ३६०}{१०८} = \frac{१ \times ३६०}{१८}$ = २० विंशति दिनानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं चन्द्र दशा मानं $= \frac{१५ \times ३६०}{१०८} = \frac{१५ \times १२ \times ३०}{१२ \times ९} = \frac{१५ \times १०}{३}$

= ५० पञ्चाशत् दिनानि । एवमन्येषां ग्रहाणामपि ज्ञेयं सुधीभिःकिम् बहुना ॥ १७ ॥

हिन्दी—पूर्व में एक-एक वर्षों का वर्षेश बतलाकर अब एक वर्ष के भीतर सभी ग्रहों का दिनात्मक दशामान बतलाते हैं । जैसे सूर्य का २० दिन, चन्द्रमा का ५० दिन, मङ्गल का २८ दिन, बुध का ५६ दिन, शनि का ३३ दिन, गुरु का ६३ दिन, राहु का २० दिन, केतु का २० दिन तथा शुक्र का ७० दिन होता है । इन सबों का योग ३६० दिन होता है । यह मान अष्टोत्तरी दशामान के अनुपात से दिया गया है ॥ १७ ॥

अन्तर्दशा साधन–

दशा दशाहता कार्या दशापिण्डविभाजिता ।
लब्धं दिनानि शेषानि शेषं षष्टिहतं पुनः ॥ १८ ॥
दशापिण्डेन भक्तं यल्लब्धमन्तर्दशाघटी ।
ततः पलात्मकं साध्यं विदशामानमेव हि ॥ १९ ॥

अन्वयः—दशा दशा हता कार्या दशापिण्ड विभाजिता लब्धं दिनानि शेषानि शेषं पुनः षष्टिहतम् ।

दशापिण्डेन भक्तं यल्लब्धं (तत्) अन्तर्दशा घटीः ततः पलात्मकं साध्यं एव हि विदशामानम् (भवेत्) ॥ १८-१९ ॥

संस्कृतः—दशा दशाहता कार्या सा पुनर्दशापिण्डविभाजिता दशायोगमानेन भक्ता लब्धं फलं यत्तानि गणकेन दिनानि ज्ञेयानि । पुनः शेषं षष्टिहतं षष्टिगुणं दशापिण्डेन दशायोगेन भक्तं यल्लब्धं फलं साचान्तर्दशाघटी स्यादर्थाद्दण्डात्मकं चान्तर्दशामानं स्यात् । ततः पलात्मकं साध्यं विदशामानमेवहि ।

अत्रायं फलितार्थः । यस्य दशाधिपस्य महादशायां यदन्तर्दशामानं ज्ञातुमभीष्टं तदा तद्दशाधिपस्य महादशामानमभीष्टानां ग्रहाणां स्वस्वदशामानैः पृथक् पृथक् संगुण्य सर्वेषां महादशामानयोगेन विभज्य फलं तद्दशाधिपस्य महादशायां स्वस्वान्तर्दशामानं स्यात् । एवमन्तर्दशामानमपि महादशामानं प्रकल्प्य पूर्ववद्विदशामानमपि बोध्यम् । अथवा मदुक्तजातकक्रोडाभिधग्रन्थनिष्ठेन लाघवप्रकारेणान्तर्दशादिकं साध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः । यदि खेटानां दशायोगेन परमायुर्दायेन स्वस्वदशामानं विंशतिदिनादिरूपं लभ्यते तदाभीष्टग्रहदशामानतुल्येन कल्पितपरमायुर्दायेन किमिति । फलमिष्टग्रहदशान्तर्गतस्वस्वान्तर्दशामानं स्यादिति रूपं [(स्वद × इद) ÷ दयो] एवमिष्टग्रहदशान्तर्गतानां स्वस्वान्तर्दशामानानां सर्वेषां योगमानं दशापिण्डाख्यम् । तथाऽभीष्टग्रहान्तर्दशामानं परमायुर्दायं चेति प्रकल्प्य पूर्ववदनुपातेन विदशादिकं साध्यम् । तेनोपपन्नं सर्वम् ॥

अत्रोदाहरणम् । तद्यथा रविदशामानमिदं (२०) रविदशामानेन गुणितं जातं (२० × २०) इदं दशामानयोगेनानेन (३६०) भक्तं जातं $\frac{२० \times २०}{३६०} = \frac{२० \times २}{३६} = \frac{५ \times २}{९} = \frac{१०}{९}$ फलं (१) शेषमिदं (१) षष्टिगुणं स्वहरेण भक्तं जातं $\frac{६०}{९} = \frac{२०}{३}$ फलं (६) पुनः शेषं (२) षष्टिगुणं स्वहरेण भक्तं जातं $\frac{२ \times ६०}{३} = \frac{२ \times २०}{१} =$ (४०) अतो रविदशायां स्वान्तर्दशामानं दिनादिकं जातं १।६।४० एवं रविदशामानं चन्द्रदशामानेन पञ्चाशन्मितेन गुणितं दशायोगेन भक्तं जातं $\frac{२० \times ५०}{३६०} = \frac{२० \times ५}{३६} = \frac{५ \times ५}{९} = \frac{२५}{९}$ फलं (२) शेषं (७) षष्टिगुणं स्वहरेण भक्तं जातं $\frac{७ \times ६०}{९} = \frac{७ \times २०}{३} = \frac{१४०}{३}$ अत्र फलं (४६) शेषं (२) षष्टिगुणं स्वहरेण भक्तं जातं $\frac{२ \times ६०}{३} = \frac{२ \times २०}{१} =$ (४०) अतो रविदशायां चन्द्रस्यान्तर्दशामानं दिनादिकं जातं २।४६।४० एवं सर्वेषां ग्रहाणां महादशायां स्वस्वान्तर्दशामानानि साध्यानि ॥ १८-१९ ॥

हिन्दी—जिस ग्रहदशा में जिस ग्रह की अर्न्तदशा साधन करनी हो उसके दशामान से दशाधिपति के दशामान में गुणाकर गुणनफल में सबग्रहों के दशामान के योग (दशापिण्ड) से भाग देने पर लब्धि अर्न्तदशा दिन, पुनः शेष को साठ से गुणाकर दशापिण्ड से भाग देने पर घटी एवं पुनः शेष को साठ से गुणाकर दशापिण्ड से भाग देने पर पल होता है । इसी तरह विदशा का साधन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करना चाहिये अर्थात् अन्तर्दशा मानों को दशामान कल्पना कर पूर्वोक्त रीति से विदशा का साधन करना चाहिये ॥ १८-१९ ॥

उदाहरण—जैसे रवि की दशा में रवि की अन्तर्दशा निकालनी है तो दशाधिपति रवि के दशा का मान =२०, अभीष्ट ग्रह के दशा का मान = २०। सभी दशाओं का योग = २०+५०+२८+५६+३३+६३+२०+२०+७० = ३६० = दशापिण्ड। चूँकि दशा दशाहता कार्या दशापिण्ड विभाजिता है अत: $\frac{२० \times २०}{३६०} = \frac{४००}{३६०}$ = लब्ध १ दिन, शेष ४० को साठ से गुणा कर दशा पिण्ड से भाजित करने पर $\frac{४० \times ६०}{३६०} = \frac{२४००}{३६०}$ = लब्धि ६ घटी, शेष २४० को पुन: साठ से गुणाकर दशा पिण्ड से भाग देने पर = $\frac{२४० \times ६०}{३६०}$ = लब्धि ४० पल। इस प्रकार रवि में रवि की अन्तर्दशा = १ दिन ६ घटी ४० पल। इसी प्रकार रवि में चन्द्रमा की अन्तर्दशा = $\frac{२० \times ५०}{३६०}$ = २ दिन ४६ घटी ४० पल। आगे सभी अन्तर्दशाओं का मान दिन-घटी-पल में निकाल कर रख दिया गया है।

अन्तर्दशाचक्र

सूर्य में				चन्द्र में				भौम में				बुध में			
र.	१	६	४०	चं.	६	५६	४०	मं.	२	१०	४०	बु.	८	४२	४०
चं.	२	४६	४०	मं.	३	५३	२०	बु.	४	२१	२०	श.	५	८	
मं	१	३३	२०	बु.	७	४६	४०	श	२	३४		बृ	९	४८	
बु	३	६	४०	श	४	३५		बृ	४	५४		रा	३	६	४०
श	१	५०		बृ	८	४५		रा	१	३३	२०	के	३	६	४०
बृ	३	३०		रा	२	४६	४०	के	१	३३	२०	शु	१०	५३	२०
रा	१	६	४०	के	२	४६	४०	शु	५	२६	४०	र	३	६	४०
के	१	६	४०	शु	९	४३	२०	र	१	३३	२०	चं	७	४६	४०
शु	३	५३	२०	र	२	४६	४०	चं	३	५३	२०	मं	४	२१	२०
२० दिन				५० दिन				२८ दिन				५६ दिन			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शनि में				गुरु में				राहु में				केतु में				शुक्र में			
श	३	१	३०	गु	११	१	३०	रा	१	६	४०	के	१	६	४०	शु	१३	३६	४०
बृ	५	४६	३०	रा	३	३०		के	१	६	४०	शु	३	५३	२०	र	३	५३	२०
रा	१	५०		के	३	३०		शु	३	५३	२०	सू	१	६	४०	चं	९	४३	२०
के	१	५०		शु	१२	१५		सू	१	६	४०	चं	२	४६	४०	मं	५	२६	४०
शु	६	२५		सू	३	३०		चं	२	४६	४०	मं	१	३३	२०	बु	१०	५३	२०
सू	१	५०		चं	८	४५		मं	१	३३	२०	बु	३	६	४०	श	६	२५	
चं	४	३५		मं	४	५४		बु	३	६	४०	श	१	५०		गु	१२	१५	
मं	२	३४		बु	९	४८		श	१	५०		गु	३	३०		रा	३	५३	२०
बु	५	८		श	५	४६	३०	गु	३	३०		रा	१	६	४०	के	३	५३	२०
३३ दिन				६३ दिन				२० दिन				२० दिन				७० दिन			

अन्तर्दशाफल—

शुभं शुभे बुधेऽपि स्यान्मरणं राहुमन्दयोः ।
गुरु द्वये महत्सौख्यं दुःखं स्याद् भौम सूर्ययोः ॥ २० ॥
रवौ रवौ चेन्मरणं रवौ चन्द्रे तथैव च ।
रवौ भौमे मन्दता च पापो रविबुधे तथा ॥ २१ ॥
सन्तापोऽर्के शनौ चेत्स्याद्रवौ गुरावुपद्रवाः ।
रव्यगौ चोपद्रवता मन्दता च रवौ भृगौ ॥ २२ ॥
चन्द्रे चन्द्रे राजतुल्यं लक्ष्मी स्याच्चन्द्रभौमयोः ।
चन्द्रे बुधे च नाशः स्यात्स्त्रीपीडा चन्द्रसौरयोः ॥ २३ ॥
चन्द्रे गुरौ प्रवासश्च लाभः स्याच्छशिदैत्ययोः ।
सर्वनाशश्चन्द्रशुक्रे स्त्रीनाशश्चन्द्रसूर्ययोः॥ २४ ॥
कुजे भौमे प्राणनाशो योषिद्भीतिः कुजे बुधे ।
भौमे शनौ च शोकः स्याच्छुभः स्याच्च कुजे गुरौः॥ २५ ॥
कुजे राहौ चाग्निभीतिः पीडा स्याच्च कुजे भृगौ ।
भौमे सूर्ये च चातुर्यं कुजे चन्द्रे धनागमः॥ २६ ॥
बुधे बुधे सुखं चैव सुखं स्याच्च बुधे शनौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुधे गुरौ सुखञ्चैव बुधे राहौ च सिद्धयः ॥ २७ ॥
बह्नेर्भयं बुधे केतौ बुधे शुक्रे च सिद्धयः।
बुधे सूर्ये कीर्तिलाभो बुधे चन्द्रे च रोगिता ॥ २८ ॥
मन्दता च बुधे भौमे शनौ मन्दे च दुःखिता।
किञ्चित्सुखं शनौ जीवे शनौ राहौ च दुःखिता ॥ २९ ॥
शनौ भृगौ सुखं च स्यादरिष्टं हि शनौ रवौ।
शनौ चन्द्रेऽल्पमृत्युः स्याद्देशत्यागः शनौ कुजे ॥ ३० ॥
शनौ बुधे सुखञ्चैव सौम्ये जीवे च तत्फलम्।
जीवे भृगौ सुखञ्चैव गुरुराहौ च दुःखिता ॥ ३१ ॥
गुरौ शुक्रे च लाभः स्याद्गुरौ सूर्ये सुखं तथा।
गुरौ चन्द्रे वियोगः स्याद्गुरौ भौमे च शूरता ॥ ३२ ॥
विघ्नञ्चैव गुरौ सौम्ये सुखं किञ्चिद्गुरौ शनौ।
राहौ राहौ च पीडा स्याद्राहौ केतुगते कलिः ॥ ३३ ॥
अगौ भृगौ च कलहः कल्प्यते गणकोत्तमैः।
राहौ सूर्ये चाग्निभयं राहौ चन्द्रे च दुःखिता ॥ ३४ ॥
राहौ भौमे च सन्तापो दुःखं स्याद्राहुसौम्ययोः।
राहौ शनौ दुःखिता च रोगो मृत्युरगौ गुरौ ॥ ३५ ॥
शुक्रे भृगो धनं चैव शुक्रे सूर्ये च रोगिता।
शुक्रे चन्द्रे च नाशः स्याद्धननाशो भृगौ कुजे ॥ ३६ ॥
शुक्रे बुधे सुखं चैव धनं चैव भृगौ शनौ।
शुक्रे गुरौ स्त्रियानाशौ भृगौ राहौ च बन्धनम् ॥ ३७ ॥

अन्वयः—बुधं शुभेऽपि शुभं स्यात् राहुमन्दयोः मरणं, गुरुद्वये महत् सौख्यं, भौमसूर्ययोः दुखं स्यात्।

रवौ रवौ चेत् (तदा) मरणं रवौ चन्द्रे च तथैव रवौ भौमे मन्दता च रवि पापो बुधे तथा (मन्दता ज्ञेया)।

अर्के शनौ सन्तापो स्यात् रवौ गुरो चेत् उपद्रवाः रवि अगौ च उपद्रवता रवौ भृगौ च मन्दता (भवति)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रे चन्द्रं राजतुल्यं स्यात् चन्द्रभौमयोः लक्ष्मी चन्द्र बुधे नाशश्च चन्द्रसौरयोः स्त्रीपीडा स्यात् ।

चन्द्रे गुरौ प्रवासश्च शशि दैत्ययोः लाभः स्यात् चन्द्र शुक्रे सर्वनाशः चन्द्रसूर्ययोः स्त्रीनाशश्च (भवति) ।

कुजे भौमे प्राणनाशो कुजे बुधे योषिद्भीतिः भौमे शनौ च शोकः स्यात् कुजे गुरौ च शुभः स्यात् ।

कुजे राहौ अग्निभीतिश्च कुजे भृगौ पीडा स्यात् भौमे सूर्ये च चातुर्यं कुजे चन्द्रे धनागमः (भवति) ।

बुधे बुधे सुखं चैव बुधे शनौ सुखं स्यात् बुधे गुरौ सुखं चैव बुधे राहौ च सिद्धयः ।

बुधे केतौ वह्निभयं बुधे शुक्रे च सिद्धयः बुधे सूर्ये कीर्ति लाभो बुधे चन्द्रे च रोगिता ।

बुधे भौमे च मन्दता, शनौ मन्दे च दुःखिता शनौ जीवे किञ्चित् सुखं शनौ राहौ च दुखिता (भवेत्) ।

शनौभृगौ सुखं च स्यात् शनौ रवौ हि अरिष्टं शनौ चन्द्रे अल्पमृत्युः स्यात् शनौ कुजे देशत्यागः स्यात् ।

शनौ बुधे सुखं चैव सौम्ये जीवे च तत्फलं जीवे भृगौ सुखं चैव गुरु राहौ दुखिता च ।

गुरौ शुक्रे च लाभः स्यात् तथा गुरौ सूर्ये सुखं गुरौ चन्द्रे वियोगः स्यात् गुरौ भौमे च शूरता (ज्ञेया) ।

गुरौ सौम्ये विघ्नं चैव गुरौ शनौ किञ्चित् सुखं राहौ राहौ पीडा च राहौ केतु गते कलिः स्यात् ।

अगौ भृगौ च कलहः गणकोत्तमैः कल्प्यते, राहौ सूर्ये च अग्नि भयं राहौ चन्द्रे च दुखिता (भवेत्) ।

राहौ भौमे च सन्तापो स्यात् राहु सौम्ययोः दुखं स्यात् राहौ शनौ दुखिता च अगौ गुरौः रोगो मृत्युश्च (भवेत्) ।

शुक्रे भृगौ च धनं एव शुक्रे सूर्ये च रोगिता, शुक्रे चन्द्रे च नाशः स्यात् भृगौ कुजे धननाशो (भवेत्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्रे बुधे सुखं चैव शनौ धनं चैव शुक्र गुरौ स्त्रिया नाशो भृगौ राहौ बन्धनञ्च (भवेत्) ॥ २०-३७ ॥

संस्कृतः—स्पष्टं सर्वम् । श्लोकाः सरलार्थाः ॥ २०-३७ ॥

हिन्दी—बुध यदि शुभ हो तो बुध का अन्तर्दशादि काल भी शुभ होता है। राहु-शनि में मरण तथा गुरु-शुक्र में अत्यन्त सुख और सूर्य-मङ्गल में दुःख होता है।

यहाँ प्रथम श्लोक से सामान्य फल कह कर अब विशेष फल कहते हैं कि **सूर्य दशा में** सूर्य का अन्तर हो तो मरण एवं सूर्य के दशा में चन्द्रमा के अन्तर्दशा में भी मरण तथा सूर्यदशा में मङ्गल के अन्तर में मन्दता, शनि की अन्तर्दशा में सन्ताप, गुरु की अन्तर्दशा में उपद्रव, राहु की अन्तर्दशा में भी उपद्रव और शुक्र की अन्तर्दशा में आलस्य होता है।

चन्द्र की दशा में चन्द्र की अन्तर्दशा में राजा के तुल्य सुख, मङ्गल की अन्तर्दशा में लक्ष्मी प्राप्ति, बुध की अन्तर्दशा में नाश तथा शनि की अन्तर्दशा में स्त्री पीड़ा होती है।

चन्द्र की दशा में गुरु की अन्तर्दशा में परदेश में वास, राहु की अन्तर्दशा में लाभ, शुक्र की अन्तर्दशा में सर्वनाश और सूर्य की अन्तर्दशा में स्त्रीनाश होता है।

मङ्गल की दशा में मङ्गल की अन्तर्दशा हो तो प्राणनाश, बुध की अन्तर्दशा में स्त्रीभय, शनि की अन्तर्दशा में शोक, गुरु की अन्तर्दशा में शुभ होता है।

मङ्गल की दशा और राहु की अन्तर्दशा में अग्निभय, शुक्र की अन्तर्दशा में पीड़ा, सूर्य की अन्तर्दशा में चातुर्यवृद्धि तथा चन्द्रमा की अन्तर्दशा में धन का लाभ होता है।

बुध की दशा में बुध की अन्तर्दशा हो तो सुख, शनि की अन्तर्दशा में भी सुख, बृहस्पति की अन्तर्दशा में सुख, राहु की अन्तर्दशा में कार्यों की सिद्धि, बुध और केतु की अन्तर्दशा में अग्निभय, शुक्र की अन्तर्दशा में सिद्धि, सूर्य की अन्तर्दशा में यशलाभ तथा चन्द्रमा की अन्तर्दशा में रोग होता है।

बुध दशा और मङ्गल की अन्तर्दशा में आलस्य होता है। **शनि दशा में** शनि की अन्तर्दशा हो तो दुःख, बृहस्पति की अन्तर्दशा में स्वल्पसुख, राहु की

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तर्दशा में दुःख, शुक्र में सुख, रवि की अन्तर्दशा में अरिष्ट, चन्द्रमा की अन्तर्दशा में भी अरिष्ट मङ्गल की अन्तर्दशा में देश-त्याग और बुध की अन्तर्दशा में सुख होता है।

बृहस्पति की दशा में बृहस्पति की अन्तर्दशा हो तो सुख, राहु की अन्तर्दशा में दुःख, शुक्र की अन्तर्दशा में लाभ, सूर्य की अन्तर्दशा में सुख, चन्द्रमा की अन्तर्दशा में वियोग, मङ्गल की अन्तर्दशा में वीरता, बुध की अन्तर्दशा में विघ्न और शनि की अन्तर्दशा में स्वल्प सुख की प्राप्ति होती है।

राहु की दशा में राहु की अन्तर्दशा हो तो पीड़ा, केतु की अन्तर्दशा में कलह, शुक्र की अन्तर्दशा में भी कलह, सूर्य की अन्तर्दशा में अग्निभय, चन्द्रमा की अन्तर्दशा में दुःख, मङ्गल की अन्तर्दशा में सन्ताप, बुध की अन्तर्दशा में दुःख, शनि में भी दुःख तथा रोग और बृहस्पति की अन्तर्दशा में मृत्यु होती है। **केतु की दशा में** राहु जैसा फल होता है।

शुक्र की दशा में शुक्र की अन्तर्दशा हो तो धन प्राप्ति, सूर्य की अन्तर्दशा में रोग, चन्द्रमा की अन्तर्दशा में नाश, मङ्गल में धन नाश, बुध की अन्तर्दशा में सुख, शनि में धन प्राप्ति, गुरु की अन्तर्दशा में स्त्रीनाश और राहु केतु की अन्तर्दशा में बन्धन प्राप्ति होती है ॥ २०-३७ ॥

केतुकुण्डली कथन—

अर्कोबुधः कुजो जीवश्चन्द्रः शुक्रस्तथैव च।
राहुः शनैश्चरश्चैवज्ञातव्या केतुकुण्डली ॥ ३८ ॥

ग्रहयोरुभयोर्मध्ये केतुस्थानचतुष्टये।
अहिर्बुध्न्यानि ऋक्षाणि त्रीणि त्रीणि ग्रहेषु च॥ ३९ ॥

केतोरेकैकमृक्षं स्याद्यत्र वै जन्मभं भवेत्।
तत्क्रमाद्गणयेद्धर्ष यथासङ्ख्यं क्रमात्सुधीः ॥ ४० ॥

अन्वयः—अर्को बुधः कुजो जीवः चन्द्रः शुक्रः तथैव राहु शनैश्चरश्च एव केतु कुण्डली ज्ञातव्या।

ग्रहयोः (द्वयोर्ग्रह्योः) उभयोः मध्ये केतुस्थान चतुष्टये अहिर्बुध्न्यादि ऋक्षाणि त्रीणि त्रीणि च ग्रहेषु (स्थाप्यते)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकैकं ऋक्षं केतोः स्यात् यत्र वै जन्मभं भवेत् तत्क्रमाद् वर्षे गणयेद् यथा संख्यं सुधी क्रमात् ॥ ३८-४० ॥

संस्कृतः—आदावर्कः, ततो बुधः, ततः कुजः, ततो जीवः, ततश्चन्द्रः, तथैव शुक्रः, ततो राहुः, ततः शनैश्चरः, एवं ये खेटास्तद्वशाद् केतुकुण्डली ज्ञातव्या ज्ञेया ।

अथ विहितग्रहाणां स्थापनक्रमं दर्शयति । उभयोर्ग्रहयोर्मध्ये अर्थात् कथितग्रहद्वयमध्ये केतुस्थानचतुष्टये केतुग्रहस्य स्थापनस्थानचतुष्टये तथा ग्रहेषु चाहिर्बुध्न्यादि ऋक्षाणि उत्तरभाद्रपदादिनक्षत्राणि त्रीणित्रीणि स्थाप्यानि । तत्र केतोः केतुग्रहस्याधस्त्वेकैकमृक्षंस्यादेकैकनक्षत्रं स्थापनीयम् । एवं रीत्या जाते चक्रे यत्र जन्मभं भवेत्तत्क्रमात्तदधिकृत्य क्रमगणनया यथा सङ्ख्यं वर्षं वर्त्तमान-वर्षपर्यन्तं सुधीर्गणयेत् अर्थात्तद्वशेनात्रवर्षपतिर्बोध्य इति ।

अत्रायं फलितार्थः । उत्तरभाद्रपदनक्षत्रे यस्य कस्यचिच्चेज्जन्म तदा तस्य जन्मतो वर्षत्रयं यावदब्देशो रवि, ततश्चतुर्थवर्षेशः केतुः, तदग्रे वर्षद्वयस्य कालराहू शून्योपलक्षितौ लेख्यौ, ततो वर्षत्रयस्याधिपो बुधः, ततो वर्षत्रया-धीशो भौमः, पुनस्तत एकवर्षस्याधिपः केतु, ततो वर्षद्वयाधीशो पुनः कालराहू, ततो वर्षत्रयाधीशो गुरुः, ततो वर्षत्रयाधीशश्चन्द्रः पुनस्तत एक-वर्षेशः केतुः, वर्षद्वयस्याधीशौ कालराहु, ततो वर्षत्रयाधीशः शुक्रः, ततो वर्षत्रयाधीशो राहुः, तत एकवर्षाधीशः पुनः केतुः, ततो वर्षद्वयाधीशौ पुनः कालराहु, ततो वर्षत्रयस्यार्थात्त्रयस्त्रिंशद्वर्षादूर्ध्वं षट्त्रिंशद्वर्षं यावदधीशः शनि स्यादयं प्रथमपर्ययः । एवं द्वयोर्द्वयो-ग्रहयोर्मध्ये चत्वारि केतोः स्थानानि भवेयुस्तेन स्थानचतुष्टये चत्वारः केतवो जायन्ते । एवमन्यपर्ययेपि वर्षेशावगमो बोध्यः । तथाऽन्यैरपि—

**'सूर्यज्ञयोर्भौमसुरेज्ययोश्चग्लौःशुक्रयोराक्षसमन्दयोश्च ।
मध्ये शिखी चैकमयुक् तथान्ये उपान्त्यभात्त्रित्रिमिता भचक्रे ॥'**

एवं यस्य रेवत्यां जन्म तस्यादौ वर्षद्वयस्याधिपतिः सूर्यः । ततः पूर्व-वत्स्थापनवशात्षट्त्रिंशद्वर्षाधीशः पुनः सूर्य एव । एवं यस्याश्विन्यां जन्म तस्य प्रथमवर्षाधीशो रविः । ततो एकवर्षस्याधिपतिः केतुः । एवं पूर्ववत्पुनः पञ्चत्रिशद्वर्षस्य तथा षट्त्रिंशद्वर्षस्य चाधीशः सूर्य एव । एवं मघानक्षत्रजन्मवतो मघा नक्षत्रोपरिगतो गुरुर्जन्मतो वर्षत्रयाधीशः । ततः पूर्ववदन्त्ये कालराहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं यस्मिन्नक्षत्रे जन्म तन्नक्षत्राधीशमधिकृत्य पूर्ववत्प्रथमावृत्तौ वट्त्रिंशद्वर्षाणामधिपाः स्थाप्याः पुनरन्यपर्ययेपि तथैव बोध्याः ।

अथ दिगम्बरमतेन केतुपताकी चक्रमुच्यते । तद्यथा पूर्वादिदिक्षु रव्यादिशुक्रान्ताः खेटाः स्थाप्याः । तथा तत्र कृत्तिकादिक्रमेण पापग्रहेषु त्रीणित्रीणि तथा शुभग्रहेषु चत्वारि चत्वारि नक्षत्राणि देयानि । अस्मिन् चक्रे यत्र जन्मभं तदारभ्य वर्षपतयः स्युः । तथापि पापरूप एकग्रहो वर्षत्रयस्याधिपस्तथैक शुभखेटो वर्षचतुष्टस्याधिपः । तथा कृते जातं तच्चक्रस्वरूपम् ।

अत्रापि दशादिमानानि पूर्ववदवधेयानि ।



अत्रोदाहरणम् । तद्यथा । मघानक्षत्रदण्डोपरिगतः कुजो मघानक्षत्रजन्मवतः प्रथमद्वितीयतृतीयवर्षाधिपः । ततो वर्षचतुष्टयस्याधिपः शशिजः । एवमग्रेपि बोध्यम् ।

अत्रापि पापदशायां यदा पापान्तर्दशा तदारिष्टम् ॥ ३८-४० ॥

हिन्दी—रवि-बुध-मङ्गल-बृहस्पति-चन्द्रमा-शुक्र-राहु-शनैश्चर ग्रहों के क्रम से जो चक्र होता है उसे केतु कुण्डली समझना चाहिये । परन्तु इन ग्रहों के स्थापन में विशेषता यह है कि उक्त ग्रहों में दो ग्रहों के मध्य में चार स्थानों में केतु का स्थापन करें अर्थात् रवि-केतु-बुध, मङ्गल-केतु-बृहस्पति, चन्द्र-केतु-शुक्र तथा राहु केतु-शनि, इस प्रकार चार स्थानों में केतु का स्थापन करें । ग्रह स्थापन करके नक्षत्र स्थापन में उत्तराभाद्रपद से प्रारम्भ कर तीन-तीन नक्षत्र ग्रहों के स्थान में और एक-एक नक्षत्र केतु ग्रह के स्थान में लिखें । यहाँ अभिजित नक्षत्र की भी गणना की गई है क्योंकि इसमें २८ नक्षत्र होते हैं जो केतु कुण्डली चक्र द्वारा स्पष्ट है । इस तरह जो चक्र बने उसमें जन्मनक्षत्र जहाँ हो उसीके क्रम से वर्षों की गणना करनी चाहिये । जैसे उत्तराभाद्रपद में जिसका जन्म हुआ हो तो उसके प्रथम तीन वर्षों के स्वामी सूर्य, चतुर्थ वर्ष के केतु तथा प्रत्येक स्थान में केतु के बाद दो वर्षों का स्वामी कालराहु पुनः उसके बाद सप्तम-अष्टम-नवम वर्ष का स्वामी बुध उसके बाद तीन वर्ष का स्वामी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मङ्गल, उसके बाद एक वर्ष का स्वामी केतु तत्पश्चात् दो वर्ष का स्वामी कालराहु इसी क्रम से चौतीस-पैंतीस-छत्तीसवें वर्ष का स्वामी शनि होता है। इस प्रकार प्रथम आवृत्ति ३६ वर्षों की होती है इसी तरह से तीन आवृत्ति में १०८ वर्ष होते हैं।

जैसे किसी का जन्मनक्षत्र विशाखा है तो केतु कुण्डली चक्र से प्रथम वर्ष का स्वामी केतु, द्वितीय तृतीय का कालराहु, चतुर्थ-पञ्चम-षष्ठ का शुक्र, ७-८-९ का राहु, १०वें का केतु ११-१२वें का कालराहु, १३-१४-१५ का शनि, १६-१७-१८ का रवि, १९ का केतु २०-२१ का कालराहु २२-२३-२४ का बुध, २५-२६-२७ का मङ्गल, २८ का केतु, २९-३० का कालराहु, ३१-३२-३३ का बृहस्पति तथा ३४,३५,३६ का चन्द्रमा। इस प्रकार प्रथम आवृत्ति होती है। इससे आगे द्वितीय आवृत्ति ३७ से ७२ तक तथा तृतीय ७३ से १०८ वर्ष तक की होती है।

दूसरा उदाहरण—जन्म रेवतीनक्षत्र हो तो उसके प्रथम २ वर्ष के स्वामी सूर्य तथा ३रे वर्ष का केतु, ४-५ का कालराहु, ६-७-८ का बुध, ९-१०-११ का भौम, १२ का केतु, १३-१४ का कालराहु, १५-१६-१७ का बृहस्पति, १८-१९-२० का चन्द्रमा, २१ का केतु, २२-२३ का कालराहु, २४-२५-२६ का शुक्र, २७-२८-२९ का राहु, ३० का केतु, ३१-३२ का कालराहु, ३३-३४-३५ का शनि, और ३६ वर्ष का सूर्य हुआ। इसी तरह और नक्षत्रों में भी जानना चाहिये ॥ ३८-४० ॥

केतु कुण्डली चक्र

सूर्य	केतु	बुध	भौम	केतु	गुरु	चन्द्र	केतु	शुक्र	राहु	केतु	शनि
उ.भा.	भ.	कृ.	आ.	श्ले.	म.	ह.	वि.	अनु.	पू.षा.	श्र.	ध.
रे.	०	रो.	पुन.	०	पू.फा.	चि.	०	ज्ये.	उ.षा.	०	श.
अ.	०	मृ.	पु.	०	उ.फा.	स्वा.	०	मू.	अभि.	०	पू.भा.

केतु कुण्डली के फल—

रविवर्षे भवेच्छून्यं शिरः शूलश्च दुर्बलम्।
स्वगेहे मनुष्यमरणं कलहानि बहून्यपि ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—रविवर्षे शून्यं शिरः शूलश्च दुर्बलं स्वगेहे मनुष्य मरणं बहूनि कलहानि अपि भवेत् ॥ ४१ ॥

संस्कृतः—रविवर्षे शून्यं शिरः शूलस्तथा गृहे मनुष्यमरणं स्वपुत्रादि-प्राणवियोगः तथा कलहानि बहूनि । इति सर्वं भवेत् ॥ ४१ ॥

हिन्दी—रवि के वर्ष में शून्य (अर्थात् रिक्त), सिरदर्द से पीड़ा, दुर्बल, स्वगृह परिवार में मरण से दुःखी और अनेक प्रकार के विवादों से युक्त होता है ॥ ४१ ॥

केतोर्वर्षे चौरभयं बन्धनादीन्यनेकधा ।
देशभ्रमणं बुधस्याब्दे रोगो मृत्युभयं तथा ॥ ४२ ॥

स्त्रीपुत्रादौ भवेत्पीडा शोको वित्तस्य नाशनम् ।
भौमवर्षे भवेत्क्लेशो याम्यैश्चौरादिभिर्भयम् ॥ ४३ ॥

अन्वयः—केतोः वर्षे चौरभयं अनेकधा बन्धनादीनि (भवेत्) बुधस्याब्दे देश भ्रमणं रोगी मृत्युभयं ।

स्त्रीपुत्रादौ पीडा शोको तथा वित्तस्य नाशनं भवेत् । भौमवर्षे क्लेशो याम्यैः चौरादिभिः भयं भवेत् ॥ ४२-४३ ॥

संस्कृतः—केतोर्वर्षे चौरभयं तथाऽनेकधा बहुप्रकारेण बन्धनादीनि कारागृहादिकानि राजदण्डानि भवन्ति । अथ बुधवर्षे देशभ्रमणं रोगश्च तथा मृत्युभयम् । एवं स्त्रीपुत्रादौ पीडा स्त्रीपुत्रादि जनितं दुःखं तथा शोकश्च वित्तस्य धनस्य नाशनमित्यग्रिमश्लोकेनान्वयः ।

भौमवर्षे क्लेशस्तथा याम्यैर्यमदूतैश्चौरादिभिश्चौरैस्तथादि शब्दादग्निना भयं भवेत् पूर्ववत्केतोः ॥ ४२-४३ ॥

हिन्दी—केतु के वर्ष में चोरों से भय तथा अनेक प्रकार के विवाद और बन्धनादि (कारागृह, राजदण्डादि) का भय होता है ।

बुध के वर्ष में देशभ्रमण, रोगभय, मृत्युभय, स्त्री पुत्रादि को पीड़ा और शोक तथा धननाश होता है ।

मङ्गल के वर्ष में क्लेश, यमदूतों से भय (मृत्यु से भय) और चोर अग्नि आदि का भय होता है ॥ ४२-४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुरुचन्द्रफल—

गुरुवर्षे भवेत्प्राप्तिः चन्द्रे च सर्वसिद्धयः ।
स्वर्णरौप्यादिलाभश्च गजवाजिधनागमः ॥ ४४ ॥

अन्वयः—गुरु वर्षे प्राप्तिः भवेत् चन्द्रे (वर्षे) च सर्वसिद्धयः स्वर्ण रौप्यादि लाभः गजवाजि धनागमश्च भवेत् ॥ ४४ ॥

संस्कृतः—गुरुवर्षे प्राप्तिः किन्तु धनसुखादीनां लाभः । चन्द्रवर्षे सर्वसिद्धिस्तथा कृषिसुवर्णरौप्यादि लाभसुखानि । केतुफलं पूर्वोक्तम् ॥ ४४ ॥

हिन्दी—बृहस्पति के वर्ष में धन सुखादि की प्राप्ति, चन्द्रमा के वर्ष में सभी प्रकार की सिद्धि-स्वर्ण रजतादि का लाभ और घोड़ा-हाथी आदि धन का लाभ होता है ॥ ४४ ॥

शुक्रराहु फल—

शुक्रवर्षे सन्ति गावो वाहनानि धनानि च ।
राहुवर्षे जलभयं पादव्रणव्यथा भवेत् ॥ ४५ ॥

अन्वयः—शुक्रवर्षे गावो वाहनानि धनानि च सन्ति राहुवर्षे जलभयं पादव्रण व्यथा च भवेत् ॥ ४५ ॥

संस्कृतः—शुक्रवर्षे गावो गवादिपशवस्तथा वाहनानि गजतुरङ्गमादिलाभः । धनानि सर्वधनानि चकारात्सर्वसुखानि । राहुवर्षे जलभयं जले निमज्जनादिभयम् तथा पादव्रणव्यथा चरणे विस्फोटकादिकं तथा तदन्यप्रकारेण व्यथा चेति भवेत् । केतोः फलं पूर्ववदवधेयम् ॥ ४५ ॥

हिन्दी—शुक्र के वर्ष में गाय-भैंस आदि पशु लाभ, घोड़े-हाथी आदि वाहनों का सुख, सभी प्रकार के धन का लाभ और सभी प्रकार के सुखों की प्राप्ति होती है । राहु के वर्ष में जल से भय और पैर में व्रण तथा पीड़ा होती है ॥ ४५ ॥

शनिफल—

शनिवर्षे भवेत्पीडा रोगशोकभयानि च ।
एतद्दशाफलं ज्ञेयमित्युक्तं पूर्वसूरिभिः॥ ४६ ॥

अन्वयः—शनिवर्षे पीडा रोग शोक भयानि च भवेत् । पूर्व सूरिभिः इत्युक्तं एतत् दशाफलं ज्ञेयम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—शनिवर्षे पीडा रोगशोकभयानि भवन्ति एतद्दशाफलं ज्ञेयम् । इति पूर्वसूरिभिः प्राचीनपण्डितैरुक्तं कथितम् ।

त्र्यल्पा यदा स्याज्जनिभस्य सङ्ख्या-
दृग्भ्यान्तदाऽऽढ्या त्रिसमाऽधिका वा ।
चेत्सा समुद्रैः खचराधिकाऽऽढ्या
रसैश्च भूपादधिका यदाऽऽढ्या ॥

नागैश्च दिग्भिस्त्रिकराधिकाऽऽढ्या तथाकृते योग इहेतवर्षैः ।
युक्ताऽग्निभक्तः किल शेषसत्वे सरूपलब्ध्यादथ शून्यशेषे ॥

फलाद्यथोक्ताः खचरा समेशाः केत्वब्दपे चेदवशेषमानम् ।
रूपाधिकं तर्हि समेश्वरो वै कालाख्यराहुर्भवतीह नूनम् ॥

अत्राश्विन्यादितः साभिजिज्जनिभस्य सङ्ख्या जन्मनक्षत्रसङ्ख्या यदि चेत्त्र्यल्पात्त्रिभ्यो न्यूना तर्हि सा सङ्ख्या दृग्भ्यां सहिता द्वियुता । यदि चेदन्यथा त्र्यधिका तत्समा च तदा सा जन्मर्क्षसङ्ख्या समुद्रैर्युक्ता चतुर्युता विधेया । चेद्यदि सा जन्मर्क्षसङ्ख्या खचराधिका नवाधिका तदा रसाढ्या षट्युता । चेद्यदि सा जन्मर्क्षसंख्या षोडशाधिका तदा नागैरष्टभिश्चशब्दात्सहिता । एवं त्रिकराधिकात्रयोविंशत्यधिका तदा दिग्भिराढ्या दशसहिता । इह तथा योगे कृते सति यो योगः स चेतवर्षैर्गतवर्षैर्युक्तः सहितः । तथाग्निभक्तस्त्रिभक्तः । अत्र शेषसत्वे शेषस्थितौ सरूपलब्ध्यादेकयुतफलप्रमाणात् । अथ शून्यशेषे शेषाभावे फलात्केवलात्फलात् । यथोक्ताः खेचराः 'अर्कः केतुश्च' इति पठिता ग्रहाः समेशा अब्दपाः स्युः । अत्राब्दपे वर्षेशे केतौ सति यदि शेषमानं रूपाधिकं द्वित्रिप्रमितं तदेह केतुकुण्डल्यां कालाख्यराहुः संज्ञया कालराहुः समेश्वरो वर्षपो भवति ।

अत्रायं भावः । यद्यश्विन्यादितो भरणीं यावज्जन्मनक्षत्रं तदा तन्मिति द्वियुता । एवं यदि कृत्तिका नक्षत्रादश्लेषा नक्षत्रं यावज्जन्म नक्षत्रं तदा दास्रात्तन्मितिश्चतुर्युता । अथ यदि मघानक्षत्राद्विशाखानक्षत्रं यावज्जन्मनक्षत्रं तदाऽश्विन्यादितस्तन्मितिषट्सहिता । अथानुराधानक्षत्राच्छ्रवणर्क्षं यावज्जन्मभन्तदाऽश्विन्यादितः साभिजित्तन्मितिरष्टसहिता । एवं धनिष्ठानक्षत्राद्रेवत्यन्तं यावज्जन्मनक्षत्रं तदाऽश्विन्यादितस्तन्मितिदिक्सहिता विधेया । एवं निष्पन्नो योगो गतवर्षसहितो यः स च त्रिभक्तः सनत्र यद्यवशेषमानं स्यात्तदा सैकफलक्रमात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र यदि शेषाभावस्तदा यथागतफलादेव रविशिखिबुध कुजशिखिगुरु चन्द्र-शिखिभृगु राहुकेतुशनैश्चरा एते वर्षाधिपाः स्युः । एवं केतौ वर्षपे जाते सति यदि तत्र शेषमानं द्वित्रिमितं तदा कालराहुर्वर्षपः स्यात्तदन्यथा वर्षेशः केतुः स्यादिति सुधीभिर्विभाव्यम् । अत्र मन्दानां प्रतीत्यर्थमुदाहरणम् । तद्यथा । मघानक्षत्रजन्मवतस्त्वश्विनीनक्षत्रात्तज्जन्मर्क्षसंख्या नन्दनाधिका तेन तत्संख्या दशमिता षड्युता षोडशमिता जाता (१६) अत्रेयं जन्मसमये शून्यगताब्दैर्युता सति यथास्थितैव (१६) अतोऽयं (१६) योगस्त्रिभक्तस्तदा फलं शरतुल्यं (५) शेष रूपमितं (१) स्यात् । अतः सैकफलं रसमितं जातम् (६) तेनोक्त-ग्रहगणनया गुरुः प्रथमाब्दपो जातः । तथा मघानक्षत्रोपरि गतो गुरुः पूर्वाचार्याभिमतः प्रथमवर्षेशो जातः । एवं द्वितीयवर्षे रूपमितेन वर्षेण युतो निष्पन्नयोगोऽयं (१६) सप्तदशसमो जातः (१७) अयं त्रिभक्तः फलं (५) सैकं (६) तेनात्रापि द्वितीयाब्दपो जीवः । एवं निष्पन्नयोगोऽयं (१६) द्विमितेन गतवर्षेण युतस्तदाऽष्टादशसमो जातः (१८) अयं त्रिभक्तः फलं रसमितं (६) तथावशेषं शून्यं स्यात् । अत एवात्र केवलात्फलादेव तृतीयवर्षस्याधिपो जीव एव । एवं पूर्वोक्तयोगोऽयं (१६) रसमितेन गतवर्षेण युतस्तदा द्वाविंशतिसमो जातः (२२) अयं त्रिभक्तः फलं (७) तथावशेषं (१) तेन सैकफलात्सप्तम-वर्षाधिपः केतुः स्यात्। एवं निष्पन्नयोगोऽयं (१६) नगमितेन गतवर्षेण युतस्तदा त्रयोविंशतिमितो जातः (२३) अयं त्रिभक्तः फलं (७) तथा शेषमानं द्विमितं स्यात् । तेनात्र सैकफलाज्जाते वर्षाधिपे जातः । एवं नवमवर्षाधिपश्च स एव । एवं यत्र सरूपफलं वा केवलफलं द्वादशाधिकं स्यात्तदाऽर्कतष्टात्तस्मादब्दाधिपो बोध्यः । एवमन्यनक्षत्रजन्मवतामपि स्वमत्योदाहरणं ज्ञेयमिति ।

अत्रोपपत्तिः । तत्रोत्तरभाद्रपदादिनक्षत्रत्रयवशात्सूर्यादयः कथितखेटा अब्दाधिपाः परमत्राश्विनीनक्षत्राज्जन्मर्क्षसंख्या या गृहीता सा यदि द्वियुता तदो-त्तरभाद्रपदनक्षत्राज्जन्मर्क्षावधिका सा संख्या स्यात् । परमेवं भरणीपर्यन्त-मर्थात्त्र्यल्पां जन्माक्षरसंख्यां यावत् । अथ यदि तदग्रतः सर्पनक्षत्रं यावज्जन्म-नक्षत्रं स्यादर्थाद्द्विकाधिका नवमावधिका जन्मर्क्षमितिः स्यात्तदा भरणी-नक्षत्रादधः स्थानद्वये कालराहुर्विहितः । परञ्च तत्र नक्षत्रपठिताभावः स्यात् । अतस्तत्स्थानद्वयबोधार्थं जन्मर्क्षसंख्या द्वियुता तथोत्तरभाद्रपदर्क्षाद्गणनार्थं पूर्वरीत्या द्वियुताविधेया तेनात्र जन्मर्क्षसंख्या चतुर्युक्ता जाता । अथ यदि नवाधिका षोडशावधिका जन्मर्क्षसङ्ख्या यावत्तावत्तर्हि पुनः सर्पनक्षत्राधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालराहुजनितस्य स्थानद्वयस्यावगमाय सा संख्या द्वियुता कर्त्तव्या तथा पूर्व-रीत्या चतुर्युता प्राप्तैवातः सा षड्युता जाता । एवं षोडशाधिका त्रयोविंशत्य-धिका जन्मर्क्षसंख्या तदा पुनर्विशाखानक्षत्राधः कालराहुस्थानद्वयावगमार्थं सा द्वियुता तया पूर्वं षड्युता सिद्धैवातः नागैर्युता जाता । एवं त्रयोविंशत्यधिका जन्मर्क्षसंख्या तदाश्रवणर्क्षाधः कालराहोः स्थानद्वयावगमाय सा द्वियुता कर्त्तव्या तथा पूर्वं नागयुक्ता प्राप्तैवातो दिग्भिः सा युता जाता ।

अथोत्तरभाद्रपदादिनक्षत्रजन्मवतां त्रयाणां त्रयाणां नक्षत्राणामेकैकखेटः पतिर्विहितस्तथा यद्यपि केतुरेकनक्षत्राधीशः परञ्च तदधः कालराहू द्वौ पठितो तेनात्रापि कालराहुभ्यां सहितः केतुर्ग्रहत्रयसमो जातः । एवं जन्मसमये यः खेटो वर्षाधीशस्तदारभ्यैकैकवृद्ध्या चैकद्विकादिकगतवर्षे सति वर्षाधीशः स्यात् । अतः पूर्वोक्तयोगो गतवर्षैर्युक्तस्तदोत्तरभाद्रपदनक्षत्रादिष्टवर्षावधि विहितखेटानां वृन्दं स्यात् । ततोऽनुपातः । यदि त्रिमितेन वृन्देनोक्तग्रहो रूपमितो लभ्यते तदेष्टवृन्देन क इति । फलं गतवर्षाधीशः स्यादतो वर्त्तमानावगमाय फलं सैकं कृतम् । परञ्चैवं शेषसत्वे शेषत्यागात् । यदा शेषाभावस्तदा तु फलमेव वर्त्तमानवर्षाधीशः स्यात् । परञ्चैवं वर्षाधिपे केतौ जाते सति तत्रत्यशेषे रूपमिते केतुरेव वर्षेशश्चैकवर्षस्य तदधीशविहितत्वात् । तथा तदग्रे वर्षद्वयस्य कालराहु-रधिपो विहितः परञ्च विहितखेटानां मध्ये तत्संख्या न पठिता तेन यदा द्वित्रिमितं शेषं तदा लब्धानुसारात्प्राप्तमपि वर्षाधिपं केतुग्रहमपहाय कालाख्यराहुरब्दा-धिपो बोध्यः । अत उपपन्नं सर्वम् ॥ ४६ ॥

हिन्दी—शनि के वर्ष में पीड़ा और रोग-शोक भयादि होता है । ये सब दशा फल पूर्वाचार्यों द्वारा कहे गये हैं ॥ ४६ ॥

तृतीयवर्षेश ज्ञान—

आदौ रविस्ततो भौमस्तदग्रे केतुरिष्यते ।
ततश्चन्द्रो बुधश्चैव ततो गुरुरिहेष्यते ॥ ४७ ॥

सप्तमे भार्गवस्तद्वदष्टमे शनिरिष्यते ।
ततः परं सैंहिकेय इत्येषा गुरु कुण्डली ॥ ४८ ॥

अन्वयः—आदौ रविः ततो भौमः तत् अग्रे केतुः इष्यते ततः चन्द्रो बुधः चैव ततो गुरुः इहेष्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तमे भार्गवस्तद्वदष्टमे शनिः इष्यते ततः परं सैंहिकेयः इति ऐषा गुरु कुण्डली (भवति) ॥ ४७-४८ ॥

संस्कृतः—आदौ प्रथमं रविः ततो भौमः । तदग्रे भौमात्परं केतुरिष्यते कथ्यते । ततः केतोरग्रे चन्द्रः, ततो बुधः, ततो बुधादग्रे गुरुरिष्यते ।

सप्तमे सप्तमस्थाने भार्गवः शुक्रः तद्वदष्टमे तथाऽष्टमस्थाने शनिरिष्यते । ततः परं शनेरग्रे सैहिकेयः सिंहिकासुतः राहुः । इत्येवमेषा गुरुकुण्डली स्यादर्थादेवं रीत्या गुरुकुंडलिकायां नव खेटाः स्थाप्याः ॥ ४७-४८ ॥

हिन्दी—गुरु कुण्डली में प्रथम रवि तत्पश्चात् क्रमशः मङ्गल-केतु-चन्द्रमा-बुध-बृहस्पति-शुक्र-शनि और राहु का स्थापन करना चाहिये । इस विधि से गुरु कुण्डली चक्र बनता है ॥ ४७-४८ ॥

गुरु कुण्डली चक्र

ग्रह	र.	म.	के.	च.	बु.	बृ.	शु.	श.	रा.
नक्षत्र	पुष्य	श्ले.	म.	पू.फा.	उ.फा.	ह.	चि.	स्वा.	वि.
	अ.	ज्ये.	मू.	पू.षा.	उ.षा.	श्र.	ध.	श.	पू.भा.
	उ.भा.	रे.	अ.	भ.	कृ.	रो.	मृ.	आ.	पुन.

पुष्यादिकं क्रमेणैव ऋक्षं देयं पुनः पुनः ।
यत्रस्थं जन्मनक्षत्रं तत्क्रमाद्गणयेद्बुधः ॥ ४९ ॥

अन्वयः—क्रमेण पुष्यादिकं एव पुनः पुनः ऋक्षं देयं, जन्मनक्षत्रं यत्रस्थं तत्क्रमाद् बुधः गणयेत् ॥ ४९ ॥

संस्कृतः—पुष्यादिकमृक्षं नक्षत्रं पुनः पुनर्वारं वारं क्रमेणेवोक्तग्रहक्रमा-द्देयंलेखनीयंगणकेनेति शेषः । एवं सिद्धे चक्रे जन्मनक्षत्रं यत्रस्थं यत्कोष्ठकगतं तत्क्रमाज्जन्मर्क्षोपरि गतं खेटमधिकृत्य बुधो वर्त्तमानवर्षेशं यावद्गणयेत् ।

अत्रायं भावः । कथितानामर्कादिग्रहाणामधः स्थानि पुष्यादिनवर्क्षाणि त्रिरावृत्या स्थाप्यानि । तद्यथा सूर्यादधः पुष्यर्क्षम् । कुजे श्लेषा । केतौ मघा चन्द्रे पूर्वाफाल्गुनी । बुधेचोत्तरा फाल्गुनी । ततो गुरौ हस्तर्क्षम् । ततः शुक्रे चित्रा ततः शनौ स्वाती । ततो राहौ विशाखा । इति प्रथमावृत्तौनवर्क्षाणि लेख्यानि । द्वितीयावृत्तौ तु विहितमार्गेणार्कादिग्रहाणामधः स्थानि चानुराधादिकानि नव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षाणि पुनर्लेख्यानि । ततस्तृतीयावृत्तौ तेन प्रकारेणोत्तरभाद्रपदादिकानि नवक्षाणि लेख्यानि । तदुक्तमप्यन्यैः—

सूर्यारकेत्विन्दुबुधेज्यशुक्रार्किराहुभानीज्यभतः क्रमेण ।
जन्मर्क्ष संख्या पतिताऽत्र यत्र तत्कोष्ठखेटो गुरुकुण्डलीजः ॥
एवं कृते जातं गुरुकुण्डलीचक्रम् ॥ ४९ ॥

हिन्दी—पूर्वोक्त रवि-मङ्गल-केतु आदि ग्रहों के नीचे पुष्य आदि नक्षत्रों को लिखें । इस प्रकार से उक्त चक्र में जहाँ जन्मनक्षत्र हो उस कोष्ठक के ऊपर स्थित ग्रह से प्रारम्भ कर वर्तमान वर्ष पर्यन्त वर्षेश की गणना करें । जन्मनक्षत्र के उपर का ग्रह प्रथम वर्षेश होता है उसके बाद उक्त क्रम से प्रत्येक ग्रह एक-एक वर्ष के स्वामी होते हैं ।

उदाहरण—जैसे किसी का जन्मनक्षत्र चित्रा है तो कोष्ठक के ऊपर शुक्र है अतः शुक्र प्रथम वर्षेश, द्वितीय वर्षेश शनि, तृतीय राहु, चतुर्थ सूर्य, पञ्चम भौम, षष्ठम केतु, सप्तम चन्द्र, अष्टम बुध, नवम गुरु, दशम पुनः शुक्र, इस तरह एकादशादि वर्षो के सूर्यादि ग्रह बारम्बार वर्षेश होते हैं ॥ ४९ ॥

प्रकारान्तर से गुरु कुण्डली—

रेखापञ्चकमालिख्य रेखैकं प्रस्तरे तथा।
आदौ रविस्ततो भौमः केतुश्चैव तृतीयके॥ ५० ॥
ततश्चन्द्रो बुधश्चैव षष्ठे शून्यं तथैव च।
शून्यं तु सप्तमे चैव गुरुश्चैव तथाष्टमे॥ ५१ ॥
शून्यं तु नवमे चैव तथैव दशमे मतम्।
एकादशे तु शुक्रः स्याच्छून्यं द्वादशके भवेत्॥ ५२ ॥
शनिस्त्रयोदशेपि स्याद्राहुश्चैव चतुर्दशे।
शून्यं पञ्चदशेपि स्याज्ज्ञातव्या गुरुकुण्डली॥ ५३ ॥
त्रीणि त्रीणि च ऋक्षाणि पुष्यादीनि नियोजयेत् ।
जन्मर्क्षादिक्रमाद्वर्षमेकैकक्रमशो भवेत् ॥ ५४ ॥

अन्वयः—रेखा पञ्चकं आलिख्य प्रस्तरे रेखैकं तथा आदौ रविः ततो भौम तृतीयके केतुश्चैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः चन्द्रो बुधः चैव षष्ठे शून्यं तथैव च सप्तमे तु शून्यं चैव तथा अष्टमे गुरूश्चैव ।

नवमेतु शून्यं चैव दशमे तथैव मतम्, एकादशे तु शुक्रः स्यात् द्वादशके शून्यं भवेत् ।

शनि:त्रयोदशेपि स्यात् चतुर्दशे राहुश्चैव पञ्चदशेपि शून्यं स्यात् (इत्थं) गुरु कुण्डली ज्ञातव्या ।

पुष्यादीनि त्रीणि त्रीणि च ऋक्षाणि नियोजयेत् जन्मर्क्षादि क्रमात् वर्षं एकैक क्रमशो भवेत् ॥ ५०-५४ ॥

संस्कृतः—रेखापञ्चकमर्थादूर्ध्वाधररूपाः पञ्चमितारेखा तथा प्रस्तरे तिर्यग्रूपविषये रेखैकं रूपमितां रेखां चेति रेखाषट्कमालिख्य लिखित्वा ततश्चादौ किन्तुचोत्तराश्रितदण्डाग्रे रविर्लेख्यः । ततस्तिर्यग्दण्डाग्रे भौमः । तृतीयके किन्तु विहितदण्डमूले केतुः । ततो द्वितीयदण्डाग्रे चन्द्रः । ततस्तन्मध्येऽर्थात्तद्दण्डतिर्यग्रेखासम्पाते बुधः । तथैव षष्ठे षष्ठस्थानेऽर्थाद्द्वितीयदण्डमूले शून्यं ग्रहाभावः। ततः सप्तमेतृतीयदण्डाग्रे शून्यम् । तथाष्टमे तद्दण्डतिर्यग्रेखासंयोगे गुरुः । पुनर्नवमे तद्दण्डमूले शून्यम् । तथैव दशमे चतुर्थदण्डाग्रे मतं शून्यं स्वीकृतम् । तथैकादशे तद्दण्डतिर्यग्रेखासम्पाते शुक्रः । द्वादशके तद्दण्डमूले शून्यम् । त्रयोदशे पञ्चमदण्डाग्रे शनिः । ततश्चतुर्दशे तद्दण्डतिर्यग्रेखासंयोगे राहुः ।

पञ्चदशे तद्दण्डमूले शून्यम् । एवं रीत्या गुरुकुण्डली ज्ञातव्या गणकेनेति शेषः ।

तत्रैकैकग्रहादधः पुष्यादीनि पुष्यनक्षत्रादीनि त्रीणि त्रीणि ऋक्षाणि नक्षत्राणि नियोजयेत्स्थापयेद्गणक इति शेषः । एवं विधे गुरुकुण्डलीचक्रे जन्मर्क्षादिक्रमादेकैकं वर्षं क्रमशो भवेत् । अर्थाज्जन्मनक्षत्रोपरिगतं खेटं प्रथमवर्षेशरूपमारभ्य ततश्चैकैकगतवर्षवशादेकैकवृद्ध्या वर्षेशः स्यात् । तथा कृते जातं तच्चक्रम् ।

अत्र कैश्चित्कृत्तिकादिनक्षत्रेषु रविचन्द्रकुजबुधगुरुशुक्रशनिराहुकेतुखेटानां वशाद्गुरुकुण्डली विहिता परञ्चेदं मतं सर्वसम्मतं न स्यादिति तद्गौडमतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णदत्तीय सूत्रम्—

जन्मर्क्षसङ्ख्या सहिता गताब्दै-
र्नगोनिता नन्दहृतावशेषात् ।
आ मं शि च बो गु शु सौ त पाका
जीवस्य वै कुण्डलिकाप्रजाताः ॥

जन्मर्क्षसंख्या दस्रभात्स्वजन्मनक्षत्रावधि या संख्या सा गताब्दैर्गतवर्षैः सहिता युक्ता तथा नगोनिता सप्तरहिता विधेया । एवं या संख्या सा नन्दहृता नवभिर्भक्ता तदा यदवशेषमानं तस्मादवशेषमानात् आ मं शि चं बो गु शु सौ त पाकाः अर्थात् आ आदित्यः सूर्यः, मं मङ्गल, शि शिखी केतुः, चं चन्द्रमा बो बोधिनी बुधः, गु गुरुः, शु शुक्रः, सौ सौरी शनिः । त तमो राहुः । एतेषां पाका दशाः स्युः । कथम्भूता जीवस्य बृहस्पतेः कुण्डलीकाप्रजाताः कुण्डल्युत्पन्नाः ।

अत्रोदाहरणं मन्दार्थमुच्यते । मघानक्षत्रजन्मवशतः स्वजन्मर्क्षसंख्यादशमिता जाता (१०) इयं नगोनिता तदा त्रिमिता जाता (३) अत्रेयं शून्यमितेनेतत्वर्षेण युता यथास्थितैव (३) अत इयं नवभक्ता शेषं (३) त्रिमितं स्यात्तेनोक्तग्रहक्रमात्प्रथमवर्षेशः केतुः स्यात् । एवमन्यदपि बोध्यम् ।

अत्रोपपत्तिः । पुष्यादिनक्षत्रवशादुक्तखेटा अब्देशा विहितास्तेनाश्विनी भाज्जन्मर्क्षसंख्या या सा यदि नगोना तदा पुष्यनक्षत्राज्जन्मभं यावत्संख्या स्यात् परञ्चानया संख्यया समो विहितखेटानां मध्ये यो ग्रहः स एव प्रथमवर्षेशो जातः । तत एकैकगताब्दोपचयाज्जन्मकालिकात्पाकेशादारभ्यैकैकग्रहो वर्षेशो भवेत् । अतः पूर्वानीता संख्या यदि गताब्दैः सहिता तदाऽर्कादिष्टवर्षेशं यावत्खेटसंख्याः स्युः परञ्च नवाधिकानां खेटानां प्रयोजनाभावात्ता यदि नवभक्तास्तदा फलं नवानामेकद्व्यादिपरिवर्त्तः स्यात् । ततोऽवशेषसमोविहितखेटानां मध्ये निजेष्टवर्षेशो जातः । तेनोपपन्नं सर्वम् ॥ ५०-५४ ॥

हिन्दी—अब अन्य चक्रानुसार गुरु कुण्डली भी लिखते हैं । ५ ऊर्ध्वाधर रेखा लिखकर उनके ऊपर ३ तिर्यक् रेखा लिखें इस तरह प्रत्येक ऊर्ध्वाधर में तीन स्थान होने से पाँचों रेखाओं से १५ स्थान हुए । इनमें क्रम से ग्रह स्थापन करें। जैसे रेखा का रेखाग्र (१), तिर्यक् रेखा सम्पात स्थान (२) एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूल (३), ये सब १५ स्थान हुए। जो आगे चक्र से स्पष्ट है। ग्रह स्थापन क्रम में ऊर्ध्वाधर के **प्रथम** रेखा के अग्र भाग में सूर्य, प्रथम रेखा व तिर्यक् रेखा संपात रूप **द्वितीय** स्थान में मङ्गल, **तृतीय** स्थान में अर्थात् प्रथम ऊर्ध्वाधर के मूल में केतु, **चतुर्थ** स्थान में चन्द्र, **पञ्चम** में बुध, **षष्ठ** में (द्वितीय रेखा के मूल में) शून्य एवं **सप्तम** में शून्य **अष्टम** में गुरु, **नवम** में शून्य, **दशम** में भी शून्य, **एकादशवें** में शुक्र, **बारहवें** में शून्य, **तेरहवें** में शनि, **चौदहवें** में राहु **पन्द्रहवें** में शून्य का स्थापन करना चाहिये। यह गुरु कुण्डली होती है। इस तरह चक्र लिखकर प्रत्येक ग्रह के नीचे पुष्यादि तीन-तीन नक्षत्र लिखें शून्य के नीचे नक्षत्र स्थापित नहीं करें। गुरु कुण्डलीचक्र में जन्मनक्षत्र के ऊपर के ग्रह को प्रथम वर्षेश मानकर एक-एक वर्ष के क्रम से वर्तमान वर्ष के स्वामी का ज्ञान कर लेना चाहिये।

गुरु कुण्डली चक्र

प्र.स्थान	च. स्थान	स. स्थान	द. स्थान .	त्रयो.स्थान
रवि	चन्द्र	०	०	शनि
पुष्य अनुराधा उ. भाद्र	पू. फाल्गुनी पू.षाढ़ा भरणी			स्वाती शतभिषा आर्द्रा
द्वि.स्थान	पं. स्थान	अ. स्थान	एका. स्थान	चतु.स्थान
मंगल	बुध	गुरु	शुक्र	राहु
श्लेषा ज्येष्ठा रेवती	उ. फाल्गुनी उ.षाढ़ा कृत्तिका	हस्त श्रवण रोहिणी	चित्रा धनिष्ठा मृगशिरा	विशाखा पू. भाद्रपद पुनर्वसु
तृ.स्थान	ष. स्थान	न. स्थान	द्वा. स्थान	पञ्चदशस्थान
केतु	०	०	०	०
मघा मूल अश्विनी				

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदाहरण—जैसे कि मान लिया जन्मनक्षत्र पुष्य है तो प्रथम वर्ष का स्वामी सूर्य, द्वितीय वर्ष का मङ्गल, तृतीय का केतु, चतुर्थ का चन्द्रमा, पञ्चम का बुध, षष्ठ का बृहस्पति, सप्तम का शुक्र, अष्टम का शनि, नवम का राहु पुनः दसवें आदि वर्षों के स्वामी सूर्यादि ग्रह क्रम से होते हैं। यहाँ शून्य स्थानों का कोई प्रयोजन नहीं ये कल्पना मात्र हैं ॥ ५०-५४ ॥

गुरुकुण्डली के फल—

रविवर्षे भवेद्दुःखं कुजवर्षे तथैव च।
केतोर्दशायां कृशता सुखं चन्द्रे बुधे तथा॥ ५५ ॥
गुरुभार्गवयोःराज्यं महाक्लेशः शनैश्चरे।
राहौ तथैव विज्ञेयं गदितं मिहिरादिभिः ॥ ५६ ॥

अन्वयः—रविवर्षे दुःखं भवेत् तथैव कुज वर्षे च केतोर्दशायां कृशता तथा चन्द्रे बुधे सुखं (भवेत्)।

गुरु-भार्गवयोः राज्यं शनैश्चरे महाक्लेशः राहौ (अपि) तथैव विज्ञेयं (इति) मिहिरादिभिः गदितम् ॥ ५५-५६ ॥

संस्कृतः—सुगमम् ॥ ५५-५६ ॥

हिन्दी—सूर्य के वर्ष में दुःख, मङ्गल के वर्ष में भी दुःख, केतु के वर्ष में दुर्बलता, चन्द्रमा और बुध के वर्ष में सुख, गुरु और शुक्र के वर्ष में राज्य तथा शनि और राहु के वर्ष में अत्यन्त क्लेश होता है ऐसा वराहमिहिरादि प्राचीनाचार्यों ने कहा है ॥ ५५-५६ ॥

वर्शेषों के फल पाक का क्रम—

वर्षप्रवेशेशपताक्यधीशा-
स्तेषां तु मध्ये बलवान् भवेद्यः।
एकोपि वा द्वित्रिगतो यदि स्या-
त्तस्यैव वर्षे प्रविभावनीयम् ॥ ५७ ॥

अन्वयः—वर्षप्रवेशेश पताक्यधीशाः तेषां मध्ये तु यः बलवान् भवेत् (तदा) एकोपि वा द्वि त्रि गतो यदि स्यात् तस्यैव वर्षे प्रविभावनीयम् ॥ ५७ ॥

संस्कृतः—वर्षप्रवेशेशपताक्यधीशा ये सन्ति तेषां मध्ये यः खेटः स्वतुङ्गादिस्थानवशाद्बलवान् अपिवैकः किन्तु कथितानां मध्ये चैकः खेटो द्वित्रिगतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि स्यादर्थाद्द्वित्रिस्थानाधीशः समागतस्तदा स च यद्यबलोपि तदा तस्यैव ग्रहस्य वर्षे स्वेष्टवर्षेप्रविभावनीयमर्थादाद्या दशा कल्पनीया । अत्रायं भावः । निजेष्टवर्षे यः पूर्वप्रदर्शित मुन्थहेशो वर्षप्रवेशेशाख्यः तथा केतुपताक्यधीशः केतुकुण्डलीजोवर्षपः तथा गुरुकुण्डलीजातो वर्षेशः । एतेषां वर्षेशानां मध्ये यो बली तस्यादौ 'रवौ नखाः' इत्यादि रूपा दशा लेख्याः । तत्रापि निजेष्टवर्षे कथितपताक्यधीशानां ज्ञानं कृत्वा तेषां त्रयाणां वर्षेशानां मध्ये स्वर्क्षादिस्थानरीत्या यो बलवान् स एवात्र प्रथमचतुर्मासेषु स्वफलदः । ततस्तन्न्यूनबलो ग्रहो चतुर्मासादनन्तरं मासचतुष्कं यावत्स्वफलदः । ततो मध्यफलदातुरपेक्षयायो निर्बलः स चाष्टममासादनन्तर मासचतुष्कं यावन्निजफलदः स्यात् । यद्वा चात्रैकोपि ग्रहोयदि प्रकारद्वयेन वा प्रकारत्रयेण वर्षपः समागतस्तदाऽऽदौ तस्य निर्बलत्वेपि स्वफलं कथनीयम् ॥ ५७ ॥

हिन्दी—ग्रन्थकार ने तीन प्रकार से (केतुपताकी चक्र, केतु कुण्डली एवं गुरुकुण्डली से) वर्षेशों का आनयन किया है । इन चार प्रकार से प्राप्त ग्रहों में से अधिक बलवान् ग्रह की पहले दशा 'रवौ नखाः स्युः खशरा शशाङ्के' के क्रम से लिखना चाहिये । उसमें भी केतुपताकी-केतुकुण्डली-गुरु कुण्डली से प्राप्त वर्षेशों में से अधिक बलवान् ग्रह वर्ष के प्रथम चार महीनों में ही अपना फल दे देता है । मध्य बलवान् ग्रह द्वितीय चार महीनों में तथा अल्पबली ग्रह अन्त के चार महीनों में फल देता है । इन तीनों प्रकार से एक ही ग्रह यदि वर्षेश हो तो वह सम्पूर्ण वर्ष अपना ही विशेष फल देता है, अथवा दो प्रकार से एक तथा अन्य प्रकार से दूसरा ग्रह वर्षेश हो तो दो से आया हुआ ग्रह वर्ष के प्रथम आठ महीनों में तथा दूसरा वर्ष के अन्त के चार महीनों में स्वकीय फल देता है । विशेषता यह है कि प्रकार त्रय से अथवा दो से आगत ग्रह चाहे सबल हो या दुर्बल वही प्रथम स्वकीय शुभाशुभ फल देने वाला होता है ॥ ५७ ॥

प्रकारत्रय से वर्षेश में विशेष—

पताकी कुण्डली केतोः कुण्डली च बृहस्पतेः ।
सर्वत्र पापसंयोगे संशयो जायते महान् ॥ ५८ ॥

अन्वयः—पताकी कुण्डली केतोः कुण्डली बृहस्पतेः च सर्वत्र कुण्डली बृहस्पतेः च पापसंयोगे (तदा) महान् संशयो जायते ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—केतोः पताकी तस्य कुण्डली तथा च बृहस्पतेः कुण्डली चेति त्रयं यदस्ति सर्वत्र चक्रत्रयेपि पापसंयोगे पापग्रहे वर्षाधीशे सतिमहान् संशयो महदरिष्टं जायते प्राप्नोति । अत्रेदमवधेयम् तत्र प्रथमं केतुपताकीचक्रम् । ततस्तत्कुण्डलीचक्रम्, ततो गुरुकुण्डलीचक्रम्, इति चक्रत्रयं विचारणीयम् । एवं चक्रत्रयमवलोक्य शुभाशुभसंयोगाच्छुभाशुभफलं कथनीयम् । तद्यथा । केतुपताक्यां शुभे वर्षेशे जाते सति वर्षस्याद्यत्रिभागे किञ्चादौ मासचतुष्टयावधि शुभं कथनीयम् । एवं केतुकुण्डल्यां शुभे वर्षेशे सति मध्यत्र्यंशे किन्तु मासचतुष्टयादनन्तरमष्टममासं यावच्छुभम् । एवं पुनर्गुरुकुण्डलिकायां शुभेऽब्दपे सति तदाऽन्तिमत्रिभागेऽर्थादष्टममासादनन्तरं वर्षावसानं यावच्छुभम् । एवं चक्रत्रयेपि शुभपापसंयोगादुक्तरीत्या मिश्रं फलं कथनीयम् । यदि पुनश्चक्रत्रयेपि वर्षेशेषु पापग्रहेषु विद्यमानेषु तदा महदरिष्टम् ।

अथ मघाजन्मर्क्षवशाच्चक्रत्रयस्याप्युदाहरणमुच्यते । तद्यथा—

केतुपताक्यां तन्नक्षत्रोपरि केतुस्तस्मादादौ प्रथमाब्दपः केतुः । ततः केतुकुण्डलिकायां तस्योपरि गुरुस्तेन प्रथमाब्दे द्वितीयवर्षेशो गुरुः । ततो गुरुकुण्डलिकायां तस्योपरि केतुस्तेन प्रथमाब्दे तृतीयवर्षेशः केतुः । ततो द्वितीयवर्षे प्रथमवर्षेशः शुक्रः । द्वितीयवर्षेशो गुरुरेव । तृतीयवर्षेशश्चन्द्रः । एवं कृते जातं तच्चक्रम् ॥ ५८ ॥

हिन्दी—जिस वर्ष में केतुपताकी चक्र, केतुकुण्डली चक्र और गुरुकुण्डली चक्र इन तीनों से यदि पापग्रहों का योग आवे अर्थात् जिस वर्ष में तीनों प्रकार से वर्षेश पापग्रह ही हों तो उस वर्ष जीवन में महान संशय और महदरिष्ट होता है ॥ ५८ ॥

प्रकारत्रयजनित चक्र

वर्ष	१	२	३	४	५	६	७	८	९	१०	११	१२
	३७	३८	३९	४०	४१	४२	४३	४४	४५	४६	४७	४८
	७३	७४	७५	७६	७७	७८	७९	८०	८१	८२	८३	८४
के.पता.	के.	शु.	र.	चं.	मं.	बु.	श.	बृ.	रा.	के.	शु.	र.
के.कुण्ड	गु.	बृ.	बृ.	चं.	चं.	चं.	के.	०	०	शु.	शु.	शु.
गु.कुण्ड	के.	चं.	बु.	बृ.	शु.	श.	रा.	र.	मं.	के.	चं.	बु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्ष	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
	४९	५०	५१	५२	५३	५४	५५	५६	५७	५८	५९	६०
	८५	८६	८७	८८	८९	९०	९१	९२	९३	९४	९५	९६
के.पता.	चं.	मं.	बु.	श.	बृ.	रा.	के.	शु.	र.	चं.	मं.	बु.
के.कुण्ड	रा.	रा.	रा.	के.	०	०	श.	श.	श.	र.	र.	र.
गु.कुण्ड	बृ.	शु.	श.	रा.	र.	मं.	के.	चं.	बु.	वृ.	शु.	श.

वर्ष	२५	२६	२७	२८	२९	३०	३१	३२	३३	३४	३५	३६
	६१	६२	६३	६४	६५	६६	६७	६८	६९	७०	७१	७२
	९७	९८	९९	१००	१०१	१०२	१०३	१०४	१०५	१०६	१०७	१०८
के.पता.	श.	बृ.	रा.	के.	शु.	र.	चं.	मं.	बु.	श.	बृ.	रा.
के.कुण्ड	के.	०	०	बु.	बु.	बु.	मं.	मं.	मं.	के.	०	०
गु.कुण्ड	रा.	र.	मं.	के.	चं.	वु.	वृ.	शु.	श.	रा.	र.	मं.

पञ्चस्वर कथन—

उदितं भ्रमितं भ्रान्तं सन्ध्याऽस्तं तदनन्तरम्।
जन्म कर्म तथाऽऽधानं पिण्डं छिद्रं तत: परम्॥ ५९ ॥
पञ्च बालादिकावस्था नामाद्यक्षरतस्तथा।
आद्यो बाल: कुमारश्च युवा वृद्धो मृतोपि वा॥ ६० ॥

अन्वय:—उदितं-भ्रमितं-भ्रान्तं-सन्ध्या-तदनन्तरं अस्तं तत: परं जन्म-कर्म-आधानं-पिण्डं तथा छिद्रम्।

बालादिकावस्था तथा नामाद्यक्षरत: पञ्च (अवस्था) आद्या बाल: कुमार: युवा च वृद्धो वा अपि मृतो ॥ ५९-६० ॥

संस्कृत:—अथ पूर्वरीत्या प्राप्तस्य संशयस्य निर्णयाय पञ्चस्वरप्रकार: कथ्यतेतत्रादौ वर्णस्वरावगमाय स्वरचक्रमुच्यते। परञ्च ग्रन्थकारेण तत्प्रकारस्तु नोक्त:। अतो नरपतिजयचर्यासमाख्यग्रन्थानुसारेण तदुच्यते। तद्यथा। तत्र अ इ उ ए ओ एते पञ्चस्वरा: सन्ति। अत्र षोडशस्वरमध्ये पञ्चस्वरा एव मुख्या-स्तथा दीर्घस्वरस्य यत्फलं तदेव ह्रस्वस्वरस्य फलं यथा आ अ। इत्यादिकमत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणं मदुक्तजातकक्रोडाभिधे ग्रन्थे द्रष्टव्यम् । पूर्वापररूपाः षड्रेखास्तथा याम्योत्तररूपाः षोडशरेखा विधेयाः । एवं कृते पञ्चसप्ततिमिताः कोष्ठका भवेयुः । तेषां मध्ये चोर्ध्वगतेषु पञ्चकोष्ठकेषु तिर्यकपङ्क्ति क्रमेण अ इ उ ए ओ एते पञ्चस्वराः स्थाप्याः । तेषामधस्तत्क्रमादेव त्रिंशत्कोष्ठकेषु कादिहान्तान् ङ् ञ णोज्झितान् वर्णान् लिखेत् । तदुक्तं नरपतिजयर्याम्—

'सर्वकालं बली वर्णः सर्वव्यापी न संशयः ।
तस्मात्सर्वप्रयत्नेन वर्णे वीक्ष्यं बलाबलम् ॥
कादिहान्तान् लिखेद्वर्णान् स्वराधो ङ ञ णोज्झितान् ।
तिर्यक् पङक्तिक्रमेणैव पञ्चत्रिंशत्प्रकोष्ठके ॥
न प्रोक्ता ङ ञ णा वर्णा नामादौ सन्ति ते नहि ।
चेद्भवन्ति तदा ज्ञेया गजडास्ते यथा क्रमम् ॥
यदि नाम्नि भवेद्वर्णः संयोगाक्षरलक्षणः ।
ग्राह्यस्तत्रादिमो वर्ण इत्युक्तं ब्रह्मयामले ॥
प्रसुप्तो भाषतो येन येनागच्छति शब्दितः ।
तत्र नामाद्यवर्णे या मात्रा मात्रास्वरः स हि ॥
नरनामादिमो वर्णो यस्मात्स्वरादधः स्थितः ।
स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते ॥'

अथ प्रस्तुतमुच्यते । अत्र यस्य यज्जन्मर्क्षं तद्वशाच्छतपदचक्रानुसारेण या नामादिमवर्णस्तस्योपरि विहितचक्रे यः स्वरः समागतः स एवात्र तस्य वर्ण-स्वरः स्यादयमेव ज्योतिर्विदां सम्प्रदायो निर्भरः । अत्राप्पयदीक्षितेनेदं गौडमतं कैश्चित्स्वीकृतमिति तन्नसमीचीनं यतः सर्वेषामिदमेव मतमिति मुख्यं मतं ममापि सम्मतम् । यस्य पुरुषस्य यो वर्णस्वरस्तस्य स्वरस्योदितसंज्ञा । तस्माद् द्वितीयस्य स्वरस्य भ्रमितं तृतीयस्य भ्रान्तं चतुर्थस्य सन्ध्या पञ्चमस्यास्तमिति संज्ञा । पुनरेतेषां संज्ञान्तरमाह । उदितस्वरस्य जन्म । भ्रमितस्वरस्य कर्म तथा भ्रान्तस्वरस्याधानम् । सन्ध्यास्वरस्य पिण्डः । अस्तस्वरस्य छिद्रमितिसंज्ञा । पुनः संज्ञान्तरमाह । नामाद्यक्षरतः पञ्च बालादिकावस्थाः स्युः । तत्राद्यः स्वरो बालः । ततो द्वितीयः कुमारः । तृतीयो युवा । चतुर्थो वृद्धः । पञ्चमो मृत इति ॥ ५९-६०॥

हिन्दी—आचार्य ने वर्णस्वर क्रम से उदित-भ्रमित तथा भ्रान्त स्वरादि संज्ञा की कल्पना की है परन्तु कौन सा पञ्चस्वर है तथा किस नामादि अक्षर से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किस प्रकार ये संज्ञायें कल्पित की जायेंगी इसको नहीं कहा है अतएव इसके ज्ञान हेतु संस्कृत टीका में उक्त वर्णस्वर ज्ञान को देखें। वर्णस्वर चक्र में जन्मनक्षत्र का जो नामादि वर्ण हो उसका जो (अ, इ, उ, ए ओ) इन पाँचों स्वरों में से जो स्वर हो वह उसका **उदित** स्वर होता है। उदित स्वर से दूसरे स्वर की **भ्रमित** संज्ञा, तीसरे की **भ्रान्त**, चौथे की **संन्ध्या** और पाँचवें की **अस्त** संज्ञा होती है। जन्मनक्षत्रवश नामाद्यक्षर के वश वर्णस्वर में बालादि अवस्था होती है। जैसे प्रथम **बालावस्था** द्वितीय **कुमारावस्था** तृतीय **युवावस्था** चतुर्थ **वृद्धावस्था** तथा पञ्चम **मृतावस्था** होती है।

विशेष—इस ग्रन्थ में मुख्यतः आयुर्दाय का विचार है अतएव यहाँ जन्मनक्षत्र के अनुसार स्वरों का विचार किया गया है अन्यथा यात्रा, युद्ध, विवादादि तथा दान, देवार्चन, विवाहादि शुभाशुभ कार्यों के विचार में व्यवहार नाम वाले स्वरों का ही विचार करना चाहिये क्योंकि नरपतिजयचर्यादि ग्रन्थों में व्यवहार नाम से ही स्वरों का विचार किया गया है जैसे नरपतिजयचर्या में—

प्रसुप्तो भाषते येन येनागच्छति शब्दितः।
तत्र नामाद्य वर्णे या मात्रा मात्रास्वरः स हि॥

जिसके व्यवहार नाम अनेक हों उनके लिये किस नाम से विचार होगा। इसका निर्णय निम्न श्लोक से स्पष्ट है—

संज्ञान्तर सहित वर्णस्वर चक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
क	ख	ग	घ	च	वर्ण
छ	ज	झ	ट	ठ	,,
ड	ढ	त	थ	द	,,
ध	न	प	फ	ब	,,
भ	म	य	र	ल	,,
व	श	ष	स	ह	,,
उदित	भ्रमित	भ्रान्त	संध्या	अस्त	संज्ञा
जन्म	कर्म	आधान	पिण्ड	छिद्र	संज्ञान्तर
बाल	कुमार	युवा	वृद्ध	मृत	संज्ञान्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थान्तर में— बहूनि यस्य नामानि नरस्य स्यु कथञ्चन ।
ततः पश्चाद्भवो नाम ग्राह्यं स्वरविशारदः ।।

इससे भी स्पष्ट सिद्ध है कि केवल आयुर्दाय को छोड़कार अन्य सभी व्यवहारों के लिये व्यवहार नाम ही ग्रहण करना चाहिये ।। ५९-६० ।।

कथितस्वरों के फल—

उदिते विजयो नित्यं भ्रमिते लाभ एव च।
भ्रान्ते च सिद्धिमाप्नोति सन्ध्यास्ते मरणं ध्रुवम् ।। ६१ ।।

अन्वयः—उदिते नित्यं विजयो भ्रमिते एव लाभ च भ्रान्ते सिद्धिमाप्नोति सन्ध्यास्ते मरणं ध्रुवं च ।। ६१ ।।

संस्कृतः—अथ कथितस्वराणां साधारणरूपेण फलं प्रदर्शितम् । तत्रोदिते स्वरे सर्वकार्येषु नित्यं विजयः तथा भ्रमिते भ्रमिताभिधे स्वरे लाभः, भ्रान्ते सर्व सिद्धिं प्राप्नोति । सन्ध्यास्ते सन्ध्यासंज्ञके तथास्ताभिधे च ध्रुवं निश्चितं मरणमिति । अथ ग्रथान्तरे विशेषफलमुक्तम्—

'वर्षं मासो दिनं चैव तिथिनक्षत्रवासराः ।
सन्ध्यास्ते च यदा सर्वं तदा स्यादशुभं महत् ।।
हानिर्दुःखं महाक्लेशो धननाशश्च जायते ।
मरणं घातपातादि तद्दिने जायते ध्रुवम् ।।
तस्मिन् दिने च यो रोगो जायते पुरुषस्य हि ।
असाध्यः स भवेद्रोगो मृत्युक्लेशादिदायकः ।। ६१ ।।

हिन्दी—उदित स्वर में कार्य करने से विजय, भ्रमित स्वर में लाभ, भ्रान्त स्वर में सिद्धि और संध्या तथा अस्त स्वर में निश्चित ही मरण होता है ।। ६१ ।।

दशास्वर कथन—

यत्र नामाक्षरं प्राप्तं तत्र चैवोदितः स्वरः।
तस्माद्वर्षं विजानीयाद्वर्षान्मासो भवेत्पुनः।। ६२ ।।
मासद्वयं विधातव्यं दिनं च द्वादशोत्तरम् ।
एवं क्रमेण बोधव्यो वर्षभागस्तु पञ्चधा।। ६३ ।।
कार्त्तिकस्य परे भागे नव ग्राह्या यथा तथा।
मार्गपौषो तथा देयं माघस्य च दिनत्रयम् ।। ६४ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—नामाक्षरं यत्र प्राप्तं तत्र चैव उदितः स्वरः तस्मात् वर्षं विजानीयात् पुनः वर्षात् मासो भवेत्।

मासद्वयं विधातव्यं द्वादशोत्तरं च दिनं एवं क्रमेण वर्षभागस्तु पञ्चधा बोधव्यो।

कार्तिकस्य परे भागे यथा नव ग्राह्या तथा मार्ग पौषो देयं तथा माघस्य च दिनत्रयं देयम् ॥ ६२-६४ ॥

संस्कृतः—यत्र नामाक्षरं प्राप्तं भवेत्तत्रैवोदितः स्वरः स्यात्। तस्मादुदितस्वराद्वर्षं वर्षारम्भं विजानीयात्। पुनस्तस्माद्वर्षान्मासो भवेत्। अनेन वर्षादिकागमः सूचितः।

अथ फलं मासो भवेत्तदेव दर्शयति। द्वादशोत्तरं दिनं द्वादशदिनाधिकं मासद्वयं चोदितस्वरे विधातव्यं ज्ञातव्यम्। एवं क्रमेण भ्रमितादिस्वरेषु पञ्चधा वर्षभागो बोधव्यः किन्तु पञ्चमासात्मकं वर्षं भवतीति विभाव्यम्।

तदेव स्पष्टयति। कार्तिकस्य परे भागे चान्तिमांशे नव वासरा ग्राह्याः। तथा मार्गपौषो सम्पूर्णौ ग्राह्यौ। ततो माघस्य दिनत्रयं माघमासाद्यभागस्य त्रीणि दिनानीति क्रमेण यथा वर्षं पूर्णं भवेत्तथा पञ्चस्वरेषु देयं स्थाप्यम्। अत्रेदमवधेयम्। कार्तिकशुक्लपक्षस्यान्तिमनवदिनानि तथा मार्गस्यत्रिंशद्दिनानि पौषस्य च त्रिंशद्दिनानि तथा माघस्य त्रीणि दिनानि चैतेषां दिनानां योगमितानि द्विसप्ततिदिनानि अकारस्वराधः स्थाप्यानि। एवं माघस्य सप्तविंशतिदिनानि फाल्गुनस्य त्रिंशद्दिनानि चैत्रस्य पञ्चदशदिनानि चैतेषां योगमितानि द्विसप्ततिदिनानीकारस्वराधः स्थाप्यानि। एवं चैत्रस्यावशिष्टानि पञ्चदशदिनानि वैशाखस्य त्रिंशद्दिनानि तथा ज्येष्ठस्य सप्तविंशति दिनानि चैतेषा योगसमान्युकारस्य स्वरस्याधः स्थाप्यानि। एवं ज्येष्ठस्य त्रीणि दिनानि तथाऽऽषाढस्य त्रिंशद्दिनानि श्रावणस्य च त्रिंशद्दिनानि भाद्रपदस्य नवदिनानि चैषां योगमितानि द्विसप्ततिदिनानि चैकारस्वराधः स्थाप्यानि। एवं भाद्रस्यैकविंशतिदिनानि तथाऽऽश्विनस्य त्रिंशद्दिनानि कार्त्तिकस्यैकविंशतिदिनानि ओकारस्वराधः स्थाप्यानि। एवं क्रमेण पञ्चमासात्मकं वर्षं बोधव्यम्।

अत्राकारादिस्वराणामुपलक्षणम्। किञ्च यस्य यो वर्णस्वर उदितादिकस्तदारभ्य वर्षविभागो विभाव्यः। तथा कार्त्तिकादीत्युपलक्षणम्। तेन स्वस्वजन्मदिनादेव वर्षविभागो बोध्यः।

कृष्णदत्तीय सूत्रम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षप्रमाणं च शरैर्विभक्तं लब्धै दिनैर्जन्मदिनात्प्रकल्प्यः ।
वर्षप्रभागोऽत्र जनेःस्वराद्वै क्रमादधस्थो गणकैः फलार्थम् ॥

वर्षप्रमाणं खरसाग्निमितं शरैः पञ्चभिर्भक्तं लब्धैर्दिनैर्द्विसप्ततिमितैर्जन्मदिनादारभ्य जनेः स्वरात्क्रमाज्जन्माख्यादर्थादुदितादिस्वरक्रमादधःस्थोवर्षप्रभागो गणकैः फलार्थं प्रकल्प्यः ।

अत्रोपपत्तिः । अत्र 'त्रिंशद्दिनः सावनमास एव' इत्यागमप्रमाणान्मासविभागकल्पनावशात्स्वजन्मदिनमारभ्य त्रिंशद्दिनात्मक एकैको मासो वर्षमध्ये भवेत् । अतएव द्वादशमासानां योगसमं दिनात्मकं वर्षमानं खरसाग्निमितं जातम् (३६०) परञ्चात्र फलार्थमेकस्मिन् वर्षे यथा पञ्चस्वराणां स्वस्वोदिताभिधानां तुल्यमेव भोगमानं भवेत्तथा वर्षविभागः कल्पनीयः । ततोऽनुपातः । यदि पञ्च-प्रमितैः स्वरैः स्वस्वभोगजयोगमानं खरसाग्निमितं लभ्यते तदैकेन स्वरेण किमिति । फलं स्वस्वस्वरभोगमानिमिति जातं [(३६० × १) ÷ ५ = (७२)] ।

अथ जन्मदिनमारभ्य पूर्वोक्तमासलक्षणेन कार्त्तिकादिको मासो बोधव्यः। अथ प्राचीनोक्तकार्त्तिकादिमासकल्पना कार्त्तिकशुक्लसप्तमीजन्मवतः समीचीना स्यात् तदन्यथा तु मदुक्तमेव विभाव्यम् । अत उपन्नं सर्वम् ॥ ६२-६४ ॥

हिन्दी—वर्णस्वर चक्र में जिस स्वर के नीचे का नामाक्षर प्राप्त हो वही उदित स्वर होता है । उसी उदित स्वर से वर्षारम्भ होता है एवं वहीं से वर्ष का पाँच भाग कर पाँच मास की अर्थात् उदित-भ्रमित-भ्रान्त-संध्या तथा अस्त संज्ञक मासों की कल्पना आचार्य ने की है ।

एक-एक भाग 'द्वादशोत्तरदिनमासद्वय' अर्थात् बहत्तर-बहत्तर दिन के क्रम से वर्ष में पाँच भाग कर के उदितादि पाँचों स्वर होते हैं । इस तरह एक वर्ष में पाँच कल्पित मास होते हैं ।

इस ग्रन्थ में 'कार्तिकान्त नवाहानि' इत्यादि से वर्षारम्भ निर्धारित किया गया है अतएव यहाँ भी 'वर्षभागस्तु पञ्चधा' कहकर उसी आधार पर इस को स्पष्ट किया गया है जैसे कार्तिक शुक्ल पक्ष के अन्त का नव दिन और मार्गशीर्ष-पौष सम्पूर्ण तथा माघ के तीन दिन अर्थात् इन ७२ दिनों को 'अ' स्वर के नीचे । माघ के शेष २७ दिन-फाल्गुन के ३० दिन-चैत्र के १५ दिन इन ७२ दिनों को 'इ' स्वर के नीचे । चैत्र के शेष १५ दिन-वैशाख के ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिन ज्येष्ठ के २७ दिन इन ७२ दिनों को 'उ' स्वर के नीचे। ज्येष्ठ के शेष ३ दिन-आषाढ़ के ३० दिन-श्रावण के ३० दिन और भाद्रपद के ९ दिन इन ७२ दिनों को 'ए' स्वर के नीचे तथा भाद्रपद के २१ दिन आश्विन के ३० दिन और कार्तिक के २१ दिन इन ७२ दिनों को 'ओ' स्वर के नीचे स्थापित करने से पाँच मास होते हैं। यहाँ पर अकारादि स्वर उपलक्षण मात्र हैं वस्तुतः वर्णस्वर से जिसका जो स्वर उदित हो उसी से वर्ष भाग की कल्पना होती है।

मासात्मक दशास्वरचक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
का.९	मा.२७	चै.१५	ज्ये.३	भा.२७	मासदिन संख्या
मा.शी.३०	फा.३०	वै.३०	आ.३०	आश्वि.३०	मासदिन संख्या
पौ.३०	चैत्र१५	ज्ये.२७	श्रा३०	का.२१	मासदिन संख्या
मा.३	०	०	भा.९	०	मासदिन संख्या
७२दि.	७२	७२	७२	७२	सम्पूर्ण दिनसंख्या

तथा स्व स्व जन्मदिवस से ७२ दिन का एक-एक मास कल्पना करके पाँच मास एक वर्ष में होते हैं। ये ही मास क्रम से उदितादि स्वरों के दशामान होते हैं ॥ ६२-६४ ॥

तिथ्यादि स्थापन कथन—

एवं क्रमेण दातव्यो वर्ष पूर्णं यथा भवेत्।
तिथिः प्रतिपदादिश्च कुजादिर्वारनिर्णयः ॥ ६५ ॥
नन्दा भद्रा जया रिक्ता पूर्णाश्चापि यथा क्रमम्।
क्रमेणाङ्काः प्रदातव्या ग्राह्यश्चाङ्कसमुच्चयः ॥ ६६ ॥
चन्द्राष्टौ (८१) प्रथमे देया नग नागा (८७) द्वितीयके।
तृतीये चाग्निनवकं(९३) चतुर्थे च नवग्रहाः(९९)॥ ६७ ॥
पञ्चोत्तरशतं (१०५) देयं पञ्चमे पञ्चसुक्रमात्।
अकारादि स्वरेष्वेवं तिथ्यङ्काश्च प्रदापयेत्॥ ६८ ॥

अन्वयः—एवं क्रमेण दातव्यो यथा पूर्णं वर्षं भवेत् तिथिः प्रतिपदादि वार निर्णयः कुजादि (भवेत्)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्दा-भद्रा-जया-रिक्ता-पूर्णाश्च अपि यथा क्रमम् (तथैव) क्रमेणाङ्काः प्रदातव्या अङ्क समुच्चयः ग्राह्यश्च ।

प्रथमे चन्द्राष्टौ देया द्वितीयके नग नागा तृतीये च अग्नि नवकं चतुर्थे च नवग्रहाः ।

पञ्चमे पञ्चोत्तरशतं देयं अकारादि स्वरेषु पञ्चसुक्रमात् एवं तिथ्यङ्काश्च प्रदापयेत् ॥ ६५-६८ ॥

संस्कृतः—एवं क्रमेणाकारादिस्वरवशाद्यथा वर्षपूर्णं वर्षसमाप्तं भवेत्तथा प्रतिपदादिः शुक्लप्रतिपदादिस्तिथिस्तथा कुजादिर्वारनिर्णयश्च दातव्यः । अनेन तिथिस्थापनं प्रदर्शितम् ।

नन्दाभद्राजयारिक्तापूर्णा इति तिथ्योपि यथाक्रमं देयाः । तथा क्रमेणाङ्काः प्रदातव्याः पश्चात्तदङ्कसमुच्चयो ग्राह्यः । अनेन गणितोपयुक्तास्तिथ्यङ्काः प्रदर्शिताः ।

तदेव स्पष्टयति प्रथमे अकारस्वरे चन्द्राष्टौ रूपाधिकाशीतिमिताः तथा द्वितीयके इकारस्वरे नगनागाः सप्ताशीतिमिताः । तृतीये उकारस्वरेचाग्निनवकं त्रिनवतिमिताः । चतुर्थे चैकारस्वरे नव ग्रहा एकोनशतमिताः ।

पञ्चमे ओकारस्वरे पञ्चोत्तरशतं शरखेन्दुमिताः इति क्रमेण देयं स्थाप्यम्। एवमकारादिस्वरेषु पञ्चसु तिथ्यङ्कान् प्रदापयेद्दद्याद्गणक इति शेषः ।

अत्रेदमवधेयम् । अकारस्वरे तदधःस्थकोष्ठे नन्दातिथिस्तथा शुक्लकृष्णपक्षयोर्वशात्तत्संख्याश्च देयाः । तद्यथा शुक्लपक्षे प्रतिपदि एकसंख्या, षष्ठीतिथेषट्संख्या, एकादशीतिथेरेकादश, एवं कृष्णपक्षे प्रतिपत्तिथेः षोडशमिताङ्कः, तथा षष्ठीतिथेरेकविंशतिमिताङ्कः, तथैकादशीतिथेः षड्विंशतिमिताङ्कः, एतेषामङ्कानां १।६।११।१६।२१।२६। योगेनेन्दुनागमितेन समोऽङ्कसमुच्चयः (८१) अकारस्वराधःस्थ । एवं पक्षद्वयस्य भद्रातिथिप्रजातानामङ्कानामेषां २।७।१२।१७।२२।२७। योगेन नगनागमितेन समोऽङ्कसमुच्चयः (८७) इकारधस्थ । एवं पक्षद्वयस्य जया तिथिप्रभवानामङ्कानां ३।८।१३।१८।२३।२८। योगोऽयं (९३) उकारस्वरादधःस्थश्चाङ्कसमुच्चयो जातः । एवं पक्षद्वयस्य रिक्तातिथिजानामङ्कानां ४।९।१४।१९।२४।२९ योगोऽयं (९९) एकाराधःस्थोऽङ्कसमुच्चयो जातः । एवं पक्षद्वयस्य पूर्णातिथिप्रजातानामङ्कानामेतेषां ५।१०।१५।२०।२५।३० योगोऽयं (१०५) ओकाराधःस्थोऽङ्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुच्चयो जातः । अथाकरादिस्वरक्रमात्कुजादयो वाराः स्थाप्याः । अत्रेयं व्यवस्था सम्प्रादायजाता । अस्वरे भौमवारो बुधस्य चतुर्विंशतिमिताघटिकाः । एवमिकारस्वरे बुधस्य षट्त्रिंशद्घटिकास्तथा गुरोरष्टचत्वारिंशन्मिता घटिकाः। एवमुकारस्वरे गुरोर्द्वादशमिता घटिकास्तथा शुक्रस्य षष्टिघटिकाः शनेश्च द्वादशघटिकाः । एवमेकारस्वरे शनेरष्टचत्वारिंशन्मिता घटिकास्तथार्कस्य षट्-त्रिंशन्मिता घटिकाः । एवमोकारस्वरे रवेश्चतुर्विंशतिमिताघटिकास्तथा चन्द्रस्य षष्टि घटिकाः । एवमेकैकस्वरे वेदाष्टमिता घटिकाः स्युः ॥ ६५-६८ ॥

हिन्दी—पूर्वोक्त क्रम से अकारादि स्वरों के नीचे प्रतिपदादि तिथि तथा भौमादि वार को देना चाहिये जिससे कि वर्ष पूर्ण हो जाये ।

तिथि दान में अ स्वर के नीचे नन्दा, इ स्वर के नीचे भद्रा, उ स्वर के नीचे जया, ए स्वर के रिक्ता तथा ओ स्वर के नीचे पूर्णा तिथि देकर क्रम से तिथि के अङ्कों का योग करना चाहिये ।

योग करने पर अ स्वर के नीचे ८१, इ स्वर के नीचे ८७, उ स्वर के नीचे ९३, ए स्वर के नीचे ९९, ओ स्वर के नीचे १०५ होते हैं । कुजादिवार निर्णय में सातवार की घटी ६० × ७ = ४२० इसलिए पाँच से भाग दिया तो ४२० ÷ ५ = ८४ घटी । एक स्वर का मान हुआ ।

तिथ्यादि स्वर चक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
१।६।११	२।७।१२	३।८।१३	४।९।१४	५।१०।१५	शु.पक्षति.
१६।२१।२६	१७।२२।२७	१८।२३।२८	१९।२४।२९	२०।२५।३०	कृ.पक्षति.
नन्दा	भद्रा	जया	रिक्ता	पूर्णा	नन्दा
८१	८७	९३	९९	१०५	ति.योग
मं.६०	बु.३६	बृ.१२	श.४८	र.२४	कुजादि
बु.२४	वृ.४८	शु.६०, श.१२	र.३६	चं.६०	वारघटी
८४घ.	८४घ.	८४घ.	८४घ.	८४घ.	योग

अब यहाँ **अ** स्वर के नीचे भौमवार ६० घटी तथा बुधवार २४ घटी । **इ** स्वर के नीचे बुध की शेष ३६ घटी तथा गुरुवार की ४८ घटी । **उ** स्वर के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीचे गुरुवार की १२ शुक्रवार की ६० शनिवार की १२ घटी। **ए** स्वर के नीचे शनिवार की ४८ रविवार की ३६ घटी। **ओ** स्वर के नीचे रविवार की शेष २४ घटी और चन्द्रवार की ६० घटी। इस तरह एक-एक स्वर के नीचे ८४ घटी के भाग होते हैं॥ ६५-६८॥

पूर्व कल्पित ७२ दिनात्मक में भोग काल

यथा वर्षान्मासभागः कृतश्च स्वर पञ्चके।
तथा मासाद्दिनभागस्त्वस्वरात्स्वरपञ्चके॥ ६९॥
चतुर्विंशतिदण्डाश्च चतुर्दशदिनानिच।
उदितादि विभागेन फलं वाच्यं यथा तथा॥ ७०॥

अन्वयः—यथा स्वरपञ्चके वर्षान् मासभागः कृतः तथा मास दिन भागः तु स्वरात् स्वर पञ्चके (भवेत्)।

चतुर्विंशति दण्डाः चतुर्दश दिनानि च यथा तथा उदितादि विभागेन फलं वाच्यम्॥ ६९-७०॥

संस्कृतः—यथा येन विधिना पूर्वमकारादिस्वरपञ्चके वर्षात्खरसाग्नि-प्रमाणान्मासभागोद्विसप्ततिदिनात्मकः कृतः स्थापितः तथा तेन प्रकारेण मासाद्द्विसप्ततिदिनमानाद्दिनभागः किन्त्वकारादिस्वराणां स्वस्वभोगमानेष्व-प्यस्वरात्स्वरपञ्चके अर्थात् अकारस्वरमारभ्य पञ्चसु स्वरेषु दिनादिकभोग-कालो विधेयः।

तदेव स्पष्टयति। उदितादिविभागेन विहितोदितादिस्वरक्रमेण चतु-र्विंशतिदण्डास्तथा चतुर्दशदिनानि कल्प्यानि। ततो यथा तथा फलं वाच्यम्। अत्रेदमवधेयम्। पूर्वमुदितस्वरस्य द्विसप्ततिभोगकालमानं यदस्ति तन्मध्ये तत्पञ्चमांशसममुदितस्वरस्य भोगमानम्, ततो भ्रमितस्वरस्य तत्समम्, ततो भ्रान्तस्वरस्य तत्समम्, ततः सन्ध्यास्वरस्य तत्समम्, ततोऽस्तस्वरस्य तत्समम्, ततो द्वितीयस्वरेभ्रमिताख्ये प्रथमं भ्रमितस्य ततो भ्रान्तस्य ततो सन्ध्यास्वरस्य ततोऽस्तस्वरस्य। एवमन्यस्वरेपि दिनविभागादिकमन्तर्दशामानं कल्पनीयम्।

अत्रोपपत्तिः। पूर्वमुदितस्वराणां यद्भोगमानं द्विसप्ततिदिनात्मकं सावन-रूपं विहितम् तत्र यदि फलकथनार्थमेकैकस्वरभोगे पञ्चस्वराणां भोगमानं कर्त्तुमिष्टं तदर्थमनुपातः। यदि पञ्चस्वरैः स्वस्वभोगमानानामन्तर्दशारूपाणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगसमं द्विसप्ततिमितं वर्षमानं लभ्यते तदैकेन स्वरेण किमिति । फलं तस्य भोगमानं समानं यत्तदेवान्तर्दशामानं स्यादिति रूपं ७२ ÷ ५ = १४।२४ । अत उपपन्नं सर्वम् ॥ ६९-७० ॥

हिन्दी—पूर्व में एक वर्ष में ७२ दिनों के क्रम से पाँच मासों की जो कल्पना की गई है अब उन्हीं मासों में अ स्वरादि मासों में दिनात्मक भाग की कल्पना करते हैं । ७२ दिन का पाँचवाँ भाग १४ दिन २४ घटी होता है । यह अनुपात द्वारा आनीत हैं जैसे ५ स्वर का भोग काल यदि ७२ दिन है तो एक स्वर का ७२ ÷ ५ = १४ दिन २४ घटी का एक भाग हुआ । यह अन्तर्दशा की तरह स्व स्व स्वर से प्रारम्भ होता है । जैसे उदित स्वर में पहले उदित का फिर क्रमशः भ्रमित-भ्रान्त-संध्या और अस्त का भाग होता है । भ्रमित में प्रथम भ्रमित का तदन्तर भ्रान्त-संध्या-अस्त और उदित का भोग काल होता है इसी तरह भ्रान्त-संध्या और अस्त स्वर में भी समझना चाहिये ॥ ६९-७० ॥

बहत्तर दिनात्मक अन्तरभोग चक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
१४	१४	१४	१४	१४	दिन
२४	२४	२४	२४	२४	घटी

अन्तर्दशा फल—

उदितादित्रिकं चेत्स्यादन्योन्यं भाग संस्थितम् ।
तदा शुभं विजानीयान् मध्यं सन्ध्यादि संस्थितम् ॥ ७१ ॥
अन्योन्यभागसंस्थं चेत्सन्ध्यास्तेऽरिभयं भवेत् ।
तदा क्लेशं विजानीयादुदितादित्रिके समम् ॥ ७२ ॥

अन्वयः—उदितादि त्रिकं चेत् अन्योन्यं भाग संस्थितं स्यात् तदा शुभं विजानीयात् सन्ध्यादि संस्थितं (तदा) मध्यम् ।

अन्योन्य भागसंस्थं चेत् सन्ध्या अस्ते तदा अरिभयं क्लेशं भवेत् उदितादि त्रिके समम् (फलम्) ॥ ७१-७२ ॥

संस्कृतः—उदितादित्रिकमर्थादुदितस्वरस्तथा भ्रमितस्वरस्तथा भ्रान्तस्वर इतिस्वरत्रिकं चेद्यदन्योन्यं परस्परं भागसंस्थितमर्थादुदितस्वरे कथितत्रिकम्, अथवा भ्रमितस्वरे कथितत्रिकम्, अथवा भ्रान्तस्वरे कथितत्रिकं स्यात्तदा शुभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्यादिकं विजानीयात् । चेद्यद्युक्तं त्रिकं सन्ध्यादि संस्थितं सन्ध्यास्ते स्वरद्वये स्यात्तदा मध्यं स्यात् ।

सन्ध्यास्ते स्वरद्वये चेदन्योन्यभागसंस्थमर्थात्सन्ध्यास्वरे सन्ध्यास्तस्वरयोर्भोगकालः । अथवाऽस्तेऽस्तस्वरे सन्ध्यास्तस्वरयोर्भोगसंस्थं तदाऽरिभयं तथा क्लेशं महत्कष्टं विजानीयात् । उदितत्रिके चेद्यदि सन्ध्यास्तभोगसंस्थं तदासमं मध्यं फलं स्यात् ॥ ७१-७२ ॥

हिन्दी—उदितादि तीनों स्वरों की परस्पर अन्तर्दशायें शुभफलदायक होती हैं अर्थात् **उदित** स्वर में उदित-भ्रमित और भ्रान्त स्वर की अन्तर्दशा, **भ्रमित** स्वर में भ्रमित-भ्रान्त तथा उदित स्वर की अन्तर्दशा एवं **भ्रान्त** स्वर में उदित-भ्रमित-भ्रान्त की अन्तर्दशायें शुभफल कारक होती हैं । **संध्या** और **अस्त** स्वर में उदितादि तीनों स्वरों की अन्तर्दशायें मध्यम फल कारक होती हैं ॥ ७१-७२ ॥

नक्षत्रस्वर कथन—

अकारे सप्त ऋृक्षाणि रेवत्यादि क्रमेण च ।
पञ्च पञ्च इकारादावेवमृक्षस्वरोदयः ॥ ७३ ॥

अन्वयः—रेवत्यादि क्रमेण अकारे सप्त ऋृक्षाणि च (भवन्ति) इकारादौ एवं पञ्च पञ्च ऋृक्षस्वरोदयः (भवेत्) ॥ ७३ ॥

संस्कृतः—रेवत्यादिक्रमेण रेवतीनक्षत्रमारभ्य सप्त ऋृक्षाणि अकारे अकारस्वराधःस्थानि देयानि । ततः पञ्च पञ्च नक्षत्राणीकारादौ स्थाप्यानि एवमृक्षस्वरोदयो भवेत् ॥ ७३ ॥

हिन्दी—संध्या और अस्त स्वर की अन्तर्दशा शत्रु से भय और क्लेश को देती है तथा उदितादि तीनों स्वर में संध्या और अस्त स्वर की अन्तर्दशा सामान्य होती है ।

अ स्वर के नीचे रेवती-अश्विनी-भरणी-कृत्तिका-रोहिणी-मृगशिरा-आर्द्रा इन सात नक्षत्रों को, **इ** स्वर के पुनर्वसु-पुष्य-आश्लेषा-मघा-पू.फा. को, **उ** स्वर के उ.फा.-हस्त-चित्रा-स्वाती-विशाखा इन पाँच नक्षत्रों को, **ऐ** स्वर के अनु-ज्ये-मू-पू-उषा इन पाँच नक्षत्रों को तथा **ओ** स्वर के नीचे श्रवण-धनिष्ठा-शतभिषा-पू.भा.-उ.भा. इन पाँच नक्षत्रों को को स्थापित करना चाहिए ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नक्षत्रस्वर चक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
रे.	पुन.	उ.फा.	अनु.	श्र.	नक्षत्र
अ.	पु.	ह.	ज्ये.	ध.	
भ.	आश्ले.	चि.	मू.	श.	
कृ.रो.	म.	स्वा.	पू.षा.	पू.भा.	
मृ.आ.	पू.फा.	वि.	उ.षा.	उ.भा.	

राशिस्वर कथन—

अ कारे मेष सिंहालि इ स्त्रीमिथुनकर्कटाः।
उ स्वरे चापमीनौ च ए कारेव तुला वृषौ ॥ ७४ ॥
ओ स्वरे मृग कुम्भौ च राशीशात् वार निश्चयः ।
स्वराधः स्थापयेत् खेटान् राशेर्योयस्य नायकः ॥ ७५ ॥

अन्वयः—अकारे मेष-सिंह-अलि इकारे स्त्री-मिथुन-कर्कटा:, उ स्वरे चाप-मीनौ च ऐकारे अत्र तुला-वृषौ ।

औ स्वरे मृग कुम्भौ च राशीशात् वार निश्चये स्वर: अध: स्थापयेत् यस्य राशे: यो नायक: खेटान् ॥ ७४-७५ ॥

संस्कृतः—अकारे मेष सिंहालि, इकारे स्त्रीमिथुनकर्कटाः, उस्वरे चाप-मीनौ, एकारे तुलावृषौ, ओकारे मृगकुम्भौ । अत्र राशीशात वारनिर्णयः कार्यः । तदेव स्पष्टयति यस्य राशेर्यो ग्रहः कथितविधिना नायकः स्वामी स्यात् एवं प्रकारेण तान् खेटान् स्वराधः स्थापयेत् ॥ ७४-७५ ॥

हिन्दी—मेष-सिंह-वृश्चिक राशि **'अ'** स्वर, कन्या-मिथुन-कर्क राशि **'इ'** स्वर, धनु-मीन **उ** स्वर, तुला-वृष **'ए'** स्वर एवं मकर-कुम्भ **'ओ'** स्वर है । राशीश से वार का निश्चय करना चाहिये । अर्थात् जिस राशि का जो स्वामी हो उस ग्रह को उस राशि के अधः स्थान में लिखें **'अ'** स्वर के अधः स्थान में सूर्यवार-मङ्गलवार, **'इ'** स्वर में चन्द्रवार-बुधवार, **'उ'** स्वर में गुरुवार **'ए'** स्वर में शुक्रवार और **'ओ'** स्वर में शनिवार का स्थापन करना चाहिए ॥ ७४-७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राशिस्वरग्रहस्वर

अ	इ	उ	ए	ओ	पञ्चस्वर
मे	कन्या	ध	तु	म	राशि
सिं	मि	मी	वृष	कु	
वृश्चि.	कर्क	०	०	०	
मं.र.	चं.बु.	बृ	शु	श	ग्रह एवं वार

सम्वत्सर स्वर कथन—

प्रभवाद्यब्दमैकैकमुदयत्यस्वरादिकः ।
सन्ध्यास्त वत्सरं चेत्स्यात्पापस्यापि च वत्सरम्॥ ७६ ॥

अन्वयः—प्रभवादि अब्दं एकैकं स्वरादितः उदयति सन्ध्या अस्त वत्सरं चेत् पापस्यापि च वत्सरं स्यात् ॥ ७६ ॥

संवत्सर चक्र

अ	इ	उ	ए	ओ	पञ्चस्वर
१ **प्रभव**	२ विभव	३ शुक्ल	४ प्रमोद	५ प्रजापति	सम्वत्सरनाम
६ अंगिरा	७ श्रीमुख	८ भाव	९ युवा	१० धाता	,,
११ ईश्वर	१२ बहुधान्य	१३ **प्रमाथी**	१४ विक्रम	१५ वृष	,,
१६ चित्रभानु	१७ सुभानु	१८ तारण	१९ पार्थिव	२० व्यय	,,
२१ सर्वजित	२२ सर्वधारी	२३ विरोधी	२४ विकृति	२५ **खर**	,,
२६ नन्दन	२७ विजय	२८ जय	२९ मन्मथ	३० दुर्मुख	,,
३१ हेलम्बी	३२ विलम्बी	३३ विकारी	३४ शार्वरी	३५ प्लव	,,
३६ शुभकृत्	३७ **शोभन**	३८ क्रोधी	३९ विश्वाव.	४० पराभव	,,
४१ प्लवङ्ग	४२ कीलक	४३ सौम्य	४४ साधार.	४५ विरोध.	,,
४६ परिधावी	४७ प्रमादी	४८ आनन्द	४९ **राक्षस**	५० अनल	,,
५१ पिङ्गल	५२ कालयुक्त	५३ सिद्धा	५४ रौद्र	५५ दुर्मति	,,
५६ दुन्दुभि	५७ रुधिरो	५८ रक्ताक्षी	५९ क्रोधन	६० क्षय	,,
प्रभवादि१२	प्रमथ्यादि१२	खरादि१२	शोभना.१२	राक्षसादि १२	द्वादशाब्द
संवत्सर	परिवत्सर	इदावत्सर	अनवत्सर	दुर्वत्सर	संज्ञान्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—प्रभवादिकमेकैकमब्दं चास्वरादित उदयति अर्थादकारस्वरे प्रभवादिकं द्वादशवत्सरम्, तथैवमिकारे प्रमथ्यादिकं द्वादशवत्सरम्, उकारे खरादिकं द्वादशवत्सरम्, एकारे शोभनादि द्वादशं, एवमोकारस्वरे राक्षसादिकं द्वादशवत्सरम् । अत्र चेद्यदि सन्ध्यास्तसंवत्सरं स्यात्तथापताक्यादौ पापग्रहस्य वत्सरं स्यात्तदा तस्मिन् वर्षेमृतिर्हानिरसन्तोषः स्यात् ॥ ७६ ॥

हिन्दी—प्रभवादि ६० सम्वत्सरों में क्रम से एक एक सम्वत्सर अकारादि स्वर होते हैं । इस तरह एक-एक स्वर में बारह संवत्सर हुए । संध्या और अस्त स्वर वाले सम्वत्सर केतुपताकी आदि चक्रों में यदि पापग्रह के वत्सर हो जायें तो उस वर्ष में मृत्यु-हानि-कष्ट आदि होता है ॥ ७६ ॥

बालादिस्वर फल—

किञ्चिल्लाभकरो बालः कुमारस्तत्वर्धलाभदः।
सर्वसिद्धि युवाधत्ते वृद्धे हानिर्मृतिेक्षयः ॥ ७७ ॥
यात्रा युद्धे विवादे च नष्टे दंष्टे रुजान्विते।
बालस्वरो भवेदिष्टो विवाहादि शुभाशुभः॥ ७८ ॥
सर्वेषु शुभ कार्येषु यात्रायां तु विशेषतः।
कुमारः कुरुते सिद्धिं सङ्ग्रामे विजयं तथा॥ ७९ ॥
शुभाशुभेषु कार्येषु मन्त्र यन्त्रादि साधने।
सर्वसिद्धि युवाधत्ते यात्रा युद्धे विशेषतः ॥ ८० ॥
दाने देवार्चने दीक्षा गूढमन्त्रप्रकाशने।
वृद्धस्वरो भवेद् भव्यो रणे भङ्गा भयङ्गमे॥ ८१ ॥
विवाहादि शुभं सर्वं सङ्ग्रामाद्यशुभं तथा।
न कर्त्तव्यं नृभिः किंचिज्जाते मृत्यु स्वरोदये॥ ८२ ॥
तिथि वारञ्च नक्षत्रं यद्दिने च भवेन्मृतम्।
तद्दिने वर्जयेत्सर्वं हानि मृत्युकरो यतः॥ ८३ ॥

अन्वयः—बालः किञ्चित् लाभकरो कुमारः तु अर्ध लाभदः युवा सर्वसिद्धिं धत्ते वृद्धे हानिः मृतेक्षयः (भवेत्)।

यात्रा-युद्धे-विवादे-नष्टे-दष्टे च रुजान्विते-विवाहादि शुभाशुभे बाल-स्वरो इष्टो भवेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेषु शुभकार्येषु विशेषतः तु यात्रायां कुमारः सिद्धिं कुरूते तथा संग्रामे विजयं (कुरुते) ।

शुभाशुभेषु मन्त्रयन्त्रादि साधने कार्येषु (तथा) यात्रा युद्धे विशेषतः युवा सर्व सिद्धिं धत्ते ।

दाने-देवार्चने-दीक्षा गूढमन्त्रप्रकाशने (च) वृद्ध स्वरो भव्यो भवेत् (परं) रणे भङ्गो गमे भयम् (करोति) ।

विवाहादि सर्वं शुभं तथा संग्रामादि अशुभं (कर्म) किञ्चित् मृत्युस्वरोद्ये जाते नृभिः न कर्त्तव्यम् ।

तिथि-वारं-नक्षत्रं च यद्दिने भवेन्मृतं तद्दिने यतः हानिः मृत्युकरो (अतः) अतः सर्वं वर्जयेत् ॥ ७७-८३ ॥

संस्कृतः—सुगमानि ॥ ७७-८३ ॥

हिन्दी—बालस्वर में किसी कार्य को करने के स्वल्प लाभ, कुमारस्वर में अर्द्धलाभ, युवास्वर में सम्पूर्ण सिद्धि, वृद्धस्वर में हानि तथा मृत्युस्वर में कार्य नाश को प्राप्त होता है ।

यात्रा-युद्ध-विवाद (कलह) किसी वस्तु के नष्टादि होने में, सर्पादि के काटने में, रोगादि अवस्था में बालस्वर शुभ होता है (अर्थात् बाल-स्वर में भूली हुई वस्तु मिलती है, सर्पादि काटने पर शीघ्र आराम होता है तथा रोगी व्यक्ति शीघ्र निरोग होता है) परन्तु विवाहादि शुभकार्य में अशुभ होता है ।

सभी शुभकार्यों में तथा यात्रा में विशेषतया कुमारस्वर शुभ होता है एवं युद्ध में विजयकारक होता है ।

सभी शुभाशुभ कार्यों में तथा मन्त्र-यन्त्रादिकों की सिद्धि में युवास्वर सम्पूर्ण सिद्धि करता है तथा यात्रा-युद्ध में विशेष शुभद होता हैं ।

दान में, देवार्चन में, दीक्षा ग्रहण में, गोप्य मन्त्रों के प्रकाशन में, (गुप्त-मन्त्र, सलाह मशविरा आदि में) वृद्धस्वर शुभ होता है किन्तु युद्ध में नाश तथा यात्रा में भय करता है ।

मृत्युस्वर के प्राप्त होने पर विवाहादि शुभकार्य तथा संग्रामादि अशुभकार्य अर्थात् कोई भी शुभाशुभ कार्य नहीं करना चाहिये ।

जब तिथि-दिन और नक्षत्र ये सभी मृत्युस्वर को प्राप्त हों तब किसी भी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वस्वरैक्य चक्र

अ	इ	उ	ए	ओ	स्वर
क	ख	ग	घ	च	
छ	ज	झ	ट	ठ	वर्ण
ड	ढ	त	थ	द	
ध	न	प	फ	ब	
भ	म	य	र	ल	
व	श	ष	स	ह	
प्रभवादि१२	प्रमथ्यादि१२	खरादि१२	शोभनादि१२	राक्षसादि१२	द्वादशाब्द
प्र अ इ चि स नं हे शु प्ल प पि दु	वि श्री ब सु स वि वि शो की प्र का रु	शु भा प्र ता वि ज वि क्रो सौ आ सि र	प्र यु वि पा वि म शा वि सा रा रौ क्रो	प्र धा वृ व्य ख दु प्ल प वि अ दु क्ष	संवत्सर
संवत्सर	परिवत्सर	इदावत्सर	अनवत्सर	दुर्वत्सर	
का९मार्ग३० पौ३०मा३=७२	मा२७फा३० चै१५=७२	चै१५वै३० ज्ये२७=७२	ज्ये३आ३० श्रा३०।भा९=७२	भा२१आ३० का२१=७२	मास
१।६।११ १६।२१।२६ नन्दा ८१	२।७।१२ १७।२२।२७ भद्रा ८७	३।८।१३ १८।२३।२८ जया ९३	४।९।१४ १९।२४।२९ रिक्ता ९९	५।१०।१५ २०।२५।३० पूर्णा १०५	नन्दादि तिथी योग
सू. मं.	बु. चं.	बृ.	शु.	श.	ग्रह
१।५।८	३।४।६	९।१२	२।७	१०।११	राशी
रे. अ. भ. कृ. रो. मृ. आ. = ७	पु. पुष्य. श्ले. म. पू.फा. = ५	उ.फा. ह. चि. स्वा. वि. = ५	अ. ज्ये. मू. पू.षा. उ.षा. = ५	श्र. ध. श. पू.भा. उ.भा. = ५	नक्षत्र
दि १४ घ २४	दि १४ घ २४	दि १४ घ २४	दि १४ घ २४	दि १४ घ २४	दिन घटी
मं ६० बु२४ = ८४ उदित	बु ३६ वृ४८ = ८४ भ्रमित	बृ१२शु६० श१२=८४ भ्रान्त	श४८ र३६ = ८४ सन्ध्या	र२४ च६० = ८४ अस्त	घट्यादि वारभाग संज्ञा
जन्म बाल	कर्म कुमार	आधान युवा	पिण्ड वृद्ध	छिद्र मृत	संज्ञान्तर संज्ञान्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभाशुभ कार्य को नहीं करना चाहिये क्योंकि मृत्युस्वर में किसी भी कार्य को करने से हानि तथा मृत्यु होती है ॥ ७७-८३ ॥

वर्षगणितप्रकार कथन—

वयोराशिस्वराङ्काश्च एकीकृत्य त्रिधान्यसेत् ।
द्विचतुस्त्रिहतं कार्यं सप्ताष्टरसभाजितम् ॥ ८४ ॥

अन्वयः—वयो राशि स्वर अङ्काश्च एकीकृत्य त्रिधा न्यसेत् द्वि-चतुः-त्रि हतं कार्यं (तथा) सप्त-अष्ट-रस भाजितं कार्यम् ॥ ८४ ॥

संस्कृतः—वयोराशिस्वराङ्का ये सन्ति तानेकीकृत्य तद्योगं कृत्वा त्रिधा प्रकारत्रयेण न्यसेत्स्थापयेत् । तद्विचतुस्त्रिहतं तथाक्रमात्सप्ताष्टरसभाजितं कार्यं-तदा जन्मकोष्ठो भवति । अत्रेदमवधेयम् । यस्यरिष्टनिर्णयः कर्त्तव्योस्ति तस्य जन्मतो वर्त्तमानवर्षपर्यन्तं याःसङ्ख्यास्ता एव वयसश्चाङ्काः एवं तस्य जन्म-राशिर्योस्ति तज्जन्मराशिपर्यन्तं वृषादिगणनया याः सङ्ख्यास्ता एवात्र राश्यङ्काः । यथा वृषराशिजन्मवत एकस्तथा मेषराशिजन्मवतो द्वादश एवं जन्मनक्षत्रजनितो नामादिमवर्णो योस्ति तस्य यो वर्णस्वरचक्रे स्वरस्तत्स्वर-निष्ठा ये तिथ्यङ्काः 'चन्द्राष्टौ प्रथमे' इत्यादयस्ता एवात्र स्वराङ्काः । तदुक्तमन्यैः 'मेषाद्भादन्यतः स्वर्क्षं तिथ्यङ्कयोगः' अनेन वृषाद्राशिगणना तथा स्वराङ्के तिथ्यङ्का एवेति लाभोजातः । तेषां वयोराशि स्वराङ्कानां योगः कार्यस्तदङ्कवृन्दं त्रिषुस्थानेषु स्थापयेत् । तत्र प्रथमस्थाने तदंकवृन्दं द्वाभ्यां गुणितं सप्तभिर्भक्तं यदवशेषमानं तज्जन्मकोष्ठे चोर्ध्वस्थाने स्थापयेत् । एवं द्वितीयस्थाने स्थितं तदङ्कवृन्दं चतुर्भिर्गुणितं तथाष्टाभिर्भक्तं यच्छेषमानं तज्जन्मकोष्ठे तदधो मध्य-स्थाने स्थापयेत् । एवं तृतीयस्थाने स्थितं तदंकवृन्दं त्रिगुणितं रसभक्तं यदवशेषमानं तज्जन्मकोष्ठे सर्वाधः स्थापयेत् । एवं जन्मकोष्ठस्य सम्पादनं जातम् ॥ ८४ ॥

हिन्दी—जिसके अरिष्ट काल का निर्णय करना हो उसके वर्तमान अवस्था वर्ष की संख्या (जन्म से वर्तमान वर्ष पर्यन्त की संख्या) तथा वृषादि से जन्म-राशि पर्यन्त वृषादि गणना (मेषाद्भान्यतः स्वर्क्ष तिथ्यङ्क योगः इस वाक्य के आधार पर वृषराशि जन्मवाले की १, मिथुन राशिवाले की २ इस तरह से मेषराशि वाले की संख्या १२ मानी जाती है तथा यहीं क्रम परम्परा सम्प्रदाय से भी सिद्ध है ।) से जो संख्या हो वह और जन्मनक्षत्र जनित नामादि जो वर्ण हो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उसका जो वर्णस्वर चक्र में स्वर हो उस स्वर का तिथ्यङ्क "चन्द्राष्टौ प्रथमे देया नग नागा द्वितीये के इत्यादि के क्रम से" एवं इन तीनों (वय-राशि-स्वराङ्क) को जोड़कर तीन स्थान में स्थापित कर २-४ और ३ से गुणा कर क्रमशः से ७-८ और ६ से भाग देकर शेषाङ्कों को जन्म कोष्ठक में अधोऽधः क्रम से तीन स्थानों में स्थापित करें अर्थात् प्रथम शेष को उपर-द्वितीय को मध्य में तथा तृतीय को नीचे के स्थान में स्थापित करने से जन्म कोष्ठक का निर्माण होता है ॥ ८४ ॥

कर्मादिकोष्ठकसाधन—

आधाने नव देयानि स्वरे कर्मणि पञ्च च।
सर्वाङ्कव्यापिता पिण्डे छिद्रे श्रेणी व्यवस्थिता॥ ८५ ॥

अन्वयः—आधाने स्वरे नवदेयानि कर्मणि च पञ्च (देयानि) पिण्डे सर्वाङ्क व्यापिता छिद्रे श्रेणी व्यवस्थिता ॥ ८५ ॥

संस्कृतः—आधाने स्वरे आधानस्वरकोष्ठसाधने नव देयानि किन्तु पूर्वानीताङ्कवृन्दे नव मानानि योज्यानि । एवं कर्मणि कर्म कोष्ठकानयने पूर्वोक्ताङ्क वृन्दे पञ्चमानानि क्षेप्याणि एवं पिण्डे पिण्डाख्यकोष्ठसाधने पूर्वोक्ताङ्क-व्यापिताकार्याऽर्थात्सर्वाङ्कानां जन्मकर्माधानानां ध्रुवाङ्काः शून्यपञ्चनवसमा योज्याः । एवं छिद्रे छिद्र कोष्ठकानयने विहिताङ्कवृन्दसंख्या श्रेणीव्यवस्थिता पंक्तिभिः समन्विताऽर्थाज्जन्मकर्माधानपिण्डानां पंक्तिगतैर्ध्रुवकैः शून्यपञ्च नव चतुर्दशरुपैः सहिता विधेया । तदेवं क्रमादाधानादिकोष्ठकानां स्वस्वाङ्कवृन्दं स्यात् । तत्र पूर्ववत्स्वस्वगुणकेन स्वस्वाङ्कवृन्दं संगुण्य स्वस्व हरेण विभज्य तत्तदवशेषमानं स्वस्वकोष्ठस्योर्ध्वमध्याधःक्रमेण स्थापयेत् । अत्रायं भावः । कर्मकोष्ठकसाधनेपूर्वोक्ताङ्कवृन्दे पञ्च मेलयित्वा तत्त्रिषु स्थानेषु स्थापेयत् । तत्र प्रथमस्थानगं तदङ्कयोगमानं द्विगुणितं सप्तभाजितं यदवशेषमानं तत्कर्मकोष्ठे चोर्ध्वस्थाने स्थापयेत् । एवं द्वितीयस्थानस्थं तदङ्कयोगमानं चतुर्गुणितं तथाष्ट-भक्तं यदवशेषमानं तत्कर्मकोष्ठे मध्यस्थाने स्थापयेत् । एवं तृतीयस्थानगतं तदङ्कयोगमानं त्रिगुणितं षड्भक्तं यच्छेषमानं तत्कर्मकोष्ठे चाधः स्थाने स्थाप-येत् । तदैवं कर्मकोष्ठसाधनं जातम् । अत्राधान कोष्ठसाधनमुच्यते । जन्म-कोष्ठानयनार्थं यदङ्कवृदं प्रथमाख्यं तत्र नव दत्वा तदातत्तृतीयाङ्कवृन्दं स्यात् । तत्तृतीयाख्यमङ्कवृन्दं पूर्ववत्त्रिधा स्थापयित्वा तथा पूर्ववत्स्वस्वगुणकेन संगुण्य स्वस्वहारेण विभज्य यदवशेषत्रयं तदाधानकोष्ठे पूर्ववत्त्रिधा स्थापयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमाधानकोष्ठसाधनं जातम् । अत्र पिण्डकोष्ठसाधनमुच्यते। तत्र प्रथमाङ्कवृन्दे चतुर्दशरूपं क्षेपकं दत्वा तदा तच्चतुर्थाङ्कवृन्दं स्यात् । ततः पूर्ववत्तच्चतुर्थाङ्कवृन्दं त्रिधा संस्थाप्य स्वस्वगुणकेन संगुण्य स्वस्वहरेण च विभज्य यदवशेषत्रयं तत् क्रमात्त्रिधा स्थापयेत् । तदेवं पिण्डाख्यकोष्ठसाधनं जातम् । अत्र छिद्रकोष्ठ-साधनमुच्यते । तत्राद्याख्याङ्कवृन्देस्वक्षेपमष्टविंशतिसमं दत्वा तदा पञ्चमाङ्कवृन्दं स्यात् । तदिदं पूर्ववत्त्रिधा विन्यस्य स्ववस्वगुणकेन संगुण्य स्वस्वहरेण विभज्य यदवशेषत्रयं तत्पूर्ववत्त्रिधा स्थापयेत् । तदेवं छिद्राख्यकोष्ठसाधनं जातम् । परञ्चैवं जातानां पञ्च कोष्ठानां नैसर्गिङ्कचक्रसंज्ञा कृतेति ।

तथाचाह विश्वेश्वरः—

'तिथिराशिवयोंकाश्च प्रथमे जन्मकोष्ठके ।
द्विचतुस्त्रिगुणितं सप्ताष्टरसभाजितम् ॥
कर्मकोष्ठे पञ्च दत्वा आधाने नवकं तथा ।
पूर्ववद्गुणनङ्कार्यं भजनञ्चापि पूर्ववत् ॥
पिण्डे चतुर्दशं दत्वा छिद्रेऽष्टाविंशतिं सुधीः ।
द्विचतुस्त्रिभिर्गुणितं सप्ताष्टरसभाजितम् ॥'

अत्र यद्यपि ग्रन्थकारेण चलचक्रस्य तथायोगचक्रस्य च प्रक्रिया न दर्शिता । तथाप्यत्र तच्चक्रद्वयस्य साधनं ज्योतिर्विदां सम्प्रदायसिद्धत्वात्तथा विश्वेश्वराद्युक्तप्रमाणस्वरसाच्चमयोच्यते । तद्यथा । वर्णस्वरचक्रे यो वर्ण-स्वरः स च जन्मादिकानां पञ्चस्वराणां मध्ये यस्मिन्कोष्ठे भवेत्स च कोष्ठको नैसर्गिकचक्रे यो भवेत्तमेवात्र जन्मकोष्ठकं ततो द्वितीयकोष्ठकं कर्मकोष्ठकं ततस्तृतीयादिकोष्ठकत्रयञ्चाधानादिकोष्ठकत्रयमिति प्रकल्प्यैवं चलचक्रं साध-येत् । अथास्मिन् चलचक्रे तथा नैसर्गिकचक्रे जन्मादिकोष्ठकानां मध्ये द्वयो-र्द्वयोः कोष्ठकयोः स्वयोः स्वयोरर्थात्साजात्ययोर्योगतुल्यमङ्कवृन्दंप्रकल्प्य ततः स्वस्वध्रुवकान् दत्वा पूर्ववत्स्वस्वगुणकेन संगुण्य स्वस्वहरेण विभज्य यदवशेषत्रयंतत् त्रिधा स्थापयेत् ।

एवं स्वस्वकोष्ठके अस्य स्थापनाद्योगचक्रं भवेत् ।

यथा नैसर्गिकचक्रजजन्मकोष्ठकस्य तथाचलचक्रजजन्मकोष्ठकस्य चाङ्क योगसमे शून्यध्रुवकं दत्वा यथास्थितं तं योगं त्रिधा संस्थाप्योक्तविधिना द्विचतुस्त्रिगुणितं सप्ताष्टरसभाजितं सत्त्रिधा शेषमानंयोगचक्रे जन्मकोष्ठके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थापयेत् । एवमन्यकोष्ठकेपि यथाह विश्वेश्वरः—

एवं नैसर्गिकं ज्ञेयञ्चलचक्रस्वरान् लिखेत् ।
यत्र कोष्ठो स्ववर्णो वै तमेव जन्मसंज्ञकम् ॥
कर्माधानादिकान्सर्वान् विदित्वा विलिखेत्क्रमात् ।
नैसर्गिकञ्चलचक्रं च लिखित्वा सन्नियोजयेत् ॥
जन्मना जन्म संयोज्य कर्मणा कर्मसंज्ञकम् ।
आधानादित्रिकेप्येवं योज्याऽत्रध्रुवकान्क्षिपेत् ॥
तैरेव गुणकैर्गुण्यं भजनं च तथाविधम् ।

अत्रोदाहरणम्—शकः १७८३ माघशुक्लपञ्चदशी दण्डादि ४०।११ आश्लेषानक्षत्रं २१।३१ तदुपरि मघानक्षत्रे द्वितीय दिने मघानक्षत्रं २१।४९ शोभनयोगे दण्डानिः ३३।३८ कुम्भार्कगतांशाः ४।९।३०। सूर्योदयादिष्टं ३२।९ एवं विधे पञ्चाङ्गे शुक्रवासरे मम (कृष्णदत्तः) जन्म आसीत् । भयातं १०।३८ भभोगः ६०।१८ ।

अत्र मघानक्षत्रस्याद्यचरणे जन्म तेननामादि म वर्णो मकारः । अस्योपरिगत इकारस्वरो वर्णस्वरचक्रे जातः । अस्य स्वरस्याधःस्थास्तिथ्यङ्कानगनागमिताः (८७) अथ जन्मतो वर्तमानवर्षं यावद्वयोऽङ्काश्चन्द्राब्धिमिताः (४१) । तथा वृषराशेः स्वजन्माराशिं सिंहाख्यं यावद्राश्यङ्का वेदमिता (४) । एतेषां योगमानं प्रथमाङ्कवृन्दं (१३२) त्रिषु स्थानेषु विन्यस्य १३२।१३२।१३२ तत्राद्यस्थाने तद्वृन्दं द्विगुणितं जातं वेदाङ्गाश्विमितं (२६४) इदं सप्ततष्टं जातं शेषं (५) इदं जन्माख्यकोष्ठस्याधः स्थापयेत् । एवं द्वितीयस्थाने तद्वृन्दं चतुर्गुणितं जातं १३२ × ४ = (५२८) पुनरिदमष्टभक्तं शेषाङ्कमानं शून्यं (०) जन्माख्यकोष्ठे मध्य स्थाने स्थापयेत् । एवं तृतीयस्थानस्थितं तद्वृन्दं त्रिगुणितं जातं ३ × १३२ = (३९६) इदं षड्भक्तं शेषाङ्कमानं शून्यं (०) जन्माख्यकोष्ठेऽन्त्येर्थात्सर्वाधःस्थापयेत् । एवं जन्माख्यकोष्ठसम्पादनं जातम् ।

अथ कर्माख्यकोष्ठसाधनमुच्यते । तत्र 'आधाने नव देयानि स्वरे कर्मणि पञ्च च' इति पूर्वविहतप्रथमाङ्कवृन्दे पञ्च दत्वा तद्द्वितीयाङ्कवृन्दं स्यादितितन्मानं (१३२+५)=(१३७) इदं पूर्ववत्त्रिधा विन्यस्य स्वस्वगुणकेन संगुण्य जातं तत्फलं १३७ × २।१३७ × ४।१३७ × ३ ।.वा २७४ । ५४८।४११ इदं स्वस्वहरेण (७।८।६) विभज्य त्रिधा तच्छेषाङ्कमानमिदं १।४।३। कर्माख्यकोष्ठे चोर्ध्वमध्याधः क्रमेण स्थापयेत् । एवं कर्माख्यकोष्ठसाधनं जातम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाधानकोष्ठसाधनार्थं प्रथमाङ्कवृन्दे नव दत्वा यत्तृतीयाङ्कवृन्दं जातं (१३२+९) = (१४१) इदं पूर्ववत्त्रिधा स्थापयित्वा स्वस्वगुणेन संगुण्य जातं त्रिधा फलं १४१ × २।१४१ × ४।१४१ × ३ । वा २८२ । ५६४ । ४२३ इदं स्वहरेण (७।८।६) विभज्य त्रिधा तच्छेषाङ्कमानं २।४।३ चाधानकोष्ठे पूर्ववदूर्ध्वमध्याधः क्रमात्स्थापयेत् । इत्याधानकोष्ठकानयनं जातम् ।

अथ पिण्डकोष्ठकानयनं कथ्यते । तत्र जन्मादिकोष्ठत्रयस्य शून्यपञ्चनवरूपाणां स्वस्वध्रुवकानां योगेन चतुर्दशमितेन(१४) समं पिण्डकोष्ठजं ध्रुवाङ्कमाने प्रथमाङ्कवृन्दे संयोज्य तच्चतुर्थाङ्कवृन्दं जातं (१३२+१४) = (१४६) इदं पूर्ववत्त्रिधा फलं १४६ × २।१४६ × ४।१४६ × ३ वा २९२।५८४।४३८ इदं स्वस्वहरेण (७।८।६) विभज्य त्रिधा तच्छेषाङ्कमानं ५।०।०। पिण्डाख्यकोष्ठके चोर्ध्वमध्याधः क्रमात्स्थापयेत् । इत्येवं पिण्डकोष्ठकानयनं जातम् ।

अत्र छिद्रकोष्ठकानयनमुच्यते । तत्र कोष्ठकचतुष्कोद्भवानां स्वस्वध्रुवकानामेतेषा ०।५।९।१४ योगेनाष्टाविंशतिमितेन तुल्यं छिद्र कोष्ठकजं ध्रुवाङ्कमानं प्रथमाङ्कवृन्दे दत्वा जातं पञ्चमाङ्कवृन्दं (१३२+ २८) = (१६०) इदं त्रिधा विन्यस्य स्वस्वगुणकेन संगुण्य जातं त्रिधा फलं १६० × २।१६० × ४।१६० × ३ वा ३२०। ६४०।४८० इदं स्वस्वहरेण विभज्य त्रिधा तच्छेषाङ्कमानं ५।०।० इदं छिद्राख्यकोष्ठे पूर्ववत् त्रिधास्थापयेत् । इति छिद्राख्यकोष्ठकं जातम् एवं साधितानां कोष्ठकानां स्थापनवशाज्जातं नैसर्गिकचक्रमिति रूपम् ।

नैसर्गिक चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
५	१	२	५	५
०	४	४	०	०
०	३	३	०	०

अथ चलचक्रोदाहरणमुच्यते । तत्र वर्णस्वरचक्रे (इ) स्वराधःस्थं कर्म कोष्ठाख्यं तेनात्र नैसर्गिकचक्रजं कर्मकोष्ठाख्यं यत्तदेवजन्मकोष्ठाभिधं चलचक्रे लेख्यम् । ततश्चाधानाभिधं कर्मसंज्ञकम् । एवं तृतीयं पिण्डकोष्ठाख्यमाधानसंज्ञकम् । ततश्चतुर्थं छिद्रकोष्ठाख्यं पिण्डसंज्ञकम् । ततः पञ्चमं जन्मकोष्ठाख्यं छिद्राभिधम् । एवं कृते जातं चलचक्रस्वरूपमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चल चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
१	२	५	५	५
४	४	०	०	०
३	३	०	०	०

अथ योगचक्रोदाहरणमुच्यते। तत्र साधितचक्रद्वये जन्मकोष्ठकद्वयस्यास्य योगमाने ६।४।३ शून्यध्रुवं दत्वा यथास्थितं तत्तैरेव गुणकैर्द्विचतुस्त्रिभिर्गुणितं जातं १२।१६।९ इदं क्रमात्सप्ताष्टरसैर्हरैर्भक्तं जातं शेषत्रयं ५।०।३ जन्मकोष्ठे चोर्ध्वमध्याधः क्रमात्स्थापयेत्।

एवं नैसर्गिकचक्रे कर्मकोष्ठाङ्काः १।४।३ तथा चलचक्रे कर्मकोष्ठाङ्काः २।४।३ एषां योगेस्मिन् ३।८।६ पञ्चप्रमितं स्वध्रुवाङ्कमानं दत्वा जातं ८।१३।११ इदं स्वस्वगुणकेन संगुण्य जातम् १६।५२।३३ स्वस्वहरेण ७।८।६ तष्टं शेषं जातं २।४।३ एते योगचक्रस्य कोष्ठाङ्काः।

अथ नैसर्गिकचक्रजातमाधानकोष्ठाङ्कमानं २।४।३ तथा चलचक्रजमाधानकोष्ठाङ्कमानं ५।०।० अस्याङ्कमानद्वयस्य योगेऽस्मिन् ७।४।३ नव प्रमितं स्वध्रुवाङ्कमानं दत्वा जातं १६।१३।१२ इदं स्वस्वगुणकेन संगुण्य जातं ३२।५२।३६ स्वस्वहरेण (७।८।६) विभज्य शेषत्रयं ४।४।० चाधानकोष्ठे पूर्ववदूर्ध्वमध्याधः क्रमात्स्थापयेत्।

एवं नैसर्गिकचक्रजातं पिडकोष्ठांकमानं ५।०।० तथा चलचक्रजं तदङ्कमानं ५।०।० अनयोर्योगेऽस्मिन् १०।०।० चतुर्दशसमं स्वक्षेपकं क्षेप्यं जातं २४।१४।१४ इदं स्वस्वगुणकेनगुणितं जातं ४८।५६।४२ इदं स्वस्वहरेण (७।८।६) विभज्य शेषत्रयं ६।०।० इदं पिण्डकोष्ठे पूर्ववत्स्थापयेत्।

अथ नैसर्गिक-चक्रजं छिद्रकोष्ठाङ्क मानं ५।०।० तथा चलचक्रजं तदङ्कमानं ५।०।० अनयोर्योगेऽस्मिन् १०।०।० स्वक्षेपकमष्टाविंशतिमितं दत्वा जातं ३८।२८।२८ इदं स्वस्वगुणकेन संगुण्य जातं ७६।११२।८४ इदं स्वस्वहरेण (७।८।६) विभज्य शेषत्रयं ६।०।० छिद्रकोष्ठे पूर्ववत्स्थापयेत्। एवं कृते जातं योगचक्र-स्वरूपमिदम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योग चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
५	२	४	६	६
०	४	४	०	०
३	३	०	०	०

अथ नैसर्गिकचक्रसाधने मतान्तरं प्रतिपाद्यते । वयोराश्यङ्कस्तथा स्वजन्मराशिस्वराङ्कांश्चैकीकृत्य तत्त्रिधा विन्यस्य क्रमेण द्विचतुस्त्रिभिः सङ्गुण्य सप्ताष्टरसैर्विभज्य शेषत्रयं जन्म कोष्ठे चोर्ध्वाधः क्रमेण स्थापयेत् । ततो जन्मस्वराद्द्वितीये कर्माख्यकोष्ठे ये स्वतिथ्यङ्कास्तथापूर्वोक्तवयोराश्यङ्कांश्चैकीकृत्यत्रिधा संस्थाप्य स्वस्वगुणकेन संगुण्य जाते त्रिधा गुणनफले प्रत्येकं पञ्चदत्वा ततस्तत्स्वस्वहरेण विभज्य शेषत्रयं पूर्ववत्कर्मकोष्ठे स्थापयेत् । एवं पूर्वोक्तवयोराश्यङ्कास्तथा स्ववर्णस्वरात्तृतीयकोष्ठे चाधानाख्ये ये तिथ्यङ्कास्तानेकीकृत्य त्रिधा विन्यस्यस्वस्वगुणकेन संगुण्य त्रिषु स्थानेषु स्थितेषु गुणनफलेषु प्रत्येकं नव दत्वा ततस्तत्स्वस्वहरेण विभज्य शेषत्रयमाधानकोष्ठे पूर्ववन्न्यसेत् । एवं पूर्वोक्त वयो राश्यंकास्तथा वर्णस्वराच्चतुर्थे पिण्डाख्य कोष्ठे स्वतिथ्यङ्कांश्चैकीकृत्य त्रिधा विन्यस्यस्वस्वगुणकेन संगुण्य स्थानत्रये गुणनफले प्रत्येकं चतुर्दशसमं स्वक्षेपकं दत्वा ततस्तत्स्वस्वहरेण विभज्य शेषत्रयं पिण्डकोष्ठके पूर्ववत्स्थापयेत् । एवं ततः पञ्चम छिद्रसंज्ञके तिथ्यङ्कास्तथा पूर्वोक्ता वयोराश्यङ्कांश्चैकीकृत्य त्रिधा न्यस्तं कृत्वा स्वस्व गुणकेन सङ्गुण्य त्रिषुस्थानेषु गुणनफलेषु प्रत्येकं स्वध्रुवामानमष्टाविंशतिसमं दत्वा स्वस्वहरेण विभज्य शेषत्रयं त्रिधा पूर्ववच्छिद्रकोष्ठके स्थापयेत् ।

पुनर्मतान्तरं प्रदर्श्यते । तद्यथा । तत्र जन्मकोष्ठादित्रयस्य साधनमधुना प्रदर्शितविधिवद्बोध्यम् । अथ पिण्डकोष्ठे तिथ्यङ्कास्तथावयोराश्यङ्कांश्चैकीकृत्य त्रिधा विन्यस्य स्वस्वगुणकेन संगुण्य स्वस्वहरेण विभज्य शेषत्रये क्रमाच्छून्यं तथा पञ्चमितं नवमितं च दत्वा पुनः स्वस्वहरेण विभज्य शेषत्रयं पूर्ववत्पिण्डे कोष्ठे स्थापयेत् । अथवा प्रथमशेषे साधितानां जन्मकोष्ठाधःस्थानां शेषानां योगसमं तथा द्वितीयशेषे कर्मकोष्ठाधःस्थस्य शेषत्रयस्य योगसमं तथा तृतीयशेषे चाधान कोष्ठाधःस्थस्य शेषत्रयस्य पिण्डकोष्ठे पूर्ववत्स्थापयेत् । अथ छिद्रकोष्ठसाधने तु पूर्वोक्तंवयोराश्यङ्कस्तथा तत्तिथ्यङ्कांश्चैकीकृत्य त्रिधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विन्यस्य स्वस्वगुणकेन गुणयित्वा स्वस्वहरेण विभज्य त्रयाणां शेषाणां मध्ये क्रमात्पञ्चमितं तथा नवमितं चतुर्दशमितं च दत्वा पुनः स्वस्वहरेण विभज्य शेषत्रयं पूर्ववत्त्रिधा पिण्डकोष्ठके स्थापयेत् । अथवा प्रथमशेषे जन्मादि-कोष्ठचतुष्टस्योर्ध्वाङ्कयोगमितं तथा द्वितीयशेषे तन्मध्याङ्कयोगमितं तथान्त्यशेषे तदन्तिमाङ्कयोगमितं दत्वा पुनः स्वस्वहरेण विभज्य शेषत्रयं छिद्रकोष्ठे पूर्वरीत्यास्थापयेत् । एवमप्ययदीक्षितप्रभृतिभिस्तट्टीकाकारैर्यन्नैसर्गिकचक्र-साधनप्रक्रिया प्रदर्शिता तस्यामूलकारसूत्रार्थबर्हिर्भूतत्वात्तथा विश्वेश्वरादि-प्रणीतवचनप्रमाणानुकूलार्थबाह्यगत्वात्साप्रक्रिया नादरणीयेति किन्तु प्रथमं यदुदाहरणं मया प्रदर्शितं तदेव बहुसम्मतं ममापि मतं स्यादिति सुधीभि-र्विभाव्यम् ।

अथ जन्मादिकोष्ठकानां प्रयोजनमुच्यते । जन्मकोष्ठे त्वात्मनः शुभा-शुभज्ञानम् । कर्मकोष्ठे कर्मणः सिद्ध्यसिद्धिज्ञानम् । आधानाभिधे कोष्ठे पुत्रादेः शुभाशुभं चित्तभ्रान्तिः। पिण्डकोष्ठे पिण्डसम्बन्धिबन्धुषु विरोधादिज्ञानम् । छिद्र-कोष्ठे द्रव्याश्रयवाहनादौ शुभाशुभमिति । अथ तत्प्रकारः प्रदर्श्यते । पूर्वरीत्या त्रयाणां वर्षेशानां मध्ये प्रथमाब्दपस्य शनेः स्थूलं फलं प्रथम-मासचतुष्टयं यावत्कथनीयमिति । तत्रापि यदि जन्मकाले स्वोच्चादिस्थानजातेन बलेन सहितः शनिर्पुनः सद्भावगतस्तर्हि तत्फलं श्रेष्ठं यवनावनीशाल्ला-भस्तथा वृद्धांगनासुखं च । एवं जन्मकाले यदि नीचादिस्थानोपलक्षितो निर्बलस्तथाऽनिष्टभावगतः शनिस्तदातत्फलमधमं म्लेच्छाद्धानिस्तथा वृद्धाङ्ग-नादेर्भयः स्वदेहे वायुप्रकोपः । एवं सर्वेषामब्देशानां फलं बोध्यमिति । तथा पुनरुदितादिस्वराणां द्विसप्ततिदिनात्मकस्य स्वस्ववर्षविभागस्य पूर्वकथित-स्यापिभागत्रयं चतुर्विंशतिदिनात्मकं विधेयम् । तत्रापि फलं विचारणीयम् । तद्यथा । नैसर्गिकचक्रे जन्मकोष्ठस्थोर्ध्वस्थाने प्रथमपक्षाख्ये पञ्चसंख्यो-पलक्षितो गुरुस्तथा चलचक्रे तत्कोष्ठस्योर्ध्वस्थाने रूपसंख्योपलक्षितो रविः । तेनात्र गुरोरन्तरं रविफलं स्यात्पूर्वोक्तदशान्तर्दशानुकूलरूपम् । तथा शनेः शुभाशुभफलं निश्चितमिति प्रथमविभागे चतुर्विंशतिदिनात्मके लेखनीयमिति । अथाग्रे द्वितीयविभागे चतुर्विंशतिदिनात्मके तु नैसर्गिकचक्रे जन्मकोष्ठस्य मध्यस्थाने शून्योपलक्षितो राहुस्तथा चलचक्रे वेदसंख्योपलक्षितो बुधस्तेनात्र तयोः फलं कथितविधिना लेख्यम् । तदग्रे तृतीयविभागे चतुर्विंशतिदिनात्मके तु नैसर्गिक चक्रे जन्म-कोष्ठाधःस्थाने राहुस्तथा चलचक्रे कुजस्तेनात्र तयोर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्युक्तफलमुक्तप्रकारेण लेख्यम् । एवं द्वितीयमासादिषु द्विसप्ततिदिनमितेषु फलं लेखनीयमिति ॥ ८५॥

हिन्दी—पूर्व श्लोक के अनुसार **जन्म कोष्ठक** का साधन कर इससे **कर्म-आधान-पिण्ड** और **छिद्र** स्वर के कोष्ठकों का निर्माण इस प्रकार होता है। जैसे कि **आधान कोष्ठक** के साधन में पूर्वोक्त अङ्कयोग (श्लो. ८४) में ९ योग करना चाहिये तथा **कर्म कोष्ठक** के साधन में पूर्वोक्त अङ्कयोग में ५ तथा **पिण्डकोष्ठक** साधन में सर्वाङ्क व्यापित अर्थात् जन्म-कर्म और आधान का ध्रुवाङ्क योग १४ (जन्म का ०, कर्म का ५, आधान का ९ = १४) जोड़ना चाहिये । छिद्र कोष्ठक के साधन में श्रेणी व्यवस्थित अङ्क अर्थात् जन्म-कर्म-आधान और पिण्ड का ध्रुवाङ्क योग ०+५+९+१४ = २८ योग करना चाहिये। अर्थात् पूर्वोक्त अङ्कयोग में कर्म-आधान-पिण्ड और छिद्र कोष्ठक के साधन के लिये क्रमश' ५/९/१४/२८ का योग करें । पूर्वोक्त अङ्क योग में ५ जोड़कर तीन स्थान में स्थापित कर क्रम से २,४ और ३ से गुणित कर क्रमश: ७,८ और ६ से भाग देकर शेषाङ्कों को क्रमश: अधोऽध: करके **कर्म कोष्ठक** में लिखें । **आधान कोष्ठक** साधन में पूर्वोक्त अङ्कयोग में ९ जोड़कर तीन स्थानों में स्थापित कर क्रमश: २/४/३ से गुणित कर ७/८/६ से भाग देकर शेषाङ्कों को क्रमश: अधोऽध: आधान कोष्ठक में लिखे । ऐसे ही २८ युक्त पूर्वोक्त अङ्क योग से **छिद्र कोष्ठक** की पूर्ति करें । इस प्रकार सभी कोष्ठकों का साधन हो जाता है ।

इस प्रकार साधन किये गये को नैसर्गिक चक्र गया है । यद्यपि यहाँ चल-चक्र और योग-चक्र की प्रक्रिया को नहीं लिखा गया है । अत: **चलचक्र** का साधन इस प्रकार होता है । वर्णस्वरचक्र में जो स्वर वर्णस्वर हो वह जन्मादि पञ्चस्वर के जिस कोष्ठक में हो वह कोष्ठक नैसर्गिक चक्र में जिस कोष्ठक में हो उसी को जन्मस्वर मान कर उससे द्वितीय को कर्म कोष्ठक तृतीय को आधान कोष्ठक चतुर्थ को पिण्ड और पञ्चम को छिद्र कोष्ठक कल्पना कर चलचक्र समझना चाहिए । **योगचक्र** साधन पूर्वोक्त रीति से नैसर्गिकचक्र तथा चलचक्र लिखकर नैसर्गिकचक्र स्थित जन्मादि कोष्ठक के साधित अङ्कों को चक्रस्थित जन्मादि कोष्ठक के अङ्कों में यथाक्रम से योग करें अर्थात् प्रथम शेषाङ्क को प्रथम में द्वितीय को द्वितीय में तृतीय को तृतीय में योग करके स्व स्व ध्रुवाङ्क जोड़कर उन्हीं गुणाङ्कों से गुणा कर वैसे ही यथाक्रम से ७।८।६ से भाग देकर जो शेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हो उनको नैसर्गिक चक्र की ही रीति से अधोऽधः स्थापित करने से योग चक्र होता है। विशेष ज्ञान हेतु संस्कृत टीका का अवलोकन करें॥ ८५॥

तिथ्यादिसाधन—

गणयित्वा निर्णयं वर्षे वर्षप्रभाग कल्पना।
पञ्चभिश्च हृते शेषे नन्दाद्या मृत्यु कारणम्॥ ८६॥

अन्वयः—निर्णयं वर्षे गणयित्वा वर्ष प्रभाग कल्पना (कार्या) पञ्चभिः च हृते शेषे या नन्दादि (सा) मृत्युकारणम्॥ ८६॥

संस्कृतः—पञ्चस्वरचक्रं विधाय तत्र वक्ष्यमाणयोगैर्मृत्युं निश्चित्य तत्कालजनितं तिथ्याद्यानयनं प्रदर्शयति। वर्षे निर्णयं मरण निश्चयं गणयित्वा ज्ञात्वा तदा वर्षप्रभागकल्पना कार्या किन्तु कस्मिन् विभागेऽर्थात्कस्मिनुदितादिस्वरजानां द्विसप्ततिदिनात्मकमासानामन्तरे मृत्युर्भविष्यतीति विचारणीयम्। तद्यथा। पूर्वोक्तवयोराशिस्वराङ्कानां योगसमे प्रथमाङ्कवृन्दे पञ्चभक्ते सत्येकादिशेषवशाद्विहितोदितादिस्वरादधःस्थे द्विसप्ततिदिनात्मके मासे मृत्युः कथनीयः। अत्रेदमवधेयम्। एकशेषे पूर्वविहितोदितस्वरस्य वर्षभागे। चेद्द्वौ शेषौ तदा भ्रमितस्वरस्य वर्षभागे। त्रिशेषे भ्रान्तस्वरस्य वर्ष विभागे चतुर्मिते शेषे सन्ध्यास्वरवर्षभागे पञ्चमिते शेषेऽस्तस्वरवर्षभागे द्विसप्ततिदिनात्मके मरणं वदेत्। एवं पञ्चस्वराणां मध्ये यस्मिन् जन्मादिकोष्ठे मरणमायाति तत्रापि द्विसप्ततिदिनानां मध्ये कस्मिन् त्रिभागे चतुर्विंशतिदिनात्मके मरणं भवेदिति-ज्ञानमुच्यते। यस्मिन् जन्मादिकोष्ठे मरणनिर्णयं प्राप्तं तत्रोर्ध्वमध्याधःस्थे स्थानत्रये यस्मिन् शून्यं स्यात्तद्विभागे मरणं भवेत्। अयं भावः। उर्ध्वस्थाने शून्ये तदा प्रथमत्रिभागे चतुर्विंशतिदिने। यदि मध्यस्थानेऽङ्काभावस्तदा चतुर्विंशतिदिनात्परमष्टचत्वारिंशद्दिनावधि। एवं यदि सर्वाधःस्थाने शून्यं तदा तृतीयभागेऽर्थादष्टचत्वारिंशद्दिनात्परं द्विसप्ततिदिनं यावन्मरणं भवेत्। अत्रैवं यदि चोर्ध्वमध्याधः स्थानत्रये सर्वस्मिन् शून्यानि वा स्थानद्वये च शून्यं तदा कस्मिन् त्रिभागे मरणं भवेदिति प्रतिपाद्यते। तदा पूर्वं वर्षेशत्रयमध्ये यो बली तस्य शून्यं अर्थात् शून्यकोष्ठस्थ चतुर्विंशतिदिनाभ्यन्तरे मरणं भवेत्परमेवं तदैव यदि त्रयो वर्षेशाः पापाः स्युः। अथ यदि तेषु वर्षेशेषु शुभग्रहेषु तदा जन्मकाले केन्द्रत्रिकोणादतिरिक्तस्थानेषु स्थित सौम्यग्रहजनितोर्ध्वमध्याधःस्थचतुर्विंशतिदिनाभ्यन्तरे मृत्युर्वाच्यः। अथवा वर्षेशसम्बन्धाभावानामपि पापानां कोष्ठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागे चतुर्विंशतिदिनाभ्यन्तरे मृत्युः । तत्र यदि स्थानत्रये सौम्या एव तदा जन्मकाले केन्द्रत्रिकोणेतरगतसौम्यभागे मरणम् । अथ चतुर्विंशतिदिनमध्येऽपि कस्मिन् दिने निधनं स्यादिति परामर्शे अप्पयदीक्षितनामा गणको वदति । तद्यथा । तत्र स्वरोदयोक्तसर्वतोभद्रचक्रोक्तपञ्चविद्धं यत्र दृश्यते तत्र दिने मृत्युर्वाच्यः । अथ नन्दादिज्ञानमुच्यते । पूर्वोक्ते प्रथमाङ्कवृन्दे पञ्चभिर्भक्ते रूपशेषे नन्दायाम्, द्विशेषे भद्रायाम्, त्रिशेषे जयायाम्, चतुःशेषे रिक्तायाम्, पञ्चशेषे पूर्णायाम् । इति मरणं विभाव्यम् । अथैवं नन्दादितिथिज्ञाने सति षट्सु नन्दासु कस्यां नन्दायां मरणं भविष्यतीतिज्ञानं प्रदर्श्यते । तद्यथा । पूर्वोक्ते प्रथमाङ्कवृन्दे षड्भक्ते रूपशेषे प्रथमनन्दायामर्थाच्छुक्लप्रतिपदि । द्विशेषे द्वितीयनन्दायां शुक्लषष्ठ्याम् । त्रिशेषे तृतीयनन्दायां शुक्लैकादश्याम् । चतुःशेषे चतुर्थनन्दायां कृष्णप्रतिपदि । पञ्चशेषे पञ्चनन्दायां कृष्णषष्ठ्याम् । षट्शेषे षष्ठनन्दायां कृष्णैकादश्याम् । एवं प्रथमाङ्कवृन्दात्पञ्चभक्ताद्द्विशेषेन ज्ञातायां भद्रायां सत्यां षट्सुभद्रासु कस्यां भद्रायामितिज्ञानं प्रथमाङ्कवृन्दात्षड्भक्तादेकादिशेषवशेषोक्तविधिना भवेत् । एवं सर्वत्र बोध्यम् । अथ तिथिज्ञानि मतान्तरं प्रतिपाद्यते । पूर्वोक्ताङ्कवृन्दे पञ्चभक्ते रूपादिशेषवशाद्यस्मिन् जन्मादिस्वरे मरणमायाति तत्स्वराधःस्था या नन्दादिका तिथिर्वर्णस्वरचक्रे भवति तस्यां मरणं वदेदेवंनक्षत्रादिकनिर्णयमपि भवेदिति कैश्चिदुदितम् ॥ ८६ ॥

हिन्दी—पूर्वोक्त रीति से पञ्चस्वर चक्र की रचना करके आगे कथित 'रविमन्द कुजे वर्षे' इत्यादि षोड्श योगों से मृत्यु का निश्चय करके वर्ष प्रभाग की कल्पना करनी चाहिए । अर्थात् किस द्विसप्तति (७२) दिनात्मक मास में मृत्यु होगी इसका ज्ञान पूर्वोक्त 'वयो, राशि, स्वराङ्क' का जो योग है उसमें ५ से भाग देने से यदि १ शेष हो तो उदित स्वर के वर्ष भाग में, २ शेष रहे तो भ्रमित स्वर के वर्ष भाग में, ३ रहे तो भ्रान्त स्वर के वर्ष भाग में, ४ रहे तो संध्या स्वर के वर्ष भाग में और ५ शेष रहे तो अस्तू स्वर के वर्ष भाग में मरण समझना चाहिये । इस ७२ दिनात्मक मास का भी तीन विभाग करना चाहिये, जिस कोष्ठक में मरण प्राप्त हो उस कोष्ठक के उर्ध्व स्थान में शून्य हो तो प्रथम विभाग में, मध्य में शून्य हो तो द्वितीय भाग में तथा यदि नीचे के स्थान में शून्य हो तो तृतीय भाग में मृत्यु समझें । यदि तीनों स्थानों में अथवा दो स्थानों में शून्य हो तो वर्षेशों के बलाबल के अनुसार प्रथम-द्वितीय अथवा तृतीय भाग में मृत्यु कहना चाहिये । अब नन्दादि तिथियों का ज्ञान—पूर्वोक्त योगाङ्क में ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

से भाग देने पर यदि १ शेष रहे तो नन्दा तिथि में, २ शेष रहे तो भद्रा तिथि में, ३ रहे तो जया तिथि में, ४ शेष रहे तो रिक्ता तिथि में तथा ५ शेष रहे तो पूर्णातिथि में मृत्यु समझनी चाहिये ॥ ८६ ॥

तिथ्यादि ज्ञान—

षड्भिर्भक्त्वा तिथिर्ग्राह्या वारो ग्राह्यश्च सप्तभिः।
पक्षेन्दुशेषिते लग्नं घटीभिश्च घटीं वदेत् ॥ ८७ ॥

अन्वयः—षड्भिः भक्त्वा तिथिः ग्राह्या वारो च सप्तभिः ग्राह्यः पक्षेन्दु शेषिते लग्नं (ग्राह्यं) घटीभिः च घटीं वदेत् ॥ ८७ ॥

संस्कृतः—अथ प्रथमाङ्कवृन्दं षड्भिर्भक्त्वा शेषमिता तिथिर्ग्राह्या तथा तदङ्कवृन्दं सप्तभिर्भक्त्वा शेषमितो वारो रव्यादिवारो ग्राह्यः। तदंकवृन्दे पक्षेन्दु-शेषिते द्वादशशेषिते सति लग्नं वदेत् । तदंकवृन्दे घटीभिर्लग्नप्रमाणदण्डैर्भक्ते सति शेषाच्च घटीमर्थाच्छेषतुल्ये लग्नदण्डे मृत्युं वदेत् । अयं भावः । तत्र तिथ्यानयनं पूर्वश्लोकार्थव्याख्यानावसरे स्फुटं वर्णितमेव । तदङ्कवृन्दे सप्तभक्ते रूपशेषे रविवासरः, द्विशेषे चन्द्रवासरः, त्रिशेषेकुजः, वेदशेषे बुधः, पञ्चशेषे गुरुः, रसावशेषेशुक्रः, सप्तशेषे शनिः । पक्षान्तरे 'वारो ग्राह्यस्तुपञ्चभिरित्यन्ये' तत्रैकशेषे रविभौमौ द्वौ चेत्तदा चन्द्रबुधौ त्रयश्चेद्गुरुश्चत्वारश्चेत्तदा शुक्रः । पञ्चमितावशेषे शनिरितिर्बोध्यम् । अथ लग्नानयनमुच्यते । तदङ्कवृन्दे द्वादशभि-र्भक्ते सति रूपशेषे मेषलग्नं तथा द्वादशावशेषेमीनलग्नमेवान्यदपि बोध्यम् । तदङ्कवृन्दे लग्नप्रमाणदण्डैर्भक्ते शेषमिते तल्लग्नदण्डे मृत्युः स्यात् । अत्र वारादौ नियमो नास्ति किन्तु तिथिपर्यन्तमेव मृत्युकारणं वदेदिति ज्योतिर्विदां सम्प्रदायः ॥ ८७ ॥

हिन्दी—नन्दादि तिथियों के ज्ञान के बाद किस नन्दा तिथि या किस भद्रादि तिथि में मरण होगा इसके ज्ञान हेतु पूर्वोक्त जो प्रथमाङ्क योग (वयो राशि स्वराङ्क योग) में ६ से भाग दें यदि १ शेष हो तो प्रथम नन्दा एवं प्रथम भद्रादि तिथियों (शुक्लपक्ष के १,२,३,४,५ तिथियों) को मरण होगा । यदि २ शेष हो तो द्वितीय नन्दादि तिथियों (शुक्लपक्ष के ६,७,८,९,१० को मरण होगा) ३ शेष से शुक्ल पक्ष के एकादशी से पाँच तिथियाँ, ४ शेष से कृष्ण पक्ष के प्रतिपदा से पञ्चमी तक, ५ शेष से कृष्ण पक्ष की षष्ठी से दशमी तक ६ शेष हो तो कृष्ण पक्ष के एकादशी से अमावस्या तक मरण कहना चाहिये । इसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरह भद्रादि तिथियों का भी पृथक्-पृथक् निश्चय करना चाहिये । वारानयन-पूर्वोक्त प्रथमाङ्क योग में ७ से भाग दे यदि १ शेष रहे तो रविवार, २ शेष रहे तो चन्द्रवार, ३ शेष रहे तो मङ्गलवार, इसी तरह ४,५,६,७ शेष में क्रमशः बुध-गुरु-शुक्र-शनिवार को जानना चाहिये । दैवज्ञगण प्रायः तिथि ज्ञान पर्यन्त ही आदेश करते हैं वार ज्ञान का आदेश नहीं करते ।

लग्नानयन ज्ञान-पूर्वोक्त योग में १२ का भाग दे यदि १ शेष बचे तो मेष, दो शेष में वृष इसी तरह तीन आदि शेष में मिथुनादि लग्न जानना चाहिये ।

'घटीभिश्च घटीं वदेत्' अर्थात् जब लग्न का ज्ञान हो जाय तो पूर्वोक्त योगाङ्क में लग्नप्रमाण दण्ड से भाग देकर शेष परिमित तुल्य उस लग्न में भी दण्ड का भुक्तभाग जान लेना चाहिये ॥ ८७ ॥

पूर्वोक्तयोगाङ्क में क्षेप—

एकं देय तु हेयं वा वर्षे वा इति सङ्ग्रहे ।
न देयं न हेयं वा मध्ये चेच्छुक्ल कृष्णयोः ॥ ८८ ॥

अन्वयः—वर्षेतु एक देयं वा हेयं इति संग्रहे शुक्ल कृष्णयोः मध्ये चेत् (तदा) न देयं वा न हेयम् ॥ ८८ ॥

संस्कृतः—यदा जन्मकाले चन्द्रः पूर्णबलस्तदा साधिते तदङ्कवृन्दे चैकं योज्यम् । यदा जन्मसमये चन्द्रः क्षीणबलस्तदा तदङ्कवृन्दे चैकं हेयं शोध्यम् । एवं शुक्लकृष्णयोर्मध्ये यदा जन्म किन्तुसमबले चन्द्रे यदा जन्म तदा न योज्यं नशोध्यं अर्थात् यथास्थितमेव । अत्र शुक्लदशमीमारभ्य कृष्ण-पञ्चमीं यावत्पूर्णबलश्चन्द्रः । एवं कृष्णषष्ठीमारभ्य दर्शान्तं यावत्क्षीणचन्द्रः । शुक्लप्रतिपदारभ्य दशमी यावन्मध्यमश्चन्द्रः । अत्र तिथिसङ्ग्रह इति-पाठान्तरे केचिदेवं वर्णयन्ति जन्मकाले वर्षाधिपश्चन्द्रः पूर्णबलो वर्षेचैकं देयम् । यदि जन्मकाले वर्षेशसम्बन्धाभावश्चन्द्रः पूर्णबलस्तदा तिथावेकं देयम् । अन्यत्पूर्वदिति ॥ ८८॥

हिन्दी—जन्मकाल में चन्द्र यदि पूर्णबली हो तो पूर्वोक्त साधित योगाङ्क में (वयोराशि स्वराङ्क योग में) एक का योग करें चन्द्र यदि क्षीणबल हो तो योगाङ्क में एक घटाना चाहिये । शुक्ल कृष्ण के मध्य अर्थात् चन्द्रमा सम बलयुक्त—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मासे तु शुक्ल प्रतिपत्प्रवृत्तेः पूर्णे शशी मध्यबलोदशाहे ।
श्रेष्ठो द्वितीयेऽल्प बलस्तृतीये सौम्येच दृष्टो बलवान्सदैव ॥"

हो तो एक संख्या न जोड़ना चाहिये और न घटाना चाहिये ॥ ८८ ॥

निधन के षोडशयोग—

रविमन्दकुजे वर्षे राहौ वा द्वित्रि संस्थिते ।
सप्त शून्यानि चेत्तत्र मृत्युर्भवति नान्यथा ॥ ८९ ॥

अन्वयः—रवि-मन्द-कुजे वर्षे वा राहौ द्वित्रिसंस्थिते चेत् तत्र सप्तशून्यानि मृत्युर्भवति न अन्यथा ॥ ८९ ॥

संस्कृतः—पूर्वविहिते पताकीचक्रत्रये चेद्यदि रविमन्दभौमा वर्षेशाः स्युर्वा राहौ द्वित्रिसंस्थिते वर्षेशद्वये वा वर्षेशत्रये प्राप्ते सति पुनर्यदि योगजचक्रे सप्त शून्यानि भवन्ति तत्र वर्षे तदाऽवश्यं मृत्युर्भवति । अन्यथा कथितयोगा-भावस्तदा न मृत्युः ।

तथा च खना वाक्यम्—

सातशून्यबहुतरपापा ताहां जीवन नहि रे बापा ।
हँसे खेलै नाकरे भिन्ना अवश्य हँसा करे पयाना ॥

रे वापा अहो तात यत्रसातशून्यसप्तकं पुनर्यदि बहुतरपापा त्रयोपि वर्षेशाः पापाः स्युः । तहां तत्र जीवन प्राणो नहि नतिष्ठति । तत्र हंसा जीवो हसें हास्यं खेलैखेलनं नाकरे न करोति किञ्चावश्यं भिन्नास्वर्गाय पयाना प्रयाणं करे करोति ॥ ८९ ॥

हिन्दी—यदि पूर्व कथित तीनों पताकी चक्रों (केतुपताकी, केतुकुण्डली और गुरुकुण्डली चक्र) में सूर्य-मंगल और शनि वर्षेश हों अथवा दो या तीन प्रकार से राहु वर्षेश हो और जन्मादि कोष्ठक साधन चक्र में यदि सात शून्य हो तो अवश्य मृत्यु होती है । पूर्व कथित योग का यदि अभाव हो तो मृत्यु नहीं होती है मात्र अरिष्ट होता है ॥ ८९ ॥

अथवा पाप संयुक्ते दश शून्यानि सन्ति चेत् ।
तदा मृत्युं व्रजेदेव देवराज समोपि वा ॥ ९० ॥

अन्वयः—अथवा पापसंयुक्ते चेत् दशशून्यानि सन्ति तदा देवराज समोऽपि एव मृत्युं व्रजेत् ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—अथवा प्रकारान्तरेणपापसंयुक्ते किन्तु वर्षेशत्रये पापे सति पुनर्यदि योगचक्रे राहुरूपाणि दश शून्यानि भवेयुस्तदा देवराजसमोपि शक्र-तुल्योपि नरो मृत्युं व्रजेत्प्राप्नोति वा निश्चयार्थे ॥ ९० ॥

हिन्दी—यदि वर्षेश पापग्रह हो तथा जन्मादि कोष्ठक साधन चक्रों में १० शून्य हो तो इस योग में इन्द्र तुल्य पराक्रमी व्यक्ति भी मृत्यु को प्राप्त होता है ॥ ९० ॥

योगान्तर—

आदौ चन्द्रो द्वि शून्यं च अन्ते कुज चतुष्टयम्।
मध्ये बुध त्रयं चैव गुरोर्मध्येऽथवा रविः ॥ ९१ ॥
पापद्वये त्रये वापि संयुक्ते हायनेऽपि च।
मरणं तत्र वक्तव्यं नात्र कार्या विचारणा ॥ ९२ ॥

अन्वयः—आदौ चन्द्रो द्वि शून्यं अन्ते च कुज चतुष्टयं मध्ये बुध त्रयं च अथवा रविः गुरोः मध्ये एव। हायने द्वये त्रये वापि पाप संयुक्ते च (तदा) मरणं अपि तत्र वक्तव्यं नात्र विचारणा कार्या ॥ ९१-९२ ॥

संस्कृतः—आदौ प्रथमे चन्द्रस्ततो द्विशून्यं स्थानद्वये शून्यम्। पुनर्यदि चान्ते कुजचतुष्टयं चत्वारो मङ्गलाः। पुनर्यदि मध्ये मध्यकोष्ठे बुधत्रयं त्रयो बुधाः। तत्र गुरोर्मध्ये रविर्वा पुनर्यदि हायने वर्षे पापद्वये वा पापत्रये संयुक्ते सहिते सति तदा तत्र वर्षे मरणं वक्तव्यं कथनीयम्। अत्र विचारणा न कार्या। अत्रेदमवधेयम्। जन्मकोष्ठे चोर्ध्वस्थाने द्वितीयाङ्करूपश्चन्द्रः तथा जन्मकोष्ठे मध्याधःस्थानद्वयेऽपि शून्योपलक्षितो राहुः। अन्त्येसर्वाधःस्थाने कर्मादि कोष्ठचतुष्टयेपि त्र्यङ्करूपो मङ्गलः पुनर्यदि मध्ये जन्मरन्ध्रकोष्ठयोर्मध्ये अर्थात् कर्मादिकोष्ठत्रयेपि मध्यस्थाने च चतुर्थांकरूपा बुधः। अवशेषस्थानेषु पञ्चसु ग्रहनियमाभावाः। अत एवं जातं तच्चक्रस्य रूपम्।

प्रथम चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
२	०	०	०	०
०	४	४	४	०
०	३	३	३	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा कर्मादिकोष्ठचतुष्टयेपि गुरोर्मध्ये रविःस्यादर्थादूर्ध्वान्त्यस्थानद्वये पञ्चाङ्करूपो गुरुस्तथा मध्यस्थाने चैकाङ्करूपो रविः । तदापि योगो भवत्यर्थाद्यथा प्रदर्शितकुजबुधनिवेशेन वशाद्यत्फलं तत्फलमेवार्कगुरुनिवेशजे योगे स्यात् । पुनर्यदि पताकीत्रयजानां वर्षेषानां मध्ये त्रयः पापाः स्युर्वा द्वौ पापौ तदा मरणं स्यात् । अत्र वर्षेशानां मध्ये कथितपापाभावस्तदा मरणस्य विचारणा न कार्याऽर्थात्तत्रमरणं न स्यात् । अत्र केचिदेवं वदन्ति । पूर्वोक्तग्रहनियमस्थानेषु स्थानद्वये अर्थात् कर्माधानकोष्ठयोः, वा कर्मपिण्डयोः, कर्मरन्ध्रयोः, आधानपिण्डयोः, आधानछिद्रयोः । एकत्रिशून्याङ्कौपलक्षितः १।३।० पापः अथवा पापत्रये स्थानत्रये पापः स्यादर्थात्कर्माधानपिण्डेषु तथा कर्माधानच्छिद्रेषु वा कर्मपिण्डच्छिद्रेषु वा आधानपिण्डच्छिद्रेषु तथा संभवः पापः स्यात् । तत्र हायने वर्षे मरणं कथनीयम् । एवं सति तत्राब्दे किं भविष्यतीति विचारणा न कर्त्तव्या किन्त्ववश्यं तदा मृत्युर्भवति । परञ्चेदं परमतं नादरणीयमिति सुधीभिर्विभाव्यम् । यतः 'अथवा पापसंयुक्तेजायते संशयो महान्' इति पापवर्षे संशये प्राप्ते सति तन्निर्णयाय नैसर्गिकचक्रत्रयानयनं विहितमर्थात्पापवर्षाभावे सति तच्चक्रत्रयमपि न विचारणीयमिति । अत्र पूर्वोक्तमेव समीचीनं स्यादिति मम मतम् ॥ ९१-९२ ॥

द्वितीय चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
२	५	५	५	५
०	१	१	१	१
०	५	५	५	५

हिन्दी—जन्म कोष्ठक के प्रथम स्थान में चन्द्रमा हो (अर्थात् २ अङ्क हो) शेष दो स्थानों में शून्य (राहू) हो तथा कर्मादि चारों कोष्ठक के तृतीय स्थान में ३ संख्योपलक्षित मङ्गल हो और मध्य के तीन स्थानों में चार संख्योपलक्षित बुध हो अथवा कर्म-आधान और पिण्ड कोष्ठकों के मध्य स्थान में चाहे कोई भी ग्रह हो परन्तु कर्मादि चारों कोष्ठकों में गुरु के मध्य में सूर्य हो अर्थात् उर्ध्वाधर स्थानों में गुरु (५) तथा मध्य में सूर्य (१) हो (नीचे चक्र में स्पष्ट है) और दो पापग्रह वर्षेश हो या तीनों वर्षेश पापग्रह ही हों तब भी मृत्यु होती है। यदि ऐसे योग नहीं हों तो मृत्यु नहीं होती है ॥ ९१-९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगान्तर—

स्थानत्रये यदा सूर्यः सूर्यादौ शून्ययुग्मकम् ।
अवश्यं मरणं चैव तस्मिन् वर्षे भवेत्तदाः ॥ ९३ ॥

अन्वयः—सूर्यः यदा स्थान त्रये सूर्यादौ शून्ययुग्मकं (यस्मिन् वर्षे भवेत्) तस्मिन् वर्षे चैव अवश्यं मरणं भवेत् ॥ ९३ ॥

संस्कृतः—यदा स्थानत्रये सूर्यः पताकीत्रये वर्षेशाः सूर्याः । तथा यदि पञ्चस्वरेषु चादौ सूर्यस्तदग्रे सर्वत्र शून्यद्वये तदा तस्मिन् वर्षेऽवश्यं मृत्युः ॥९३॥

चक्रम्

जन्म	कर्म	आधान	पिण्ड	छिद्र
१	१	१	१	१
०	०	०	०	०
०	०.	०	०	०

हिन्दी—तीनों (पताकी चक्रों से) वर्षेश सूर्य हो तथा जन्मादि पञ्चस्वरा-चक्र में आदि स्थानों में सूर्य (१) हो तथा शेष दो स्थानों में शून्य हो तो उस वर्ष अवश्य हीं मृत्यु होती है ॥ ९३ ॥

योगान्तर—

बुधेपि शून्ययुगले रवौ वर्षे शतां गते ।
बुधेप्यन्तर्गते चैव मरणं तन्न संशयः ॥ ९४ ॥

अन्वयः—बुधे अपि शून्य युगले रवौ वर्षे शतां गते बुधेऽपि अन्तर्गते चैव तत् मरणं न संशयः ॥ ९४ ॥

संस्कृतः—यदि रवौ वर्षे शतां गते पताकीत्रयेपि वर्षेशः सूर्य तथा पञ्चस्वरेषु चादौ बुधे सति ततः शून्ययुगले शून्यद्वयं स्यादयमेको योगः । यदि पञ्चस्वरेषु मध्ये बुधस्तथाऽऽदावन्ते च शून्यद्वयं पुनर्यदि पताकीत्रयोत्थो वर्षेशः सूर्यः तदा मरणं स्यादिति संशयो न । तथोक्तमन्यैः—

'ज्ञः शून्ययुग्मश्च बुधः खमध्येऽर्केब्देश्वरे तत्र निमीलने स्यात्' ।

अर्थात् खमध्ये शून्य द्वयमध्ये बुधः तदा निमीलनं मरणं स्यादन्यत्सुगमम् ॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथम चक्रम्

जन्म	कर्म	आय	पिण्ड	छिद्र
४	४	४	४	४
०	०	०	०	०
०	०	०	०	०

द्वितीय चक्रम्

जन्म	कर्म	आय	पिण्ड	छिद्र
०	०	०	०	०
४	४	४	४	४
०	०	०	०	०

हिन्दी—तीनों पताकी चक्रों में यदि वर्षेश सूर्य हो, पञ्चस्वराचक्र में सभी आदि स्थानों में बुध (४) हो तथा शेष स्थानों में शून्य हो तो भी मृत्यु होती है। अथवा पञ्चस्वरा चक्र में सभी मध्य स्थानों में बुध (४) हो तथा शेष उर्ध्वाधर सभी स्थान शून्य से युक्त हों (तीनों प्रकार से वर्षेश सूर्य हो) तो अवश्य ही मृत्यु होती है ॥ ९४ ॥

योगान्तर कथन—

गुरौ शून्यद्वये प्राप्ते कुजश्चान्ते भवेद्यदि।
प्राणत्यागो भवेत्तत्र पापे वर्षे शतां गते॥ ९५ ॥

अन्वयः—शून्यद्वये गुरौ प्राप्ते अन्ते कुजश्च यदि भवेत् पापे वर्षे शतां गते तत्र प्राणत्यागो भवेत् ॥ ९५ ॥

संस्कृतः—पापे वर्षेशतां गते पताकीत्रये पापा वर्षेशाः तथा यदि पञ्चस्वरमध्ये चादौ गुरौ शून्यद्वये प्राप्ते गुरुः शून्यद्वयसंयुतः तथाऽन्ते छिद्रकोष्ठे सर्वाधःस्थाने च कुजः स्यात् तत्र प्राणत्यागो भवेत्।

तथा खनावाक्यम्—

गुरु प्रथम दूइशून्य आइसे अन्त्ये कुज काले पसे।
हँसे खेलै नाकरे भिन्ना अवश्य हँसा करे पयाना॥

प्रथमगुरु प्रथमं गुरुः। ततो दुई शून्य शून्यद्वयं आइसे आयाति। तथा अन्त्ये कुज छिद्रकोष्ठेऽधः स्थाने मङ्गलः। तदा कालेपसे तस्य नरस्य कालप्राप्तः अर्थात् मरणम्। अन्यत्पूर्ववत् ॥ ९५ ॥

हिन्दी—तीनों पताकी चक्रों में वर्षेश यदि पापग्रह हों, पञ्चस्वरा चक्र में आदि कोष्ठक (जन्मकोष्ठक) में बृहस्पति (५) दो शून्य से युक्त हो तथा अन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

में (छिद्र कोष्ठक के अन्त में) यदि मङ्गल (३) हो तो अवश्य ही मृत्यु होती है ॥ ९५ ॥

योगान्तर—

शून्यद्वये कुजे प्राप्ते चान्त्येपि कुजसम्भवे ।
विशेषेण मृतिर्ज्ञेया वर्षे वै पाप संयुते ॥ ९६ ॥

अन्वयः—कुजे शून्यद्वये प्राप्ते अन्त्येऽपि कुजसम्भवे पाप संयुते वै वर्षे विशेषेण मृतिर्ज्ञेया ॥ ९६ ॥

संस्कृतः—कुजे शून्यद्वये प्राप्ते पञ्चस्वरेष्वादौ शून्यद्वयविशिष्टः कुजः । तथाऽन्ते छिद्रकोष्ठेऽधः स्थानेपि कुजसम्भवे सति कुजस्य स्थितिः स्यात् । पुनर्यदि पापसंयुते वर्षे पताकीत्रये पापा अब्देशाः स्युः । तत्र विशेषेण मृतिर्ज्ञेया । तथान्यैरुक्तम् । 'शून्ये कुजश्चान्त्यगतः कुजश्चेति' ॥ ९६ ॥

हिन्दी—पञ्चस्वरा चक्र में आदि स्थान में मङ्गल (३) यदि दो शून्य से युक्त हो और अन्त में भी मङ्गल (३) हो तथा यदि तीनों पताकी चक्र में पापग्रह वर्षेश हों तो अवश्य ही मृत्यु होती है ॥ ९६ ॥

योगान्तर—

शुक्रे शून्यद्वये प्राप्ते वर्षे वै पापसंयुते ।
द्वितीयस्वरसंयोगे मरणं तस्य निश्चितम् ॥ ९७ ॥

अन्वयः—शून्यद्वये शुक्रे प्राप्ते वै वर्षे पाप संयुते द्वितीय स्वर संयोगे तस्य मरणं निश्चितम् ॥ ९७ ॥

संस्कृतः—पापसंयुते वर्षे पताकीत्रयोत्था वर्षेशाः पापाः । पुनर्यदि द्वितीयस्वरसंयोगे शून्यद्वये प्राप्ते शुक्रे सति किन्तु कर्मकोष्ठ स्वरे चादौ शुक्रस्तथा शून्यद्वयं च स्यात् तदा तस्य मरणं निश्चितमिति । ग्रन्थान्तरे चास्मिन् योगे कुजसम्बन्ध उक्तः 'शुक्रः खयुग्मं रुधिरोऽथवेति' ॥ ९७ ॥

हिन्दी—तीनों पताकी चक्र से वर्षेश यदि पापग्रह हों तथा द्वितीय स्वर अर्थात् कर्मस्वर के कोष्ठक में शुक्र (६) दो शून्य से युक्त हो तो अवश्य ही मृत्यु होती है ॥ ९७ ॥

योगान्तर—

प्रथम त्रीणि शून्यानि छिद्रे च कुजसंस्थितिः ।
वर्षं तत्क्लेशदं ज्ञेयं शुभयोगे शुभप्रदम् ॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वय:—प्रथम त्रीणि शून्यानि छिद्रे कुज संस्थिति: च तत् वर्षे क्लेशदं ज्ञेयं शुभयोगे शुभप्रदम् ॥ ९८ ॥

संस्कृत:—प्रथमं जन्मकोष्ठे त्रीणि शून्यानि चोर्ध्वमध्याध:स्थानेषु शून्यानि तथा यदि छिद्रकोष्ठेऽध:स्थाने कुजसंस्थितिर्मङ्गलस्यावस्थानं स्यात् । तथाऽब्देशाश्च पापास्तदा तद्वर्षं क्लेशदं ज्ञेयम् । तत्र योगे शुभयोगे सति किन्तु यदा वर्षेशा: शुभास्तदा तद्वर्षं शुभप्रदं ज्ञेयमिति ॥ ९८ ॥

हिन्दी—पञ्चस्वराचक्र के जन्मकोष्ठक में यदि तीनों स्थान शून्य से युक्त हों तथा छिद्र कोष्ठक के अन्त में मङ्गल (३) हो और वर्षेश पापग्रह हो तो क्लेश होता है अन्यथा वर्षेश यदि शुभग्रह हों तो वह वर्ष शुभप्रद होता है ॥ ९८ ॥

पुनर्योगान्तर—

दश शून्यानि यत्र स्युर्वर्षे वै गुरु शुक्रयो: ।
क्लेशमात्रं विजानीयाज्जीवने नात्र संशय:॥ ९९ ॥

अन्वय:—गुरु शुक्रयो: वै वर्षे दशशून्यानि यत्र स्यु: क्लेशमात्रं विजानीयात् जीवने नात्र संशय: ॥ ९९ ॥

संस्कृत:—गुरुशुक्रयोर्वर्षे किन्तु गुरुशुक्रौ वर्षेशौ तथा यदि पञ्चस्वरेषु यत्र कुत्रचिद्दश शून्यानि स्यु: तदा तत्र वर्षे क्लेशमात्रं विजानीयात् । तत्र जीवने प्राणधारणे संशयो न स्यात् । अर्थान्मृत्युर्नेति बोध्यम् ॥ ९९ ॥

हिन्दी—जिस वर्ष में वर्षेश बृहस्पति व शुक्र हो तथा पञ्चस्वरा चक्र में जन्मादि सभी कोष्ठकों में दश शून्य हो तो उस वर्ष में मात्र क्लेश होता है मृत्यु नही होती ॥ ९९ ॥

योगान्तर कथन—

छिद्रे बुधे द्वये शून्ये जन्मनि ज्ञद्वये कुजे ।
शुक्रे कर्मणि शून्ये द्वे मृत्युर्भवति नान्यथा ॥ १०० ॥

अन्वय:—छिद्रे बुधे शून्ये द्वये जन्मनि ज्ञ द्वये कुजे शुक्रे कर्मणि द्वे शून्ये (तदा) मृत्युर्भवति न अन्यथा ॥ १०० ॥

संस्कृत:—छिद्रे छिद्रकोष्ठे चादौ बुधे ततो मध्याध:स्थाने शून्ये द्वये सति तथा जन्मनि जन्मकोष्ठे ज्ञद्वये बुधद्वये कुजे सति अर्थात् कुज: स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा शुक्रे कर्मणि कर्मकोष्ठे द्वे शून्ये शून्यद्वयं स्यात् तदा मृत्युर्भवति अन्यथा न स्यात् ॥ १०० ॥

हिन्दी—पञ्चस्वरा चक्र के छिद्र कोष्ठक के प्रथमस्थान में यदि बुध (४) हो, मध्य व अन्त कोष्ठक में शून्य हो तथा जन्मकोष्ठक के प्रथम-द्वितीय स्थान में बुध (४), तृतीय स्थान में मङ्गल और कर्म कोष्ठक में शुक्र दो शून्य से युक्त हो तो अवश्य ही मृत्यु होती है इसमें अन्यथा नहीं ॥ १०० ॥

जन्म	कर्म	आधान	पिण्ड	छिद्र
४	६			४
४	०			०
३	०			०

योगान्तर—

जन्मन्यर्क गुरुकर्मण्यथ राहु दिवाकरौ।
आधाने मन्द भौमौ च जन्तोर्मरणमादिशेत् ॥ १०१ ॥

अन्वयः—अथ जन्मनि अर्क गुरुः कर्मणि राहु दिवाकरौ आधाने मन्द भौमो च (तदा) जन्तोः मरणं आदिशेत् ॥ १०१ ॥

संस्कृतः—जन्मनि जन्मकोष्ठेऽर्कगुरु तथा कर्मणि कर्मकोष्ठे राहु-दिवाकरौ स्याताम् । पुनर्यदि चाधाने मन्दभौमौ शनिमङ्गलौ स्तः । अत्रापि यदि वर्षेशाः पापाः स्युरित्यनुक्तमपि बोध्यम् । तदा जन्तोः पुरुषस्य मरणं वदेत् । ग्रन्थान्तरेप्युक्तम् 'जनुषि बध्नपूज्यौ क्रमेण राहुर्भानुश्च कर्मण्यवनिजरविजौ चेत्तृतीये स्वरे स्यान्मृत्युरिति' ॥ १०१ ॥

हिन्दी—पञ्चस्वरा चक्र के जन्मकोष्ठक में सूर्य-बृहस्पति, कर्म कोष्ठक में राहु-सूर्य और आधानकोष्ठक में शनि-मङ्गल हों तो (वर्षेश पापग्रह हों तो) मरण होता है ॥ १०१ ॥

जन्म	कर्म	आधान	पिण्ड	छिद्र
१	०	६		
५	१	३		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगान्तर—

विधूराहू विधूश्चेति योगो वाऽन्योन्य सम्भवे ।
गुरुचन्द्रशनेर्वर्षे तदापि मृत्युमादिशेत् ॥ १०२ ॥

अन्वय:—विधू राहू विधू: च इति अन्योन्य योगो वा सम्भवे तदा गुरु चन्द्र शने: वर्षे अपि मृत्युं आदिशेत् ॥ १०२ ॥

संस्कृत:—अत्र पञ्चसु कोष्ठेषु विधुराहू तथा विधुः पुनश्चन्द्र इत्येषां परस्परसम्भवे सति यदि योगः । अर्थात्पञ्चषु प्रथमं चन्द्रस्तदग्रे राहुस्तदग्रे चन्द्र इति तथा गुरुचन्द्रशनेर्वर्षे गुरुचन्द्रशनीनां वर्षे तदापि मृत्युमादिशेत् कथयेत् ॥ १०२ ॥

हिन्दी—पञ्चस्वरा चक्र में जन्मादि सभी कोष्ठकों में यदि क्रमशः चन्द्रमा-राहु और चन्द्रमा हों तथा बृहस्पति-चन्द्रमा और शनि वर्षेश हों तो अवश्य हीं मृत्यु होती है ॥ १०२ ॥

जन्म	कर्म	आधान	पिण्ड	छिद्र
२	२	२	२	२
०	०	०	०	०
२	२	२	२	२

योगान्तर—

पापद्वयान्विते वर्षे शून्यषट्कं भवेद्यदि ।
कुजश्चान्ते भवेद्यस्य तस्य मृत्युर्न संशयः ॥ १०३ ॥

अन्वय:—पापद्वय अन्विते वर्षे शून्य षट्कं यदि भवेत् यस्य अन्ते कुजश्च भवेत् तस्य मृत्यु: (भवेत्) न संशय: ॥ १०३ ॥

संस्कृत:—वर्षे पापद्वयान्विते सत्यर्थात्पताकीत्रयोत्थानां वर्षेशानां मध्ये पापद्वयं तथा यदि पञ्चस्वरेषु राहुरूपं शून्यषट्कं भवेत्, तथा यदि चान्ते छिद्रकोष्ठेऽधः स्थाने कुजो मङ्गलः । एवं यस्य भवेत्तस्य तदा मृत्युः स्यादिति संशयो न स्यात् ॥

तथा च खनावाक्यम्—

दुई पाप षट् शून्य तदीशाः अन्ते कुज काल परे ।
हँसे खेलै नाकरे भिन्ना अवश्य हँसा करे पयाना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुई पाप वर्षेशद्वयं पापरूपं तथा षट्शून्यं शून्यषट्कं यथा अन्ते कुज छिद्रकोष्ठाधःस्थाने कुजो भवेत् तदा कालपरे मृत्युर्भवेत् । उत्तरार्धस्यार्थः पूर्ववदवधेयः ॥ १०३ ॥

हिन्दी—पताकी चक्रों में दो पापग्रह वर्षेश हों (तीनों वर्षेशों में से कोई भी दो पापग्रह), पञ्चस्वरा चक्र के जन्मादि सभी कोष्ठकों में मिलकर ६ शून्य हों और छिद्र कोष्ठकों के अन्त में यदि मङ्गल हो तो अवश्य ही मृत्यु होती है इसमें सन्देह नहीं ॥ १०३ ॥

योगान्तर—

बुधत्रयं कुजद्वयं दश शून्यं भवेद्यदि ।
मन्दार्कार युते वर्षे राहौ वा स्यात्तदा मृतिः ॥ १०४ ॥

अन्वयः—बुध त्रयं कुजद्वयं यदि दश शून्यं भवेत् तदा मन्द-अर्क- आर युते वर्षे राहौ वा स्यात् तदा मृतिः ॥ १०४ ॥

संस्कृतः—वर्षे मन्दार्कारयुते पताकीत्रये क्रमेण शनिरविभौमा वा राहुर्वर्षेशाः तथा पञ्चस्वरेषु बुधत्रयं तथा त्र्यङ्करूपं भौमद्वयम् तथा यदि दश-शून्यश्च तदा मृतिः स्यात् ॥

तथा च खनावाक्यम्—

तीनबुध दुइ मङ्गल आइसे लिखिआ दश शून्य जहार आइसे ।
शनि रवि मङ्गल राहु गणना सेइ वत्सर मरण बोले खना ॥

तीन बुध बुधत्रयं दुइ मङ्गल मङ्गलद्वयम् । दशशून्य दशशून्यानि लिखिआ गणयित्वा जहार यस्य अइसे आगच्छेयुः । शनिरविमङ्गलराहुणा शनिरविमङ्गलानां वा राहोश्चाब्देश मध्ये गणना स्यात् । सेइ वत्सर तस्मिन्नेव वर्षे मरणबोले मरणं वदति ॥ १०४ ॥

हिन्दी—यदि तीनों पताकीचक्र में क्रमशः शनि-सूर्य और मङ्गल वर्षेश हों अथवा राहु वर्षेश हो तथा पञ्चस्वराचक्र के जन्मादि कोष्ठकों में कहीं भी तीन स्थानों में बुध, दो स्थानों में मङ्गल हो और शेष दश कोष्ठकों में शून्य हो तो अवश्य ही मृत्यु होती है ॥ १०४ ॥

योगान्तर—

पञ्च स्वरे यदा भौमः पञ्चमः सप्तमो भवेत्।
पाप त्रयान्विते वर्षे तथैव मृत्युमादिशेत् ॥ १०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—पञ्चस्वरे यदा पञ्चमः वा सप्तमो भौमः भवेत् तथा पाप त्रयान्विते वर्षे एव मृत्युं आदिशेत् ॥ १०५ ॥

संस्कृतः—पञ्चस्वरे पञ्चस्वरमध्ये यदा भौमः पञ्चमः पञ्चमस्थानगतः अर्थात् कर्मकोष्ठस्य मध्यस्थानेस्थितः तथा सप्तमः सप्तमस्थानगतः किञ्चा-धानकोष्ठस्योर्ध्वस्थाने स्थितो भवेत् । तथा यदि पापत्रयान्विते वर्षे सत्यर्था-त्पताकीत्रयोत्था अब्देशाः पापाः स्युः तथैव मृतिमादिशेत् । तथान्यैरप्युक्तम् ।

'भौमो यदा कर्मणिमध्यगः स्यात्कोष्ठे तृतीये प्रथमो भवेत्सः ।
मृत्युर्व्रजेदेवहि हायनेऽस्मिन् तथैव पापत्रयसंयुतेऽब्द इति' ॥

तथा च खनावाक्यम्—

मङ्गल सप्तम पञ्चम वा प्रमाण ।
जीवन मरण स्फुट तत्क्षण जान ॥ १०५ ॥

हिन्दी—पञ्चस्वरा चक्र के पञ्चम तथा सप्तम स्थान में (अर्थात् कर्म कोष्ठक के मध्य और आधान कोष्ठक के प्रथम स्थान में) मङ्गल हो और पताकी चक्रों में यदि तीनों वर्षेश पापग्रह हों तो उस वर्ष में अवश्य ही मृत्यु होती है ॥ १०५ ॥

विशेष कथन—

पापग्रहदशायान्तु पापस्यान्तर्दशा यदि ।
अरियोगे भवेन्मृत्युर्मित्रयोगे न संशयः ॥ १०६ ॥

अन्वयः—यदि पापग्रह दशायां तु पापस्य अन्तर्दशा (तदा) अरियोगे मृत्यु भवेत् मित्र योगे न संशयः ॥ १०६ ॥

संस्कृतः—यदा पापग्रहस्य महादशायां पापग्रहस्यैवान्तर्दशा भवेत् । यथा तद्ग्रहद्वयस्यारियोगे सत्यर्थात्तयोर्दशान्तर्दशास्वामिनोः शत्रुत्वे मृत्युर्भवेत् । अर्थात् यदि तयोर्मित्रयोगे मित्रत्वे सति संशयो न स्यादर्थात्मृत्युर्न स्यात् । अर्थात् क्लेशमात्रं स्यात् । अत्र शुभदशायामप्यरियोगे मृत्युः स्यादिति ॥ १०६ ॥

हिन्दी—पापग्रह की दशा में पापग्रह की ही अन्तर्दशा हो तथा दशास्वामी और अन्तर्दशा स्वामी परस्पर शत्रु हों तो उस अन्तर्दशा में मृत्यु होती है । अन्यथा यदि दशा और अन्तर्दशा के स्वामियों में परस्पर मित्रता हो तो मृत्यु नहीं होती है अपितु क्लेशमात्र होता है ॥ १०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसंहार कथन—

ज्योतिर्विदः प्रपश्यन्तु ग्रहाणां सुविचारकाः ।
पञ्चस्वरादितो यद्वै सङ्गृहीतं सुनिश्चितम् ॥ १०७ ॥

इति श्रीप्रजापतिदास विरचिते पञ्चस्वराख्ये आयुर्दाय-
विचाराध्यायः ॥ २ ॥

अन्वयः—पञ्चस्वरादितो यत् वै संगृहीतं सुनिश्चितं (तद्) ग्रहाणां सुविचारकाः ज्योतिर्विदः प्रपश्यन्तु ॥ १०७ ॥

संस्कृतः—ग्रहाणां सुविचारका ज्योतिर्विदः ज्योतिः शास्त्रज्ञा इदं प्रपश्यन्तु । पञ्चस्वरादितः पञ्चस्वरावलम्बनवशान्मया प्रजापतिदासनाम्ना गणकेन यच्छुभाशुभं सुनिश्चितं सुनियतं सङ्गृहीतमिति । अत्रायमाशयः । जन्मलग्नस्य पापविद्धे पापग्रहाणां यामार्धदण्डयोर्जन्म चायं सर्वमरणयोगानां सहायकः । तथा विश्वेश्वरोपि—

यत्राब्दे वहवः क्रूराः सौम्या न्यूनाश्च यत्र हि ।
तत्र क्लेशं विजानीयात्कार्यमात्रेण संशयः ॥
स्वोच्चादिपदगाः क्रूराः सदा सफलदायकाः ।
नीचादिपदगाः सौम्या न शुभाः सर्वथा नृणाम् ॥ १०७ ॥

श्रीकृष्णदत्तविरचिते सुबोधिनी टीकायां आयुर्दाय-
विचाराध्यायः द्वितीयः ॥

हिन्दी—मैं 'प्रजापतिदास' ज्यौतिषी अकारादि पाँचों स्वरों के आधार पर जो कुछ संग्रह करके निश्चय किया हूँ उसे श्रेष्ठ ज्योतिषी गण विचारपूर्वक ध्यान से देखें अर्थात् मेरे परिश्रम को सार्थकता प्रदान करें ॥ १०७ ॥

सत्येन्द्रमिश्र कृत 'प्रज्ञावर्द्धिनी' हिन्दीटीका में पञ्चस्वरा का
आयुर्दायविचाराध्याय द्वितीय समाप्त ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरिष्टविचाराध्यायः—३

अरिष्टकथन—

चन्द्रसूर्यगृहे राहुश्चन्द्रः सूर्ययुतो यदि।
सौरिभौमेक्षितं लग्नं पक्षमेकं न जीवति ॥ १ ॥

अन्वयः—यदि राहुः चन्द्रसूर्य गृहे (वा) चन्द्रसूर्य युतो लग्नं सौरि भौमेक्षितं (तदा) एकं पक्षं न जीवति ॥ १ ॥

संस्कृतः—अथ बहुषु पुस्तकेषु स्थिताः श्लोकाः सङ्गृहीतरूपा ये तानपि प्रसङ्गाद्व्याख्यास्यामः ।

यस्य जन्मकाले राहुश्चन्द्रसूर्यगृहे कर्कसिंहराशौ स्थितः, यदि चन्द्रः सूर्ययुतः सूर्येण सहितः तथा यदि लग्नं जन्मकालिकलग्नं सौरिभौमेक्षितं शनिमङ्गलाभ्यां दृष्टम् । तदा सच बालकः पक्षं जन्मतः पञ्चदशदिनं यावन्न जीवति अर्थात् पञ्चदशदिनाभ्यन्तरे प्राणवियोगं करोति ॥ १ ॥

हिन्दी—जिसके जन्मसमय में राहु कर्क या सिंह राशि का हो, चन्द्रमा सूर्य से युक्त हो और लग्न स्थान शनि तथा मङ्गल से दृष्ट हो तो वह जातक १५ दिन के अन्दर ही मृत्यु को प्राप्त करता है ॥ १ ॥

मातासहित अरिष्टयोग—

कर्मस्थाने स्थितः सौरिः शत्रुस्थाने कलानिधिः ।
क्षितिजः सप्तमस्थाने समात्रा म्रियते शिशुः ॥ २ ॥

अन्वयः—सौरि कर्मस्थाने कलानिधिः शत्रुस्थाने क्षितिजः सप्तमस्थाने स्थितः (तदा) शिशुः मात्रा सह म्रियते ॥ २ ॥

संस्कृतः—सौरिः शनिः कर्मस्थाने लग्नाद्दशमस्थाने स्थितः तथा यदि कलानिधिः चन्द्रः शत्रुस्थाने स्थितः पुनर्यदि क्षितिजो मङ्गलःसप्तमस्थाने गतः । एवं विधे योगे जातः शिशुःस मात्रा मातृसहितो म्रियते प्राणवियोगं करोति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी—जिसके जन्मसमय में शनि दशम में, चन्द्रमा षष्ठ में और मङ्गल सप्तम स्थान में स्थित हों तो उस बालक की माता के साथ ही मृत्यु होती है ॥

अरिष्टयोग कथन—

लग्ने भास्करपुत्रः निधने च चन्द्रमा यदि ।
तृतीयस्थो यदा जीवः स याति यममन्दिरम् ॥ ३ ॥

अन्वयः—यदि भास्करपुत्रः लग्ने चन्द्रमा निधने यदा जीवः तृतीयस्थो (तदा) स यममन्दिरं याति ॥ ३ ॥

संस्कृतः—यदि भास्करपुत्रः शनिर्लग्ने जन्मलग्ने स्थितः, पुनर्यदि चन्द्रमा निधनेऽष्टमे स्थितः, पुनर्यदा जीवो बृहस्पतिस्तृतीयस्थः । यस्यैवं विधे योगे जन्म स यममन्दिरं यमगृहं मृत्युं याति प्राप्नोति ॥ ३ ॥

हिन्दी—जन्मलग्न में शनि, अष्टम में चन्द्रमा और तृतीय में गुरु स्थित हों तो वह बालक शीघ्र ही मृत्यु को प्राप्त करता है ॥ ३ ॥

और भी—

होरायाः सप्तमे सूर्यः सप्तमे च शनैश्चरः ।
एकादशे गुरुः शुक्रो मासमेकं न जीवति॥ ४ ॥

अन्वयः—सूर्यः होरायाः सप्तमे शनैश्चरः च सप्तमे गुरु शुक्रो एकादशे (तदा) मासमेकं न जीवति ॥ ४ ॥

संस्कृतः—सूर्यो होरायाः अर्थात् लग्नात्सप्तमे स्थितः । पुनर्यदि शनैश्चरः सप्तमे स्थितः । गुरुः शुक्रश्चैकादशे स्थितः तदा शिशुरेकं मासं न जीवति अर्थात् मासाभ्यन्तरे जातस्य मृत्युः ॥ ४ ॥

हिन्दी—जन्मलग्न से सप्तम में सूर्य-शनि और एकादश में यदि गुरु शुक्र हों तो वह जातक एक मास के अन्दर ही मृत्यु को प्राप्त होता है ॥ ४ ॥

और भी—

लग्नसंस्थौ शनिकुजावष्टमस्थो यदा शशी ।
भवेत्षष्ठे यदा जीवो जीवनं तस्य दुर्लभम् ॥ ५ ॥

अन्वयः—यदा शनि कुजौ लग्न संस्थौ शशी अष्टमस्थौ, यदा जीवो षष्ठे भवेत् (तदा) तस्य जीवनं दुर्लभम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—शनिकुजौ शनिमङ्गलौ लग्नसंस्थौ स्तः तथा यदि शशी चन्द्रोष्टमस्थः तथा यदा जीवः षष्ठे स्थितः । षष्ठेऽष्टमे भवेज्जीवो इति पाठान्तरे जीवः षष्ठेऽष्टमे गतः । एवं विधे योगे यस्य जन्मःतस्य जीवनं दुर्लभं स्यादर्थात्स न जीवति ॥ ५ ॥

हिन्दी—जन्मलग्न में शनि-मङ्गल, अष्टम में चन्द्रमा तथा षष्ठ में बृहस्पति हों तो उसका जीवन दुर्लभ होता है ॥ ५ ॥

और भी—

अरिगेहस्थितश्चन्द्रो भास्करोपि यदा भवेत् ।
मार्कण्डेयसमोपि स्यान्मासमेकं न जीवनम् ॥ ६ ॥

अन्वयः—यदा चन्द्रो भास्करोऽपि अरिगेहस्थितः भवेत् (तदा) मार्कण्डेय समोऽपि स्यात् (परं तस्य) मासमेकं न जीवनम् ॥ ६ ॥

संस्कृतः—चन्द्रस्तथा भास्करः सूर्यो यदाऽरिगेहस्थितः षष्ठस्थाने गतस्तदा मार्कण्डेय समोपि मार्कण्डेयेन मुनिना दीर्घायुषा तुल्योपि नर एकं मासं न जीवति ॥ ६ ॥

हिन्दी—जन्मसमय में सूर्य तथा चन्द्रमा दोनों ही षष्ठ स्थान में हों तो मार्कण्डेय मुनि के समान दीर्घायु पुरुष भी एक मास के अन्दर ही मृत्यु को प्राप्त करता है ॥ ६ ॥

और भी—

अष्टमस्थो यदा पापः सौम्यश्चद्वादशे स्थितः ।
तदा मृत्युं व्रजेदेव देवराज समो यदि ॥ ७ ॥

अन्वयः—यदा पापः अष्टमस्थो सौम्यश्च द्वादशे स्थितः तदा देवराजसमो यदि (तदापि) मृत्युं एव व्रजेत् ॥ ७ ॥

संस्कृतः—यदा पापः पापग्रहो लग्नादष्टमस्थः । पुनर्यदा सौम्यः शुभग्रहो द्वादशे स्थितः (षष्ठाष्टमे इति पाठान्तरम्) तदा देवराजसम इन्द्रतुल्योपि नरो मृत्युं व्रजेत् ॥ ७ ॥

हिन्दी—अष्टम में पापग्रह तथा द्वादश में शुभग्रह स्थित हों तो इन्द्र के समान पराक्रमी पुरुष भी मृत्यु को प्राप्त करता है ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माता-पिता के साथ मरण योग—

षष्ठाष्टमगतश्चन्द्रो रविजः सप्तमे स्थितः।
पितृमातृ विनाशी स्यान्मासमेकं न जीवति ॥ ८ ॥

अन्वयः—चन्द्रो षष्ठाष्टम गतो रविजः सप्तमे स्थितः (तदा) मातृ पितृ विनाशी स्यात् (तथा) मासमेकं न जीवति ॥ ८ ॥

संस्कृतः—चन्द्रः षष्ठाष्टमगतः तथा यदि रविजः शनिः सप्तमस्थितः। तदैवं विधे योगे जातः शिशुः पितृमातृविनाशी अर्थात् पितृमातृविनाशकरः स्यात्तथा स्वयमप्यैकं मासं न जीवति ॥ ८ ॥

हिन्दी—जन्मलग्न से षष्ठ अथवा अष्टम में चन्द्रमा और सप्तम में शनि हो तो वह बालक माता-पिता का नाश करके स्वयं भी १ मास के अन्दर ही मृत्यु को प्राप्त करता है ॥ ८ ॥

अरिष्टयोग—

शुभे लग्ने यदा जातश्चाष्टमे च निशाकरः।
शनैश्चरश्च बन्धुस्थो द्विमासे मृत्युमिच्छति ॥ ९ ॥

अन्वयः—यदा लग्ने शुभे जातः अष्टमे च निशाकरः बन्धुस्थो शनैश्चरश्च (तदा) द्विमासे मृत्युमिच्छति ॥ ९ ॥

संस्कृतः—यदा शुभे शुभराशौ लग्ने जात उत्पन्नो नरो भवेत् तथा यदि निशाकरश्चन्द्रोऽष्टमे गतः। पुनर्यदि शनैश्चरो बन्धुस्थः 'मृत्युस्थः' इति पाठान्तरे चाष्टमगतः। तदा स च नरो द्विमासे मृत्युमिच्छति अर्थात् जन्मतो मासद्वयं यावन्मृत्युं प्राप्नोति ॥ ९ ॥

हिन्दी—यदि जन्मलग्न में शुभ ग्रह की राशि हो तथा अष्टम में चन्द्रमा व चतुर्थ में शनि हो तो दो मास के अन्दर ही जातक की मृत्यु हो जाती है ॥ ९ ॥

और भी—

यस्य जन्मविलग्नस्थाः सूर्यशुक्रशनैश्चराः।
द्वादशस्थो गुरुश्चैव पञ्चमासं न जीवति ॥ १० ॥

अन्वयः—सूर्य-शुक्र-शनैश्चराः यस्य जन्म विलग्नस्थाः गुरुश्चैव द्वादशस्थो (तदा) पञ्चमासं न जीवति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—यस्य सूर्यशुक्रशनैश्चरा जन्म लग्नस्थाः स्युः तथा यदि गुरु-र्द्वादशस्थः स च पञ्चमासं नजीवत्यर्थात्पञ्चमासाभ्यन्तरे मृत्युं प्राप्नोति ॥ १० ॥

हिन्दी—जन्मलग्न में सूर्य-शुक्र तथा शनैश्चर हों और द्वादश भाव में गुरु हो तो वह बालक पाँच मास के अन्दर ही मृत्यु को प्राप्त हो जाता है ॥ १० ॥

भातृरिष्ट योग कथन—

पूर्वमुक्तं शिशोरिष्टं मातृरिष्टमथोच्यते ।
दिवा शुक्रो भवेन्माता रात्रौ माता च चन्द्रमा ॥ ११ ॥

अन्वयः—शिशोरिष्टं पूर्वमुक्तं अथ मातुरिष्टं उच्यते दिवा शुक्रो माता भवेत् रात्रौ च चन्द्रमा माता (भवेत्) ॥ ११ ॥

संस्कृतः—पूर्वार्धं स्पष्टम् । यस्य दिवा दिवसे जन्म तस्य शुक्रो माता अर्थात् मातृकारकः स्यात् । एवं यस्य रात्रौ जन्म तस्य चन्द्रमा मातृ-संज्ञकः स्यात् ॥ ११ ॥

हिन्दी—बालारिष्ट योगों को कहकर अब मातृरिष्ट योगों को कहता हूँ । यदि दिन में जन्म हो तो शुक्र मातृकारक और रात्रि में जन्म हो तो चन्द्रमा मातृकारक होता है (दिन में शुक्र मातृसंज्ञक तथा रात्रि में चन्द्रमा मातृसंज्ञक होता है) ॥ ११ ॥

प्रसवे च दिवाभागे शुक्रे च पापसंयुते ।
अथवा पाप सन्दृष्टे माता च म्रियते ध्रुवम् ॥ १२ ॥

अन्वयः—दिवाभागे च प्रसवे शुक्रे च पापसंयुते अथवा पाप सन्दृष्टे (तदा) माता च ध्रुवं म्रियते ॥ १२ ॥

संस्कृतः—दिवाभागे दिवसे प्रसवे जन्मनि सति । तथा शुक्रे पापसंयुते पापग्रहसहिते सति । अथवा शुक्रे पापसन्दृष्टे पापग्रहदृष्टे सति जातस्य माता ध्रुवं निश्चितं म्रियते ॥ १२ ॥

हिन्दी—यदि दिन में जन्म हो और शुक्र पापग्रह से युक्त अथवा दृष्ट हो (शुभग्रह से युत दृष्ट न हो) तो जातक के माता की निश्चय ही मृत्यु होती है ॥ १२ ॥

आत्मगेहस्थितः शुक्रः पापान्तः पापसंयुतः ।
अथवा पापसन्दृष्टो माता च म्रियते ध्रुवम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—शुक्रः आत्म गेहस्थितः (एवं) पापान्तः (वा) पापसंयुतः अथवा पापसंदृष्टो (तदा) माता च ध्रुवं म्रियते ॥ १३ ॥

संस्कृतः—यदि शुक्रः आत्मगेहस्थितः स्वराशावर्थाद्वृषतुलाराशौ गतः तथा पापान्तः पापग्रहमध्यगतस्तथा पापसंयुतः अथवा तादृशः शुक्रः पाप-सन्दृष्टः तदा ध्रुवं निश्चितं माता म्रियते ॥ १३ ॥

हिन्दी—वृष अथवा तुला राशि स्थित शुक्र पापग्रहों के मध्य में हो या पापग्रह से युक्त अथवा दृष्ट हो तो निश्चय ही माता की मृत्यु होती है ॥ १३ ॥

प्रसवे रात्रिसमये चन्द्रः पापग्रहेक्षितः ।
माता च म्रियते तस्य यदि पापसमन्वितः ॥ १४ ॥

अन्वयः—रात्रिसमये प्रसवे पापग्रहेक्षितः चन्द्रः (वा) यदि पाप समन्वितः तस्य माता च म्रियते ॥ १४ ॥

संस्कृतः—रात्रिसमये प्रसवे सति तथा चन्द्रः पापग्रहेक्षितः पापग्रह-सन्दृष्टः पुनर्यदि पापसमन्वितः पापग्रहयुतः । यस्यैवं विधौ योगे जन्मो भवेत्तस्य माता म्रियते ॥ १४ ॥

हिन्दी—जिस जातक का जन्म रात्रि के समय में हुआ हो और चन्द्रमा पापग्रह से दृष्ट और युक्त हो तो उसकी माता मृत्यु को प्राप्त होती है ॥ १४ ॥

पूर्वोक्त अरिष्ट का भङ्ग कथन—

आत्मगेहस्थितः शुक्रो पापे च परक्षेत्रगे ।
शुभग्रहाः प्रपश्यन्ति रिष्टभङ्गो भवेत्तदा ॥ १५ ॥

अन्वयः—शुक्रो आत्मगेहस्थितः पापे परक्षेत्रगे शुभग्रहाः प्रपश्यन्ति तदा रिष्ट भङ्गो भवेत् ॥ १५ ॥

संस्कृतः—यदि शुक्र आत्मगेहस्थितः स्वराशौ स्थितः । पुनर्यदि पापे पापग्रहे परक्षेत्रगे स्वराशितोऽन्यराशिगते सति । तत्र यदि तं शुक्रं शुभग्रहाः प्रपश्यन्ति विलोकयन्ति तदा 'आत्मगेहस्थितः शुक्रः पापान्तः पापसंयुतः' इति योरिष्टस्तस्य भङ्गो नाशो भवेत् ॥ १५ ॥

हिन्दी—शुक्र स्वगृही हो और पापग्रह अन्य की राशियों में हों तथा शुक्र शुभ ग्रहों से दृष्ट हो तो 'आत्मगेह स्थितः शुक्रो' इत्यादि पूर्वोक्त श्लोक से कहे गये अरिष्टों का नाश होता है ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा क्षीणचन्द्रं च पापाः पश्यन्ति सर्वतः ।
शुभग्रहा न पश्यन्ति माता च म्रियते तदा ॥ १६ ॥

अन्वयः—अथवा पापाः च क्षीणचन्द्रं पश्यन्ति शुभग्रहाः सर्वतः न पश्यन्ति तदा माता च म्रियते ॥ १६ ॥

संस्कृतः—अथवा पापाः पापग्रहाः क्षीणचन्द्रं नष्टवीर्यं चन्द्रं सर्वतः पश्यन्ति, तथा यदि तं क्षीणचन्द्रं शुभग्रहा न पश्यन्ति तदैवं विधे योगे जातस्य माता म्रियते ॥ १६ ॥

हिन्दी—जन्म के समय क्षीण चन्द्रमा को सभी पापग्रह देखते हों शुभग्रह लेशमात्र भी न देखते हों तो उसके माता की निश्चय ही मृत्यु होती है ॥ १६ ॥

निधनारिगतश्चन्द्रो भौमश्च सप्तमे भवेत् ।
तस्य मातृविनाशः स्याद्यदिपापैः समन्वितः ॥ १७ ॥

अन्वयः—चन्द्रो निधनारिगतः भौमश्च सप्तमे भवेत् यदि पापैः समन्वितः (तदा) तस्य मातृ विनाशः स्यात् ॥ १७ ॥

संस्कृतः—यदि चन्द्रो निधनारिगतः किञ्चाष्टषष्ठस्थानगतः । पुनर्यदि भौमः सप्तमे स्थाने भवेत् । तत्र यदि पापैः पापखेटैश्चन्द्रः समन्वितो युतो भवेत् । एवं विधे योगे यस्य जन्म तस्य मातृविनाशः स्यात् ॥ १७ ॥

हिन्दी—जन्मसमय में चन्द्रमा पापग्रहों से युक्त होकर षष्ठ में या अष्टम में हो और सप्तम में मङ्गल हो तो उसके माता की मृत्यु अवश्य ही होती है ॥ १७ ॥

चन्द्राष्टमगते भौमे शत्रुस्थे क्रूरवीक्षिते ।
मातुस्तस्य भवेद्धानिः पिता तस्य विदेशगः ॥ १८ ॥

अन्वयः—अष्टमगते चन्द्रे शत्रुस्थे भौमे क्रूरवीक्षिते (च) तस्य मातुः हानिः भवेत् तस्य पिता विदेशगः (भवेत्) ॥ १८ ॥

संस्कृतः—भौमे मङ्गले चन्द्राष्टमगते चन्द्रादष्टमस्थे तथा शत्रुस्थे लग्ना-त्षष्ठस्थे तथा क्रूरवीक्षिते पापग्रहदृष्टे सति । तस्य मातुर्हानिर्विनाशः स्यात् तथा तस्य पिता विदेशगः स्यादर्थाद्विदेशगस्य पितुः परोक्षे जन्म स्यात् ॥ १८ ॥

हिन्दी—जन्मसमय में चन्द्रमा से अष्टम और लग्न से षष्ठ में मङ्गल हो (अर्थात् लग्न से षष्ठ में मङ्गल, एकादश में चन्द्रमा हो) तथा मङ्गल पापग्रह से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्ट हो तो पिता के परोक्ष में उसका जन्म होता है और उसके माता की मृत्यु होती है ॥ १८ ॥

लग्नाच्चतुर्थगः पापो यदि स्याद्बलवत्तरः।
तदा मातृवधं कुर्याच्चन्द्रोपेतो विशेषतः ॥ १९ ॥

अन्वयः—पापो लग्नाच्चतुर्थगः यदि पापो बलवत्तरः स्यात् तदा मातृवधं कुर्यात् चन्द्रोपेतो विशेषतः (फलं भवेत्) ॥ १९ ॥

संस्कृतः—यदि पापः पापग्रहो लग्नाच्चतुर्थगस्तथा बलवत्तरो वीर्याधिकः तदा स च पापो मातृवधं मातृनाशं कुर्यात्। अथैवं यदि तादृशः पापश्चन्द्रोपेतश्चन्द्रेण सहितः तदा विशेषतः मातृनाशो भवेत् ॥ १९ ॥

हिन्दी—जन्मसमय में अति बलवान पापग्रह लग्न से चतुर्थ में हो तो वह माता की मृत्यु करता है। यदि पापग्रह से युक्त चन्द्रमा हो तो वह निश्चय ही माता की मृत्यु करता है ॥ १९ ॥

शनिमङ्गलयोर्मध्ये यदि तिष्ठति चन्द्रमा।
तदा मातृवधो ज्ञेयो भौमार्कौ संयुतौ तथा ॥ २० ॥

अन्वयः—यदि शनि मङ्गलयोर्मध्ये चन्द्रमा तिष्ठति तथा भौमार्कौ संयुतौ तदा मातृवधो ज्ञेयो ॥ २० ॥

संस्कृतः—यदि चन्द्रमा शनिमङ्गलयोर्मध्ये तिष्ठति तथा यदि भौमार्कौ संयुतौ रविमङ्गलावेकत्र स्थितौ तदा मातृवधो ज्ञेयो गणकेनेति शेषः ॥ २० ॥

हिन्दी—यदि चन्द्रमा शनि और मङ्गल के मध्यगत हो तथा मङ्गल सूर्य एक साथ हों तो माता की मृत्यु होती है ॥ २० ॥

चन्द्रः पापसमायुक्तो लग्नात्केन्द्रगतो यदि।
तदा मातृवधो ज्ञेयः सप्ताहान्नात्र संशयः ॥ २१ ॥

अन्वयः—चन्द्रः यदि लग्नात्केन्द्र गतो पापसमायुक्तो तदा सप्ताहात् मातृवधो ज्ञेयः अत्र न संशयः ॥ २१ ॥

संस्कृतः—यदि चन्द्रः पापसमायुक्तः पापसहितः। पुनर्यदि लग्नात् केन्द्रत्रिकोणगः तदा सप्ताहात्सप्तवासरान्मातृवधो ज्ञेयः इति संशयो न ॥ २१ ॥

हिन्दी—यदि चन्द्रमा पापग्रहों से युक्त होकर केन्द्र स्थान में हो तो सात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिन के अन्दर ही माता की मृत्यु होती है इसमें कोई संशय नहीं ॥ २१ ॥

दिवसे तु पिता मित्रः पिता रात्रौ शनैश्चरः।
भ्राता दिवाकरो रात्रौ दिवसे च शनैश्चर॥ २२ ॥

अन्वयः—दिवसे तु मित्रः पिता रात्रौ शनैश्चरः पिता रात्रौ दिवाकरो भ्राता दिवसे च शनैश्चरः (भ्राता) ॥ २२ ॥

संस्कृतः—दिवसे प्रसवे सति मित्रः सूर्यः पिता पितृसंज्ञकः स्यात् । रात्रौ प्रसवे सति शनैश्चरः पिता स्यात् तथा रात्रौ प्रसवे सति दिवाकरः सूर्यो भ्राता भ्रातृसंज्ञकः स्यात् । दिवसे प्रसवे सति शनैश्चरश्चशब्दोपादानाद्भ्रातृसंज्ञकः स्यात् ॥ २२ ॥

हिन्दी—दिन में जन्म हो तो सूर्य तथा रात्रि में जन्म हो तो शनि पितृकारक होते हैं । इसी तरह दिन में जन्म हो तो शनि तथा रात्रि में जन्म हो तो सूर्य भातृकारक होते हैं ॥ २२ ॥

निधने च गते सूर्ये सौरिभौमेक्षिते यदि ।
शुक्रगुर्वोर्नचालोकः सपिता म्रियते शिशुः ॥ २३ ॥

अन्वयः—निधने गते सूर्ये यदि सौरि भौमेक्षिते (परं) शुक्र गुर्वो न च आलोकः (तदा) शिशुः पिता सं म्रियते ॥ २३ ॥

संस्कृतः—यदि सूर्ये निधने लग्नादष्टमे गते तथा सौरिभौमेक्षिते शनि मङ्गलाभ्यां दृष्टे 'सौरिभौमयुते' इति वा पाठान्तरे ताभ्यां सहिते । तथा विधे सूर्ये सूर्योपरि यदि शुक्रगुर्वोः शुक्रबृहस्पतिग्रहद्वयस्य नावलोको दृष्टिर्नास्ति तदा सपिता पितृसहितः शिशुर्म्रियते ॥ २३ ॥

हिन्दी—शनि और मङ्गल से दृष्ट होकर सूर्य यदि अष्टम भावगत हो तथा बृहस्पति या शुक्र इनमें से किसी से दृष्ट न हो तो पिता के साथ नवजात शिशु की भी मृत्यु होती है ॥ २३ ॥

अष्टमस्थो यदा चन्द्रो गुरुराहू द्वितीयगौ ।
सौरिभौमान्विते सूर्ये पितृहा सप्तवासरात् ॥ २४ ॥

अन्वयः—चन्द्रो यदा अष्टमस्थो गुरु राहु द्वितीयगौ सूर्ये सौरि भौमान्विते (तदा) सप्तवासरात् पितृहा (भवेत्) ॥ २४ ॥

पं ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—यदा चन्द्रो लग्नादष्टमस्थः, तथा गुरुराहू द्वितीयगौ, तथा यदि सूर्ये सौरिभौमान्विते शनिमङ्गलसहिते सति तदा जातः शिशुः सप्तवासरात्पितृहा पितृनाशकरः स्यात् ॥ २४ ॥

हिन्दी—अष्टम-द्वादश या द्वितीय में गुरु और राहु हों तथा सूर्य यदि मङ्गल और शनि से युक्त होकर किसी भी स्थान में रहे तो सात दिन के अन्दर ही पिता की मृत्यु होती है ॥ २४ ॥

लग्नाष्टमगते भौमे द्वादशे वा द्वितीयगे।
पितृनाशो भवेत्तस्य शुभैर्यदि न दृश्यते॥ २५ ॥

अन्वयः—लग्नात् अष्टम गते भौमे वा द्वादशे द्वितीयगे (तथा) यदि शुभैः न दृश्यते (तदा) तस्य पितृनाशो भवेत् ॥ २५ ॥

संस्कृतः—भौमे लग्नाष्टमगते वा द्वादशे वा द्वितीयगे तथा यदि शुभैः स च भौमो न दृश्यते तदा तस्य शिशोःपितृनाशः स्यात् । वा षष्ठाष्टमगते भौमे रिष्फे पापद्वये त्रये इति पाठान्तरे तु भौमे षष्ठाष्टमगते तथा रिष्फे द्वादशे पापद्वये द्वौ पापग्रहौ वा त्रये त्रयः पापाः । अन्यत्पूर्ववदिति ॥ २५ ॥

हिन्दी—अष्टम-द्वादश या द्वितीय में मङ्गल हो और वह शुभग्रह से यदि दृष्ट न हो तो शीघ्र ही पिता की मृत्यु होती है ॥ २५ ॥

अष्टमस्थो यदा भानुर्लग्ने राहुसमन्विते ।
पिता वा म्रियते तस्य स्वयं च म्रियते शिशुः ॥ २६ ॥

अन्वयः—यदा भानु अष्टमस्थो लग्ने समन्विते राहु (तदा) शिशुः स्वयं च म्रियते वा तस्य पिता (म्रियते) ॥ २६ ॥

संस्कृतः—यदा भानुः सूर्योऽष्टमस्थस्तथा लग्ने राहु समन्विते राहुयुते सति । तस्य पिता म्रियते वा स्वयं शिशुर्म्रियते ॥ २६ ॥

हिन्दी—अष्टम में सूर्य तथा लग्न में राहु हो तो उसके पिता की मृत्यु होती है या बालक स्वयं ही मृत्यु को प्राप्त करता है ॥ २६ ॥

सोम सिद्धान्त का वचन—

भौमे वा निधने चन्द्रः पापयुक्तो भवेद्यदि ।
पितृघाती परोक्षे च माता वा म्रियते ध्रुवम्॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—निधने भौमे वा चन्द्रः यदि पाप युक्तौ भवेत् (तदा) पितृघाती वा परोक्षे माता च ध्रुवं म्रियते ॥ २७ ॥

संस्कृतः—भौमो मङ्गलो वा चन्द्रो यदि निधनेऽष्टमे स्थितस्तथा पापयुक्तः पापग्रहयुतः । तदैवं विधे योगे जातः शिशु पितृघाती पितृनाशकरः । वा तस्य परोक्षे ध्रुवं निश्चितं माता म्रियते ॥ २७ ॥

हिन्दी—अष्टमभाव में मङ्गल या चन्द्रमा पापग्रहों से युक्त हो तो जातक के पिता की मृत्यु होती है अथवा पिता के परोक्ष में माता की मृत्यु होती है ॥२७॥

रन्ध्रेऽर्के सप्तमे भौमे निधनस्थे च सूर्यजे ।
पितृमृत्युर्भवेत्तस्य शुभैर्यदि न दृश्यते ॥ २८ ॥

अन्वयः—अर्के रन्ध्रे सप्तमे भौमे निधनस्थे सूर्यजे च यदि शुभैः न दृश्यतें (तदा) तस्य पितृमृत्युः भवेत् ॥ २८ ॥

संस्कृतः—अर्के रवौ रन्ध्रेऽष्टमस्थे तथा यदि भौमे सप्तमे तथा च यदि सूर्यजे शनैश्चरे निधनस्थेऽष्टमस्थे सति । एवंविधो योगो यदि शुभैर्न दृश्यते तदा तस्य बालकस्य पितृमृत्युर्भवेत् ॥ २८ ॥

हिन्दी—अष्टम में सूर्य-शनि तथा सप्तम में मङ्गल हों और ये शुभग्रह से यदि दृष्ट न हों तो जातक के पिता की मृत्यु होती है ॥ २८ ॥

सूर्याच्च सप्तमस्थाने शनिभौमौ यदा स्थितौ ।
तदा पितृवधो ज्ञेयस्तयोर्मध्येऽथवा रविः ॥ २९ ॥

अन्वयः—सूर्यात् सप्तमस्थाने शनिभौमौ च यदा स्थितौ अथवा तयोः (शनि-भौम) मध्ये रविः तदा पितृ वधो ज्ञेयः ॥ २९ ॥

संस्कृतः—यदा सूर्यात्सप्तमस्थाने शनिभौमौ स्थितौ स्यातामित्येको योगः । अथवा रविस्तयोः शनिमङ्गलयोर्मध्येस्थितः तदा पितृवधो पितृनाशो ज्ञेयः ॥ २९ ॥

हिन्दी—सूर्य से सप्तम मङ्गल तथा शनि हो अथवा शनि और मङ्गल के मध्यगत रवि जिस किसी भी स्थान में हों तो वह पिता की मृत्यु करता है ॥ २९ ॥

कुजेन सहितो भानुः शनिना यदि वीक्षितः ।
शनिना संयुतो वापि कुजेन यदि वीक्षितः॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—कुजेन सहितो भानुः यदि शनिना वीक्षितः वा शनिना संयुतो यदि कुजेन वीक्षितः अपि (पितृवधो ज्ञेयः) ॥ ३० ॥

संस्कृतः—यदि भानुः सूर्यः कुजेन मङ्गलेन सहितस्तथा शनिना वीक्षितः सन्दृष्टः । अथवा भानुः शनिना संयुतः कुजेन वीक्षितः । तदैवं विधे योगद्वये जातस्योक्तवत्फलं स्यात् ॥ ३० ॥

हिन्दी—यदि मङ्गल से युक्त सूर्य को शनि देखता हो अथवा शनि से युक्त सूर्य को मङ्गल देखता हो तो जातक के पिता की मृत्यु होती है ॥ ३० ॥

दशभिश्च रवौ मीने पञ्चभिश्चन्द्रमाहरौ ।
द्वाभ्यां चैव कुजे मेषे पितृहासप्तवासरात् ॥ ३१ ॥

अन्वयः—मीने दशभिश्च रवौ हरौ पञ्चभिश्च चन्द्रमा मेषो द्वाभ्यां चैव कुजे (तदा) सप्तवासरात् पितृहा (भवेत्) ॥ ३१ ॥

संस्कृतः—रवौ दशभिर्मीने तथा चन्द्रमा पञ्चभिर्हरौसिंहे । तथा कुजे द्वाभ्यां मेषे तदा सप्तवासरात्पितृहा स्यात् ॥ ३१ ॥

हिन्दी—जातक के जन्म समय में सूर्य मीन के १० अंश पर, चन्द्रमा सिंह के ५ अंश पर और मङ्गल मेष के २ अंश पर हो तो ऐसे योग में सात दिन के अन्दर ही जातक के पिता की मृत्यु हो जाती है ॥ ३१ ॥

पञ्चभिर्भार्गवे युग्मे वह्निना म्रियतेशिशुः ।
अष्टाविंशन्मृगे भौमे पितृहा सप्तवासरात् ॥ ३२ ॥

अन्वयः—युग्मे पञ्चभिः भार्गवे (तदा) शिशुः वह्निना म्रियते, मृगे अष्टा-विंशत् भौमे (तदा) सप्तवासरात् पितृहा (भवेत्) ॥ ३२ ॥

संस्कृतः—भार्गवे शुक्रे पञ्चभिर्युग्मे मिथुने तदा शिशुर्वह्निना म्रियते। अथ भौमे चाष्टाविंशन्मृगे किञ्चाष्टाविंशतिभिर्मकरे तदा सप्तवासरात्पितृहा स्यात् ॥

हिन्दी—शुक्र मिथुन के ५ अंश पर हो तो उस बालक की मृत्यु अग्नि से होती है । मङ्गल मकर के २८ अंश पर हो तो उसके पिता की मृत्यु ७ दिन के अन्दर ही होती है ॥ ३२ ॥

पुरुष-स्त्री जन्मज्ञान—

पुरुषः पुरुषक्षेत्रं यदि पश्यति सर्वथा ।
तदा पुमां सञ्जानीयादन्यथा युवतिर्भवेत् ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योषित्क्षेत्रगतः शुक्रो बुधो वा यदि पश्यति।
तदा कन्यां विजानीयादन्यथा पुरुषो भवेत् ॥ ३४ ॥

अन्वयः—पुरुषः यदि सर्वथा पुरुषक्षेत्रं पश्यति तदा पुमान् सञ्ज्ञानीयात् अन्यथा युवतिः भवेत् ।

शुक्रो वा बुधो यदि योषित क्षेत्रगतः पश्यति तदा कन्यां विजानीयात् अन्यथा पुरुषो भवेत् ॥ ३३-३४ ॥

संस्कृतः—यदि पुरुषः पुरुषाभिधः खेटः पुरुषक्षेत्रं पुरुषसंज्ञकं राशिं सर्वथा पश्यति तदा पुमान् नरजन्म सञ्ज्ञानीयात् । अन्यथा अर्थात् स्त्रीसंज्ञकः खेटः स्त्रीराशिं पश्यति तदा युवतिः कन्या भवेत् ।

यदि शुक्रो वा बुधो योषित्क्षेत्रगः स्त्रीराशिगतः तथा वा स्त्रीराशिं पश्यति तदा कन्यां विजानीयात् । अन्यथा पुरुषो भवेत् ।। ३३-३४ ।।

हिन्दी—जन्मसमय में पुरुषसंज्ञक ग्रह (सूर्य-मङ्गल-बृहस्पति) पुरुषसंज्ञक राशि (मेष, मिथुन, सिंह, तुला, धनु, कुम्भ) में स्थित होकर जन्मराशि या लग्न राशि को देखते हों तो पुरुष का जन्म और स्त्री संज्ञक ग्रह यदि स्त्री संज्ञक राशि में होकर जन्म या लग्न राशि को देखते हो तो कन्या का जन्म कहना चाहिये ।

यदि स्त्रीराशिगत शुक्र या बुध स्त्रीराशिसंज्ञक जन्मलग्न को देखें तो स्त्री का जन्म अन्यथा पुरुष का जन्म कहना चाहिये ॥ ३३-३४ ॥

क्लीबजन्मज्ञान—

सौरिदृष्टे बुधयुते शुभयोगविवर्जिते ।
बुधमन्दगृहे जातः क्लीब एव न संशयः ॥ ३५ ॥
शनिदृष्टे युते वापि बन्ध्या भवति निश्चितम् ।
सुतस्थाने द्विपापे च त्रिपापे वाथ संयुते ॥ ३६ ॥
तदा स्त्रीपुरुषौ बन्ध्यो विज्ञेयौ शत्रुवीक्षितौ ॥ ३७ ॥

अन्वयः—बुध-मन्द गृहे बुधयुते सौरिदृष्टे शुभयोगविवर्जिते जातः क्लीब एव न संशयः ।

अथ सुतस्थाने शनिदृष्टे युते वा द्विपापे त्रिपापे च संयुते अपि बन्ध्या निश्चितं भवति । (यदि सुतस्थानं) शत्रुवीक्षितौ तदा स्त्रीपुरुषौ बन्ध्यो विज्ञेयौ ॥ ३५-३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतः—स्पष्टम् ॥ ३५-३७ ॥

हिन्दी—जन्माङ्ग में मिथुन-कन्या-मकर-कुम्भ इन राशियों में से कोई भी राशि लग्न हो और वह बुध से युक्त तथा शनि से दृष्ट हो एवं शुभग्रह के योग से रहित हो तो वह जातक नपुंसक होता है।

पञ्चमभाव शनि से दृष्ट-युक्त हो तथा दो या तीन पापग्रह पञ्चमभाव में हों और वे शत्रुग्रह से दृष्ट हों तो ऐसे योग वाले कन्या तथा पुरुष दोनों ही संतानहीन होते हैं ॥ ३५-३७ ॥

द्रेष्काण द्वारा स्त्री-पुरुष ज्ञान—

मेषादिद्वादशे राशौ द्रेष्काणं च विनिर्दिशेत्।
एकैकेन तु ऋक्षेण त्रितयं त्रितयं भवेत् ॥ ३८ ॥
आदिमध्यान्तभागेन ज्ञातव्यः पुरुषः स्त्रियः।
स्त्रीभागे च भवेत्कन्या पुंभागे पुरुषोभवेत् ॥ ३९ ॥

अन्वयः—मेषादि द्वादशे राशौ द्रेष्काणं च विनिर्दिशेत् (स) तु एकैकेन ऋक्षेण त्रितयं त्रितयं भवेत्।

आदि मध्य अन्त्य भागेन पुरुषः स्त्रियः ज्ञातव्यः, स्त्रीभागे कन्या भवेत् पुंभागे च पुरुषो भवेत् ॥ ३८-३९ ॥

संस्कृतः—स्पष्टम् ॥ ३८-३९ ॥

हिन्दी—प्रत्येक राशि में तीन-तीन द्रेष्काण होते हैं। अर्थात् प्रत्येक राशि में आदि-मध्य और अन्त्य तीन भाग होते हैं। स्त्री-पुरुष द्रेष्काण का ज्ञान कर स्त्री द्रेष्काण में स्त्री और पुरुष द्रेष्काण में पुरुष का जन्म समझना चाहिये ॥ ३८-३९ ॥

मेषराशि का द्रेष्काण फल—

मेषस्य प्रथमे भागे द्रेष्काणे पुरुषो भवेत्।
क्रोधनो वक्रनेत्रश्च कृष्णावर्णो दुरासदः ॥ ४० ॥
द्वितीयभागे सम्प्राप्ते नारी भवति निश्चितम्।
स्थूलोदरी स्थूलमुखी युवती लोहिताकृतिः ॥ ४१ ॥
तृतीये पुरुषः शूरो निर्भयश्चाति दुर्मतिः।
कपिलोदारुणश्चैव सत्यशौचविवर्जितः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयः—मेषस्य प्रथमे द्रेष्काणे भागे पुरुषो भवेत् (स तु) क्रोधनो वक्रनेत्रः कृष्णवर्णो दुरासदः च ।

द्वितीयभागे सम्प्राप्ते निश्चितं नारी भवति (सा तु) स्थूलोदरी स्थूलमुखी लोहिताकृति युवति ।

तृतीये पुरुषः (स च) निर्भयः अतिदुर्गतिः कपिलो दारुणः सत्यशौच विवर्जितः चैव ॥ ४०-४२ ॥

संस्कृतः—स्पष्टम् ॥ ४०-४२ ॥

हिन्दी—मेष के प्रथम द्रेष्काण में क्रोधी-वक्र (तिरछी) नेत्र से युक्त, कृष्ण वर्ण से युक्त, भयङ्कर आकृति वाले पुरुष का जन्म होता है ।

मेष के द्वितीय द्रेष्काण में स्थूल उदर (पेट) तथा मुख से युक्त और लालवर्ण वाली स्त्री का जन्म होता है ।

